प्रबोधनी स्त्री प्रबोध्यते हरिरत्र प्र+बुध णिच् आधारे ल्युट् ङीप्। कार्त्तिकशुक्लैकादश्याम् तत्र शयितस्य हरेरुत्थापनात्तथात्वम् तस्याश्चाख्यानमेतत्। तस्यामेकादशीमध्ये तस्याः प्राशस्त्यभेदश्च प्राधान्यता दर्शिता। तन्माहात्म्य च पद्मपु॰उ॰ख १२६अ॰ उक्तं यथा “ब्रह्मोवाच प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। शृणुष्व मुनिसत्तम!। तावद्गर्जन्ति तीर्थानि पुण्यान्यायतनानि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। अश्वमेधसहस्राणि वाजपेयशतानि च। एकेनैवोपवासेन प्रबोधन्या भवन्ति हि। मेरुमन्दरतुल्यानि पापानि सकलान्यपि। भस्मसात् कुरुते मर्त्यो हरिबोधन्युपासनात्। पूर्वजन्मसहस्रेषु यत्पापं समुपार्जितम्। जागरेण प्रबोधन्या दहते तूलराशिवत्। उपवासं प्रबोधन्यां यः करोति समाहितः। विधिवन्मुनिश्रेष्ठ! यथोक्तं लभते फलम्। यानि कानि च तीर्थानि त्रैलोक्ये सम्भवन्ति वै। तानि तस्य गृहे सम्यक् कृता येन प्रबोधनी। किं तस्य बहुभिः पुण्यैः परलोकसुखप्रदैः। जन्मतोऽन्तोपिता येन सम्पूर्णा हरिबोधनी। बोधनीं समुपोष्यैव मुक्तिभागी भवेन्नरः। प्रबोधन्यां नरश्चैव न पुनर्गर्भमाविशेत्। स्नानं दानं जपो होमः समुद्दिश्य जनार्दनम्। नरैर्यत् क्रियते ब्रह्मन्! प्रबोधन्यां तदक्षयम्। येऽर्चयन्ति नराश्चस्यां भक्त्या विष्णुं जगत्पतिम्। उपिता बाधनीं ते च प्रभवेयुर्हि बोधक। माहात्म्यमिदमुक्तं महापापौघनाशनम्। प्रबोधन्या दिने विष्णोर्विधिवत् समुपोषणम्। स ज्ञानी च स योगी च स तपस्वी जितेन्द्रियः। स्वर्गमोक्षौ च तस्यास्तां य उपास्ते प्रबोधनीम्। यत् जन्मकृत पापं स्वल्पं वा यदि वा बहु। करोति भक्षसाद्विष्णुः प्रबोधन्यां प्रपूजितः। हरिपूजाविधानस्या कार्त्तिके बोधवासरे। गीतशास्त्रविनोदेन प्रबोधन्यान्तु जागरात्। चन्द्रसूर्य्योपरागे च यत् फलं परिकीर्त्तितम्। तस्मात् सहस्रगुणितं प्रबोधन्यां हि जागरात्। स्नानं दानं जपो होमः स्वाध्यायश्चार्चनं हरेः। एतस्मात् कोटिगुणितं प्रबोधन्यां हि जागरात्। जन्मप्रभृति यत्पुण्यं नरेणोपार्जितं भुवि। वृथा भवति तत्सर्वं न कृता बोधवासरम्”। “प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। शृणुष्व तत्पुण्यं त्वं मुनिसत्तम!। तावद्गर्जति विप्रेन्द्र। गङ्गाभागीरथी क्षितौ। यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी। तावद्गर्जन्ति तीर्थानि आसमुद्रसरांसि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। वाजपेयसहस्राणि अश्वमेधशतानि च। एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः। दुर्लभञ्चैव दुष्प्राप्यं त्रैलोक्ये सचराचरे। तदपि प्रार्थितं विप्र!। ददाति हरिबोधनी। ऐश्वर्य्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः। ददात्युपोषिता विप्र!। हेलया हरिबोधनी। मेरुमन्दरतुल्यानि पापान्युपार्जितान्यपि। एकेनैवोपवासेन दहते हरिबोधनी। पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते। एकेनैवोपवासेन ददाति हरिबोधनी” हरि॰वि॰।

प्रभञ्जन न॰ प्रभनक्ति तरुादीन् प्र+भन्ज-युच्। वायौ अमरः। [लतायां स्त्री राजनि॰।

प्रभद्र पु॰ प्रकृष्ट भद्रमस्मात् ५ब॰। १निम्बवृक्षे २प्रसारिण्यां

प्रभद्रक न॰ “भवति नजौ भजौ रसहितौ प्रभद्रकम्” वृ॰र॰ उक्ते पञ्चदशाक्षरपादके छन्दोभेदे।

प्रभर्मन् पु॰ भृ-भावे कर्त्तरि वा मनिन् प्रकृष्टं भर्म भरणं प्रकृष्टो भर्मा भर्त्ता ऋत्विक् वा यस्मिन्। १यज्ञे ऋ॰८। ८२।१ भाष्ये दृश्यम्। प्र+भृ-भावे मनिन्। २प्रकर्षेण भरणे सम्पादने न॰ ऋ॰ १।७६।७

प्रभव पु॰ प्रभवत्यस्मात् “भुवः प्रभवः” पा॰ भूकर्त्तरपादाने चार्थे अप्। १प्रथमप्रकाशस्थाने २अन्यत विवस्य प्रथमोपलम्भस्थाने हेमच॰ ३मूले ४मुनिभेदे ५जन्महेतौ। भावे अप्। ६जन्मनि। करणे अप्। ७पराक्रमे मेदि॰। ८षष्टिवत्सरमध्ये वत्सरभेदे तत्फलञ्च ज्यो॰त॰ भविष्यपु॰ “बहुतोयास्तथा मेघा बहुशस्या च मेदिनी। बहुक्षीरास्तथा गावो व्याधिरोगविवर्जिता। प्रशान्ता पार्थिवाश्चैव प्रभवे परिकीर्त्तिता”। ९विष्णौ पु॰ “प्रभवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः” विष्णुस॰

प्रभवादि पु॰ प्रभव आदिर्येषाम्। प्रभवप्रभृतिषष्टिवत्सरेषु स च गुरुमध्यभोगात् गणनीय। “ज्योतिर्विद इत्य मध्यात् प्रभवादिक सम्भवम्। उभुक्तवत् प्रमाद्यादि स-प्तांशानपि समावम्” ज्यो॰त॰। ते च ज्यो॰त॰ फलसहिताः दर्शिता तच्छब्दे तन्नाक्षत्रे संप्रत च तदानयनम्

[illegible]

प्रमविष्णु त्रि० [illegible]

प्रमद [illegible]

प्रमाकर [illegible]

प्रमाकोट [illegible]

प्रमाचाम [illegible]

प्रमात [illegible]

[illegible]

प्रमातीत [illegible]

प्रमातोर [illegible]

प्रमाथ [illegible]

प्रमाथक [illegible]

प्रमाथिन् [illegible]

स्थलं दृशान्तिमत् । शान्त सवेन्नतिरपि चेद्गुणपक्षैः सा यदिताग्निमरुधिरे । प्रभावती" इति श्रुतबोध ।

प्रभाव पु॰ प्र+भाव–घञ्। १वस्यवमध्ये वत्समेदे २प्रकृष्ट-पक्षे त्रि॰ शटा॰। चरणाङ्के १८।७पृ॰ दृश्यम् । तत्र पा-न्तत्वेन पाठः जटाधरसम्मत ।

प्रभास त्रि॰प्रभासते प्र+भास–अच् । १प्रकृष्टदीप्तियुते २सैन-न्याधिपभेदे पु॰ हेमच॰। ३कुमारानुचरगणभेदे पु॰भा॰ श॰४६अ॰ । ४ऋषिभेदे पु॰ भा॰शा॰ १६६अ॰। ५वसुभेदे पु॰ हरिव॰ ३अ॰ मान्तत्वया पाठ । ६अष्टममन्वन्तरे देवगणभेदे पु॰ मार्क॰पु॰८०अ॰। ७तीर्थभेदे स्त्रिका "पुण्यं प्रभास वसुधायां नाम यत्रोदुराट् यक्ष्मणा क्लिश्य-मान" इत्युपक्रमे यत्र तु तीर्थवरं पृथिव्यां प्रभास-मानस्तु च प्रभासः" इत्यादिना तत्तीर्थोत्पत्तिमाहात्म्यादिकथा भा॰श॰३६अ॰ प्रादौ दृश्या ।

प्रभासन्त पु॰ प्र+भास–वा॰ झ । १परमेश्वरे २सूर्ये च ह-रिव॰ ११अ॰। [त्वात् चन्द्रमसे २गजे पु॰ अमरः ।

प्रभिन्न त्रि॰ प्र+भिद क्त । १प्रकृष्टभेदयुक्ते मभिन्नत्वादिस्य-

प्रभु त्रि॰प्र+भू–डु । १स्वामिनि २कार्यसम्पादनक्षमयुते "नि-ग्रहानुग्रहे यस्य प्रभुरित्यभिधीयते" इत्युक्ते ३निग्रहा-नुग्रहसमर्थे ४विष्णौ पु॰ "प्रभवः प्रभुरीश्वरः" विष्णु स॰ "काम कामप्रद प्रभु" तत्रैव नामान्तरं तत्र पुन-र्वेच भवनात् प्रभुरितीति भाष्योक्तेः "सर्वासु क्रियासु सामर्थ्यातिशयात् प्रभु" भाष्योक्तेश्च व्युत्पत्तिभेदात् नामद्वयम् । ५अष्टममन्वन्तरे देवगणभेदे मार्क॰पु॰ ८०अ॰ ।

प्रभुत्वाक्षेप पु॰ अर्थालङ्कारभेदे "धनञ्च बहु लभ्यं ते सुख क्षेमञ्च वर्त्मनि । न च मे प्राणसन्देहस्तथापि प्रिय ! मा स्म गा । इत्याचक्षाणया हेतून् प्रिययात्रानुबन्धिनः । प्रभुत्वेनैव रुद्धत्वात् प्रभुत्वाक्षेप उच्यते" । "हे प्रिय ! ते विदेशगमने इति अध्याहार्य्यं बहु धनं सुखञ्च तथा वर्त्मनि पथि क्षेमं कुशलञ्च लभ्यम् । अत्र च मे प्राणसन्देहः न तव शीघ्रप्रत्यागमनस्य बहुधनलाभस्य च सम्भवादिति भावः । तथापि मा स्म गा मा गच्छ अत्र प्रियायात्राया प्रियस्य विदेशगमनस्य अनुबन्धिनः प्रोत्सा-हान् हेतून् आचक्षाणया कीर्त्तयन्त्या कयाचित् स्वाधीन-पतिकयेति शेषः प्रभुत्वेन स्वाधीनतया एव पतिः रुद्धः विदेशगमनात् निवर्त्तितः तस्मात् अयं प्रभुत्वाक्षेप उ-च्यते" प्रेम॰ टीका ।

प्रभुभक्त त्रि॰ ७त॰। १स्वाम्यनुरक्ते । "बहुाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः । प्रभुभक्तश्च शूरश्च ज्ञातव्याः षड्गुणाः शुनः" चाणक्यः । कुलीने उत्तमे २घोटके पु॰ शब्दच॰।

प्रभूत त्रि॰ प्र+भू क्त । १प्रचुरे अमरः २उद्गते मेदि॰ ३भूते ४उन्नते च शब्दर॰। ततः गोषदा॰ अस्त्यर्थे वुन् । प्रभूतक प्रचुरत्वादियुक्ते त्रि॰प्रभूतमाह "आहौ प्रभूतमादिभ्य" वार्त्ति॰ ठक् । प्राभूतिक प्रचुरवक्तरि त्रि॰ । द्विती-यान्तात् प्रभूतशब्दात् आहौ परे वार्त्तिकोक्ते ठक् ठक् । एवम् पर्य्याप्तदात् पर्य्याप्तमाह पार्य्याप्तिक तद्वक्तरि त्रि॰।

प्रभूति स्त्री प्र+भू–भावे क्तिन् नित्तकारादिमत्यये परे उभ्य गते प्रकृतिस्वर । प्रकर्षेण भवने ।

प्रभुवन् त्रि॰ प्र+भू–क्वनिप् । सामर्थ्ययुते स्त्रियां ङीप् "वनोर च" पा॰ नश्च र । प्रभ्वरी यजु॰२२।१७

प्रभूष्णु त्रि॰ प्र+भू–गस्नु । १प्रभावशीले २क्षमे समर्थे

प्रभृति अव्य॰ प्र+भृ-क्तिच् । तदारभ्येत्यर्थे । बहु॰समासे उत्तरपदस्थ । तदादिके त्रि॰ अमरः ।

प्रभृष्ट त्रि॰ प्र+भ्रंश–वा॰ कर्त्तरि क्त । प्रकृष्टभ्रष्टे ऋ॰१।१५२।१२

प्रभेद पु॰ प्रभिद्यतेऽनेन प्र+भिद–घञ् । १प्रकारे विशेषे । भावे घञ् । २भेदे अमरः ।

प्रभेश्वर पु॰ तीर्थभेदे शिवपु॰ ।

प्रभ्रंशथु पु॰ "प्रध्यनासत नासिकयैव यत्र सान्द्रो विदग्धो लवणः कफश्च । प्राक्सञ्चितो मूर्ध्नि च पित्ततप्त प्रभ्रं-शथु व्याधिमुदाहरन्ति" सुश्रुतोक्ते नासागतरोगभेदे ।

प्रभ्रष्ट त्रि॰ प्र+भ्रंश–क्त । १भ्रष्टे स्वार्थे कन् । शि-खावलम्बिमाल्ये चूडातो लम्बमानमाल्ये अमरः ।

प्रमगन्द पु इति पुण्यादिकर्मरहितपुरुषोत्तरायणे गमिष्य-तीति बुद्ध्या परेषामर्थं ददातीति प्रमगन्दो वार्धुषिक निरु॰ प्रगतो मगन्द पारस्करया त्वात्॰सु। वार्धुषि-ककुले ऋ॰ ३।५३।१४ भा॰ ।

प्रमण(न)स् त्रि॰ प्रकृष्ट मनोऽस्य प्रशादि अस्तम् अन्तोदा-त्तत्वम् । १हर्षयुते अमरः । २सुमनस्के च ।

प्रमति पु॰ प्रतीचीश्वरजनमेजयस्य पुरोहिते कश्यपवंश्ये १ऋषिभेदे मार्क॰पु॰१२८अ॰ । २च्यवनस्य पुत्रभेदे भा॰आ॰ ५अ॰ । रुरुप्रमद्वरानामक कुलपतिपुत्रे ३ऋषिभेदे भा॰अनु॰१ अ॰। अरणस्य पुत्रे ४नृपभेदे । तद गो वत्समीते ५पुत्रे नृपभेदे भाग॰ ८।२।१६। ६प्रकृष्टमतियुक्ते त्रि॰ ।

प्रमत्त त्रि॰ प्र+मद क्त । १अनवधानतायुक्ते प्रमादयुक्ते कर्त्तव्येऽकर्त्तव्यताज्ञानेन अकर्त्तव्ये वा कर्त्तव्यताधिया तत्तदाचरणयुक्ते "मत्त प्रमत्तमुन्मत्तं सुप्तं" माघ स्त्रिय

[illegible]

प्रमत्तगीत [illegible]

प्रमथ [illegible] प्र+मथ [illegible]

[illegible]

प्रमथन [illegible]

प्रमथाधिप [illegible]

प्रमथित [illegible]

प्रमद [illegible] प्र+मद [illegible]

प्रमदक [illegible]

प्रमदकानन [illegible]

प्रमदा [illegible] प्र+मद [illegible]

प्रमदावन [illegible]

प्रमदारा [illegible]

प्रमन्यु [illegible]

प्रमय [illegible]

प्रमयु [illegible]

मर्दन त्रि॰ प्रमर्दयति+प्र+मृद ल्यु । १प्रकर्षेण मर्दके २दैत्यभेदे पु॰ हरिव॰ १६४अ॰ । ३विष्णौ पु॰ "लोहिताक्षः प्रमर्दनः" विष्णुस॰ । तत्र प्रतर्दन इति पाठान्तरं तदर्थे "प्रलये पवभूतानां नाशकत्वात्" भाष्योक्तेस्तथात्वम् । "वसित ! सन्तापित । प्रमर्दन" भा॰शा॰ २१४॰ विष्णुस्तुतौ ।

प्रमा स्त्री प्र+मा–भावे अङ् । १यथार्थज्ञाने भ्रमभिन्ने ज्ञाने तल्लक्षणं तदुत्पत्तौ गुणाश्च भाषा॰ उक्ता यथा "दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् । प्रत्यक्षे तु विशेष्येण विशेषणवता समम् । सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः । पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् । शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा । गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा । अथ वा तत्प्रकारं यत् ज्ञानं तद्विशेष्यकम्" भाषा॰। दोषशब्दे ३७६६पृ॰ भ्रमकारणं दर्शितम् तथा च तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वं प्रामाण्यापरपर्य्यायम् तच्च मतभेदेन स्वतोग्राह्यं परतोग्राह्यं च परतोग्राह्यशब्दे ४२२४पृ॰ उक्तम् । तस्य विस्तरः उच्यते । तत्र न्यायमते "प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा॰ व्याख्याने सि॰ मु॰ यथा "मीमांसका हि प्रमात्वं स्वतोग्राह्यमिति वदन्ति । तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति । भट्टानां मते तु ज्ञानमतीन्द्रियम् । ज्ञानजन्या ज्ञातता प्रत्यक्षा । तया च ज्ञानमनुमीयते । मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते । सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते । विषयनिरूप्यं हि ज्ञानम् । अतो ज्ञानवित्तिवेद्यो विषयः । तन्मतं दूषयति । न स्वतोग्राह्यमिति । संशयेति । यदि ज्ञानप्रामाण्यं स्वतोग्राह्यं स्यात् तदाऽभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात् । तत्र हि यदि ज्ञानं ज्ञातं तदा प्रामाण्यं ज्ञातमेवेति कथं संशयः । यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः । तस्मात् ज्ञानप्रामाण्यमनुमेयम् । तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यन्नैव तन्नैव यथाऽप्रमा । इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् । एवम् इदं जलज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात् । न च हेतुज्ञानं कथं जातमिति वाच्यम् । पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात् तत्र गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् । तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात् । न च प्रमात्वस्य साध्यस्य प्रसिद्धिः कथमिति वाच्यम् घटज्ञानप्रमात्वस्य स्वतोग्राह्यत्वात् । न च प्रकारभेदेन प्रामाण्यभेदात् घटत्ववति घटत्वप्रकारके कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतोग्राह्यत्वात् । घटस्य च पूर्वमुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः । व्यवसायपरन्तु प्रामाण्यं न गृह्यते । तत्र संशयसामग्रीसत्त्वे संशयस्योपपत्तेः । किञ्चाभ्यासदशायां स्वतोऽनुव्यवसायादिना प्रामाण्यस्य स्वत एव ग्रहसम्भवात् प्रथमानुव्यवसायपरं न तद्ग्राहकत्वमिति कल्प्यते संशयानुरोधात् । अथ प्रामाण्यानुमितौ प्रामाण्यग्रहे न तत्र विषयनिश्चयरूपत्वार्थं तत्र प्रामाण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलसत्त्वे कारणसत्त्वे वा नानवस्थेति चेन्न अगृहीतप्रामाण्यकस्यैव निश्चयरूपत्वात् । तत्र च प्रामाण्यसंशयसत्त्वे तु परं प्रामाण्यानुमितेरपेक्षया यावदाग्रहं प्रामाण्यानुमितिरिष्यत एव सर्वत्र तु न संशयः क्वचित् कोऽप्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसञ्चारादिति सङ्क्षेपः । ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्व विशेषणं व्यर्थम् । न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तव मते भ्रमस्याभावादिति वाच्यम् । तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम् । अस्तु वा तत्रापि भेदाग्रह एव कारणमिति । न चाऽन्यथाख्यातिः स्यादिति रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात् । न च संवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यम् लाघवात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् । इत्थञ्च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणासत्तिकल्पनेऽपि न क्षतिः । फलमुखगौरवस्यादोषत्वात् । किञ्च यत्र रङ्गरजतयोरिमे रजते इति ज्ञानं जातं न तत्र बाधोऽपि । अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् । रङ्गे रङ्ग-

भेदः । यथोक्तं सां०प्र०भा० "प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव नः । प्रमाऽर्थाकारवृत्तीनां चेतने प्रतिबिम्बनम् । प्रतिबिम्बितवृत्तीनां विषयो मेय उच्यते । साक्षाद्दर्शनरूपं च साक्षित्वं वक्ष्यति स्वयम् । अतः स्यात् कारणाभावाद्वृत्ते साक्ष्येव चेतनः । विष्ण्वादेः सर्वसाक्षित्वं गौणं लिङ्गाद्यभावतः" । "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः" पात०सू० "इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषयसामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्, फलमविशिष्टं पौरुषेयचित्तवृत्तिबोधः" भाष्यम् "अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणम् । ननु पुरुषवर्त्ती बोधः कथं चित्तगतायाः वृत्तेः फलं न हि खदिरगोचरव्यापारेण परशुना पलाशे छिदा क्रियते इत्यत आह अविशिष्ट इति । न हि पुरुषगतो बोधो जन्यते अपि तु चैतन्यमेव बुद्धिदर्पणप्रतिबिम्बितं बुद्धिवृत्त्या अर्थाकारया तदाकारतामापाद्यमानं फलम् । तच्च तथाभूतं बुद्धेरविशिष्टं बुद्ध्यात्मिका वृत्तिः इत्तिर्बुद्ध्यात्मिकेति सामानाधिकरण्याद्युक्तं प्रमाणफलभाव इत्यर्थः" विव० । प्रमाणस्य भावः ष्यञ् प्रामाण्यं न० तल् प्रमाणता स्त्री त्व प्रमाणत्व न० प्रमाणभावे प्रमितिकरणत्वे प्रमात्वे च । उद्देश्यविधेयभावेनान्वयस्थले प्रमाणशब्दस्य प्रमाकरणपरत्वे क्वचिदेकवचनता यथा "वेदाः प्रमाणं स्मृतयः प्रमाणम्" इत्यादौ । क्वचित्तु बहुवचनता यथा "प्रत्यक्षानुमानोपमानागमाः प्रमाणानि" गौ०सू० । तत्र पूर्वत्र शब्दत्वरूपप्रमाणत्वजातेरेकत्वात् एकवचनत्वम् । उत्तरत्र प्रत्यक्षत्वादिजातिघटितव्यक्तीनाम् बहुत्वात् बहुवचनता इति प्रथमाव्युत्पादे गदाधरेण प्रपञ्चितम् तत्र दृश्यम् । सामान्यत्वात् क्लीवतैवास्य । क्वचित्तु विशेषपरत्वे स्त्रीत्वपरता यथा प्रमाणी । स्त्री प्रमाणी यस्य ब०व्री० "अप् पूरण्यीप्रमाण्योः" पा०अप्प्रमा० न कप् । श्रीप्रमाण इत्येव सि०कौ० । ८परिमाणभेदे च । "प्रमाणे मात्रजद्वयसज्दघ्नच" पा० इत्युक्ते दृश्यम् ।

प्रमाणबाधितार्थक पु० प्रमाणेन बाधितोऽर्थो यस्य कप् । तर्कभेदे तर्कशब्दे ३२५५ पृ० दृश्यम् ।

प्रमाणिका त्रि० प्रमाणं सिद्धिहेतुतयाऽस्त्यस्य ठन् । प्रमाणसिद्धे "प्रमाणिका जरौ लगौ" छ०र० उक्ते अष्टाक्षरपादके २छन्दोभेदे स्त्री । ३परिमाणभेदयुते मध्यमाङ्गुलपर्वान्तरमितपरिमाणयुते हस्ते हेमच० ।

प्रमातामह पु० प्रगतो मातामहं कार्यत्वेन व्याप्त्या०स० । १मातामहस्य पितरि अमरः । तस्य पत्नी ङीप् । प्रमातामही २तत्पत्न्यां स्त्री ।

प्रमातृ त्रि० प्रमिमीते प्र+मि–तृच् । प्रमाज्ञानकर्त्तरि । न्यायमते "यस्य प्रमाजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता" वात्स्या० । साङ्ख्यमते शुद्धचेतनो वृत्तिसाक्षी स । प्रमाणशब्दे तद्वाक्यं दृश्यम् । वेदान्तिमते "मेयातीतो विशुद्धो मुनिभिरभिहितो मोऽङ्गमन्त्रात्ममूर्त्तिः साक्षी सवितृ प्रभा तत्प्रतिफलितवपुर्गीयतेऽसौ प्रमाता" इत्युक्तदिशा अन्तःकरणवृत्तिप्रतिबिम्बितं तदवच्छिन्नं वा चैतन्यमेव प्रमाता ।

प्रमाथ पु प्र+मथ भावे घञ् । १बलात् हरणे २प्रपीडने च । भा० कर्त्तरि ण । ३कुमारानुचरभेदे भा० श० ४६अ० । स्वार्थे अण् । ४शिवपारिषदप्रमथगणे पु० हरिवं०१८१अ० ५धृतराष्ट्रपुत्रभेदे पु० भा०द्रो० १५७अ० ।

प्रमाथिन् त्रि० प्रमथ्नाति प्र+मथ–णिनि । १बलात् हारके २पीडके च । "इन्द्रियाणि प्रमाथीनि" गीता । स्त्रियां ङीप् । सा च ३अप्सरोभेदे भा०आ० १२४अ० । ४राक्षसभेदे पु० भा० व० २८४अ०

प्रमाद पु० प्र+मद–घञ् । १कर्त्तव्ये अकर्त्तव्यत्वधिया ततो निवृत्तौ अकर्त्तव्ये कर्त्तव्यत्वधिया तत्र प्रवृत्तौ वा अनवधानतायाम् अमरः । अनवधानताशब्दे १५१पृ०दृश्यम् । स च तमोगुणकार्य्यः तमःशब्दे ३२३५ पृ० दृश्यम् । तस्य मनोदूषकत्वात्तत्कार्य्यत्वं बोध्यम् ।

प्रमादवत् पु० प्रमादोऽस्त्यस्य मतुप् मस्य वः । १प्रमादयुते २असमीक्ष्यकारिणि जटा० ।

प्रमादिन् त्रि० प्रमाद नित्ययोगे इनि न तु अतइनौ एकाक्षरकदन्तात् तस्य निषेधात् । नित्यप्रमादयुक्ते "एकः प्रमादी स कथं न हन्यते" श्रीधरधृतवाक्यम् ।

प्रमापण न० प्र+मीञ्–हिंसायां स्वार्थे णिच्–आत्त्वे पुक् ल्युट् । मारणे अमरः ।

प्रमायुक त्रि०प्र +मी–ताच्छील्ये उकञ् । प्रमरणशीले "प्र.. चास्य प्रिय प्रमायुक भवति" छ०उ० । "प्रमायुक मरणशीलम्" भा० । [च जटा० । २परिमिते ।

प्रमित त्रि० प्र+मि–मी वा क्त । १ज्ञाते २प्रयथावधारिते

प्रमिताक्षरा स्त्री प्रमितानि परिमितानि अक्षराणि यस्याम् । सिद्धान्तशिरोमणि–व्याख्यानरूपायां टीकायां छन्दश्चिन्तामणिटीकाभेदे–न "प्रमिताक्षरा सजससैः

वर्णिता ६०८० वर्षे हाटखोलायाहते प्रकाशयमीरे।

प्रमिति स्त्री प्र+मि—मा—क्ति भा। प्रमाणे बचरा।

प्रमीढ त्रि प्र+मिह—क्त। मूत्रिते एवमे च मेदि।

प्रमीत त्रि प्र+मीव हिंसायां क्त। मृते मारीती विमटी मख इति अर्थि। एवमार्थे पुराणे ह बचरा।

प्रमीला स्त्री प्र+मील—भावे अ। तन्द्राय बचरा।

प्रमुख न प्रकृष्ट मुखमारम्भ। [illegible] प्रमुख एवमते एवमार्थे बचर [illegible] च त्रि मेदि [illegible] ह ब्रह्मरक। [illegible] ह बाहुच। यज्ञ। [illegible]। [illegible] त्रि।

प्रमुच ह [illegible] नात्मा ह पचा। प्रमुचि प्र+मुच—क। एवमर्थेन मोक्षरि त्रि।

प्रमुच वर्णिवेरे नात्मा [illegible] च।

प्रमुद् त्रि प्रकृष्टा मुद् यस्य। हर्षे एवमर्थेन बचरा। एवमेरे ह [illegible]। [illegible]। [illegible] स्त्री।

प्रमुदित त्रि प्र+मुद—कर्त्तरि क्त। हर्षे एवमर्थेन बचर।

प्रमुदितवदना स्त्री "प्रमुदितवदना यदौ च री ह र" वर्षे हाटखोलायाहते प्रणीते। [इन्दो भावे

प्रमृत त्रि प्र+मृ—क्त। [illegible] प्रमृत न प्रकृष्ट यथं माविनिर्विशे यव। [illegible] "प्रमृत मानिलं मैव प्रमर्थे कर्षं चरम् यह:। कर्षं च भूमिनाभुत्रावित एवमिविनाम् महाप्रकवं प्रवर्षेत महावित प्रम यद् इह।

प्रमेय त्रि प्र+मा—कर्मणि यत्। प्रमाणविषये पदार्थे। एवमेवोहे एवमर्थेन च। प्रम वैशाव मूलवैशम वेवम् [illegible] मात्रादिनवाखा मनिसर्वोषि न प्रत्याशवेवम्। [illegible] वा [illegible] कमाल प्रमेयम् स्त्री च यहा [illegible] च वैशानन्यवि ववैज्ञानोपत्यानवस्तुमात्रिलसम्।

प्रमेह ह प्र+मिह—भावादि घञ् वा घञ्। रोगभेदे प्रह यथमेहादिन भाव यस नया

[illegible] इमीति [illegible] न मानि। [illegible] प्रमेवेह [illegible] चरम्। देवन मावम् मरीरमम् क्रि [illegible] इदम्। वरीति वैशाव [illegible] तिन हरि यम्य मानि। मोचे [illegible]

[illegible] प्रमेहविधान [illegible]। [illegible] माविनाम [illegible] प्रवेशनं मेवेमत्। [illegible]। दृष्टा प्रमेहिका विनाशिते [illegible]। [illegible] मावित प्रमेहवत्। [illegible] प्रमेयवित [illegible]। [illegible] [illegible] [illegible]। [illegible] मेहे [illegible] प्रमेहवत्। [illegible]। [illegible] प्रमेयविवमिविनिवम्। [illegible] प्रमेहम्। [illegible]। [illegible] प्रमेहिनी [illegible]। [illegible] प्रमेहिनि। [illegible] प्रमेहिनम् [illegible]। [illegible] प्रमेहिनी प्रमेहिनि। [illegible] प्रमेहम्। [illegible] प्रमेहम्। [illegible] प्रमेहिनी [illegible] प्रमेहिनी [illegible]। [illegible] प्रमेहिनि [illegible]। [illegible] प्रमेहिनी [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible] मायेह प्रमेहम्। [illegible]। [illegible] भाव भाव भाव [illegible]। [illegible] प्रमेहि भावह। [illegible]। [illegible] वा [illegible]। [illegible] प्रमेहिनि [illegible] प्रमेही मानि री मवीवाद। [illegible] मानि [illegible]

चापि यदन्नपानात् । सर्वएव प्रमेहास्तु कालेनाप्रति कारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति च । मधुमेहो मधुनिभो जायते स किल द्विधा । क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथ वा । आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् । क्षीणः क्षणात् क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम् । मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति । सर्वेऽपि मधुमेहाख्यं माधुर्याच्च तनोः रतः । शराविकाकच्छपिका जालिनी विनताऽलजी । मसूरिका सर्षपिका पुत्रिणी सविदारिका । विद्रधि श्चेति पिडकाः प्रमेहोपेक्षया दश" ।

तद्रोगनिमित्तकर्मभेद शा॰ त॰ उक्तः । कर्मविपाकशब्दे १०७६ पृ॰ दृश्यम् । तत्र मधुमेहस्यैव महारोगभेद रूपता "मधुमेहप्रमन्दरी" इत्युक्तं ।

प्रमेहिन् पु॰ प्र+मिह–णिनि । प्रमेहरोगयुते ।

प्रमोचनी स्त्री प्रकर्षेण मुच्यते निःसार्यते मोचनार्थम् मुच–करणे ल्युट् ङीप् । १गोडुम्बायाम् (गोडुम्ब) रत्ना॰ २प्रमोचनसाधने त्रि । भावे ल्युट् । ३प्रकर्षेण मोचने न॰ ।

प्रमोद पु॰ प्र+मुद–हर्षे भावे घञ् । १हर्षे प्रियलाभनिमित्ते महद्धर्षे आनन्दशब्दे ०७८पृ॰ तैत्ति॰ उ॰ भाष्यवाक्यं दृश्यम् । गन्धो मोदो यस्य मा॰ व॰ । २प्रमोदयुते त्रि॰ ३ना- गभेदे पु॰ भा॰ आ॰ ५७ अ॰ । ४स्कन्दानुचरभेदे पु॰ भा॰ श॰ ४६ अ॰ । सा॰ त॰ कौ॰ उक्ते ५ तुष्टिसिद्धिभेदे "तिस्रः सिद्धयः प्रमोदमुदितमोदमाना" । तत्राध्यात्मिकदुःखविघातकं सर्वोत्कर्षेण हृष्टत्वात् प्रमोदाख्यं बोध्यम् । आधिभौतिकदुःखविघातस्य मोदाधारत्वात् मुदितत्वम् आधिदैविकदुःखविघातस्य मोदमानत्वं मोदस्य मान मानं यत्रेति व्युत्पत्त्येति विवेकः ।

प्रमोदन त्रि॰ प्रमोदयति प्र+मुद–णिच्–ल्यु । १हर्षकारके २विष्णौ पु॰ "जितामित्रः प्रमोदनः" विष्णुस॰ । भावे ल्युट् । ३हर्षसम्पादने न॰ । [४क्षुवके पु॰ शब्दमाला ।

प्रमोदित त्रि प्रमोदो जातोऽस्य तार॰ इतच् । १जातप्रमोदे

प्रमोदिन् त्रि॰ प्रमोदयति प्र+मुद–णिच्–णिनि । १प्रहर्ष जनके । स्त्रियां ङीप् । सा च २जिङ्गिनीवृक्षे भावप्र॰ ।

प्रमोहन न॰ प्रमुह्यतेऽनेन प्र+मुह–करणे ल्युट्, प्रमोहय त प्र+मुह+णिच्–ल्यु वा । १प्रमोहसाधने प्रमोहकारके २अस्त्रभेदे च यदस्त्रप्रयोगे विपक्षस्य प्रमोहो जायते तस्मिन्नस्त्रे । भा॰ भी॰ ७७ अ॰ । ३प्रमोहदायकमात्रे त्रि॰ ।

प्रम्लोचन्ती स्त्री प्रम्लोचति नरं प्रति आत्मानं दर्शयति प्र+म्लुच–शतृ–ङीप् । अप्सरोभेदे यजु॰ १५।१७

प्रम्लोचाऽस्त्री प्रम्लोचति नरं प्रत्यात्मानं दर्शयति प्र+म्लुच– अच् । अप्सरोभेदे गरुडपु॰ ६॰ अ॰ ।

प्रयज्यु त्रि॰ प्र+यज "यजिमनिशुन्धिदसिजनिभ्यो युच्" उणा॰ युच् निरनुनासिकत्वात् अनादेशो न । अध्वर्यौ उज्ज्व॰ मा॰ १।२९।६

प्रयत त्रि॰ प्र+यम–कर्त्तरि क्त । १पवित्रे शुचौ अमरः । प्र+ यत–अच् । २प्रयत्नविशिष्टे त्रि॰ । प्रपूर्वक यमेर्दानार्थ- कात् कर्मणि क्त । ३दत्ते च । "प्रयतदक्षिणम्" ऋ॰ १२।१४

प्रयत्न पु॰ प्र+यत–भावे नङ् । प्रयासे । स च न्यायमते त्रिविधः यथा "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकार- णम् । एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम् । चि- कीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा । उपादानस्य चा- ध्यक्षं प्रवृत्तौ जनकं भवेत् । निवृत्तिस्तु भवेद्द्वेषात् द्विष्ट- साधनताधियः । यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत् । शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्त्तितम्" भाषा॰ 'प्रयत्नस्तु फलाप्राप्तौ व्यापारोऽतित्वरान्वितः" सा॰ द॰ उक्ते २फलाप्तिविधिः प्रारब्धस्य कर्मणोऽवस्थापञ्चकान्तर्गते- ऽवस्थाभेदे ततोऽस्त्यर्थे मतुप् मस्य व । प्रयत्नवत् तद्युक्ते त्रि॰ स्त्रियां ङीप् ।

प्रयत्नशैथिल्य न॰ स्वाभाविकप्रयत्नोपरमपूर्वकप्रयत्नभेदे- तच्च योगाङ्गासनसिद्धिकारणं यथोक्तं "प्रयत्नशैथि ल्यानन्तसमापत्तिभ्याम्" पा॰ सू॰ "भवतीति शेषः प्रयत्नो परमात् सिध्यत्यासनं येन नाङ्गमेजयो भवति अनन्ते वा समापन्नं चित्तमासनं निर्वर्त्तयतीति" भा॰ "सा सिद्धिकोऽपि प्रयत्नः शरीरधारको न योगाङ्गस्योपदेष्ट- व्यासनस्य कारणं तस्य तत्कारणत्वे उपदेशवैयर्थ्यात् स्वरसत एव तत्सिद्धेः । तस्मादुपदेष्टव्यासनस्यायमसा- धकः विरोधी च स्वाभाविकः प्रयत्नः । तस्य च याद- च्छिकासननियततया आसननियमोपहन्तृत्वात् । तस्मादुपदिष्ट- नियमासनमभ्यस्यता स्वाभाविकप्रयत्नशैथिल्यात्मा प्रयत्न आस्थेयो नान्यथोपदिष्टमासनं सिध्यतीति स्वाभाविक प्रयत्नशैथिल्यमासनसिद्धिहेतुः अनन्ते वा नागनायके स्थि- रतरफणासहस्रविधृतविश्वम्भरामण्डले समापन्नं चित्त- मासनं निर्वर्त्तयतीति" विव॰ [१।५।११५ भाष्यम् ।

प्रयन्तृ त्रि॰ प्र+यम–तृच् प्रकर्षेण १नेतरि २दातरि च ऋ॰

प्रयस [illegible] प्र+यस–आधारे [illegible] ।
[illegible] ।
प्रयस्त [illegible] प्र+यस–आधारे [illegible] ।
[illegible] ।
प्रयाम [illegible]

[illegible]

[illegible]

कन्यानां दिव्यतेजसाम्॥ मध्ये नारीसहस्राणां बहूनाञ्च पतिर्भवेत्। दशग्रामसहस्राणां भर्त्ता भवति भूमिप। काञ्चीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते। अथ सन्ध्यावटे रम्ये ब्रह्मचारी जितेन्द्रियः। उपासीत शुचिः सन्ध्यां ब्रह्मलोकमवाप्नुयात्। कोटितीर्थं समासाद्य यस्तु प्राणान् परित्यजेत्। कोटिवर्षसहस्राणि स्वर्गलोके महीयते। ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः। सुवर्णमणिमुक्ताढ्ये कुले जायेत रूपवान्। ततो भोगवतीं गत्वा वासुकेरुत्तरेण तु। दशाश्वमेधिकं नाम तत्र तीर्थं परं भवेत्। कृताभिषेकस्तु नरो ह्यश्वमेधफलं लभेत्। धनाढ्यो रूपवान् दक्षो दाता भवति धार्म्मिकः। चतुर्वेदेषु यत् पुण्यं सत्यवादिषु यत्फलम्। अहिंसायाञ्च यो धर्म्मो गमनादेव तत् फलम्। तथैव मानसं नाम गङ्गाया दक्षिणे तटे। त्रिरात्रमुषितः स्नात्वा सर्व्वान् कामानवाप्नुयात्। पृथिव्यामासमुद्रायां महाभागः पतिर्भवेत्। षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च। माघे मासि गमिष्यन्ति गङ्गायमुनसङ्गमम्। गवां शतसहस्रस्य सम्यग्दत्तस्य यत् फलम्। प्रयागे माघमासे वै त्र्यहं स्नातस्य तत् फलम्। गङ्गायमुनयोर्मध्ये योऽग्नौ स्वाङ्गं परित्यजेत्। अहीनाङ्गोऽप्यरोगश्च पञ्चेन्द्रियसमन्वितः। यावन्ति रोमकूपाणि तस्याङ्गेषु च धीमतः। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। अनशनं यः कुर्य्यात् सङ्गमे लोकविश्रुते। राहुग्रस्तो यथा सोमो विमुक्तः सर्व्वपातकैः। सोमलोकमवाप्नोति सोमेन सह मोदते। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। स्वर्गलोकमवाप्नोति ऋषिगन्धर्व्वसेवितम्। परिभ्रष्टश्च राजेन्द्र! समृद्धे जायते कुले। अधःशिरास्तु यो ज्वालामूर्द्ध्वपादः पिबेन्नरः। शतं वर्षसहस्राणां स्वर्गलोके महीयते। परिभ्रष्टश्च राजेन्द्र! अग्निहोत्री भवेन्नरः। यस्तु देहं कर्त्तयित्वा शकुनिभ्यः प्रयच्छति। विहगैरुपभुक्तस्य शृणु तस्यापि यत् फलम्। शतं वर्षसहस्राणि सोमलोके महीयते। तस्मादपि परिभ्रष्टो राजा भवति धार्म्मिकः। यमुनोत्तरे कूले प्रयागस्य च दक्षिणे। ऋणप्रमोचनं नाम तत्तीर्थं परमं स्मृतम्। एकरात्रोषितः स्नात्वा ऋणैः सर्व्वैः प्रमुच्यते। अश्वमेधफलं तस्माद्गच्छतस्तु पदे पदे। पुरुषांस्तारयेद्राजन्! दश पूर्व्वान् दशापरान्। अतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्द्दश।

नरस्तारयते सर्व्वान् यस्तु प्राणान् परित्यजेत्। अश्रद्दधानाः पुरुषाः पापोपहतचेतसः। न प्राप्नुवन्ति तत् स्थानं प्रयागं देवरक्षितम्। अभावेन तु यस्येह तीर्थयात्रादिकं भवेत्। सर्व्वकामसमृद्धस्तु स्वर्गलोके महीयते। अग्नितीर्थमिति ख्यातं यमुनादक्षिणे तटे। उत्तरेण तु वक्ष्यामि आदित्यस्य महात्मनः। तीर्थं निरञ्जनं नाम यत्र देवाः सवासवाः। उपासते सदा सन्ध्यां नित्यकालं युधिष्ठिर!। गङ्गा च यमुना चैव उभे तुल्यफले स्मृते। केवलं ज्येष्ठभावेन गङ्गा सर्व्वत्र पूज्यते। नैमिषं पुष्करञ्चैव गोमतीं सिन्धुसागरम्। गयाञ्च धेनुकञ्चैव गङ्गासागरमेव च। एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः। दश कोटिसहस्राणि षष्टिकोट्यस्तथा पराः। प्रयागे संस्थिता नित्यमेवमाहुर्मनीषिणः। कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता। तस्माद्दशगुणा प्रोक्ता यत्र विन्ध्येन सङ्गता। तस्माच्छतगुणा प्रोक्ता काश्यामुत्तरवाहिनी। काश्याः शतगुणा प्रोक्ता गङ्गायमुनसङ्गमे। सहस्रगुणिता सापि भवेत् पश्चिमवाहिनी। सा राजन्! दर्शनादेव ब्रह्महत्यापहारिणी। पश्चिमाभिमुखी गङ्गा कालिन्द्या सह सङ्गता। हन्ति कल्पकृतं पापं सा माघे नृप! दुर्लभा। अमृतं कथ्यते राजन्! सा वेणी परिकीर्त्तिता। तस्यां माघे मुहूर्त्तन्तु देवानामपि दुर्लभम्। षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च। माघे मासि गमिष्यन्ति गङ्गायमुनसङ्गमम्। ब्रह्मविष्णुमहादेवरुद्रादित्यमरुद्गणाः। गन्धर्व्वा लोकपालाश्च यक्षकिन्नरगुह्यकाः। अणिमादिगुणैः सिद्धा ये चान्ये तत्त्वदर्शिनः। ब्रह्माणी पार्व्वती लक्ष्मीः शची मेधावती रतिः। सर्व्वास्ता देवपत्न्यश्च तथा नागाङ्गना नृप!। घृताची मेनका रम्भा उर्व्वशी च तिलोत्तमा। गणाश्चाप्सरसां तद्वत् पितॄणाञ्च गणाश्च ये। स्नातुमायान्ति ते सर्व्वे माघे वेण्यां नराधिप!। कृते युगे स्वरूपेण कलौ प्रच्छन्नरूपिणः। सर्व्वतीर्थानि रूपाणि पापिनां सङ्कटोपमः। भवन्ति शुक्लवर्णानि प्रयागे माघमज्जनात्। स्वर्णभारसहस्रेण कुरुक्षेत्रे रविग्रहे। यत् फलं लभते माघे वेण्यां तच्च दिने दिने। शततोयघटाभिस्तु न तत् प्राप्नोति मानवः। यत् फलं समवाप्नोति वेण्यां स्नानाच्च मानवः। प्रयागे माघमासे तु यस्त्र्यहं स्नाति मानवः। पापं त्यक्त्वा दिवं याति जीर्णां त्वचमिवोरगः। प्रयागे माघमासे तु त्र्यहं स्नातस्य यद्भवेत्।

[illegible]

[illegible] दृति [illegible] ।

प्रयागभव [illegible]

प्रयागवेतृ [illegible]

प्रयाग [illegible]

[illegible]

प्रयाच न [illegible]

प्रयात [illegible]

प्रयाम [illegible]

प्रयाम [illegible]

श्रेमच०। प्रयस्यतेऽनेन करणे घञ्। ४व्यविद्यादिषु पञ्चसु क्लेशदायकेषु। [युते छ० ८।१६।१०

प्रयु त्रि० प्र+या–बा० कु दित्वे अभ्यासस्यात् इत्वम्। प्रयाण

प्रयुक्त त्रि० प्र+युज–क्त। १प्रकर्षेण संयोगयुक्ते २प्रेरिते ३प्रयोज्ये परम्परया कार्ये च। तस्य भाव प्रयुक्तत्व तद्भावे न०। स च स्वरूपसम्बन्धभेद कारणाभावेन कार्याभाव इत्यादिप्रतीतिसिद्ध गौ०छ०। तद्यथा गौ०छ० ।।।।। "उक्तौ प्रयोज्यत्व प्रयोजकत्व वा प्रयुक्तत्वं दण्डाभावात् घटाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्"।

प्रयुक्ति स्त्री प्र+युज–भावे क्तिन्। १प्रयोगे २शब्दोच्चारणभेदे "स्तुतस्य राजमातङ्गा इति न स्तु प्रयुक्तय" सा० दारिद्रा ३प्रेरणे मा०भ०। ४प्रकृष्टायां युक्तौ च।

प्रयुत न० १दशलक्षसंख्यायां २तत्संख्याते च "नवप्रयुतकोटय" क्रमश इति लीला०। ३प्रकर्षेण युते त्रि०।

प्रयुति स्त्री प्र+यु–भावे क्तिन्। १प्रकर्षेण योगे २प्रयोगे ऋ० १।१२७।११

प्रयुतेश्वर ह० तीर्थभेदे स्कन्दपु०।

प्रयोक्तृ त्रि० प्र+युज–तृच्। १प्रयोगकर्त्तरि २ऋणदानादौ धनप्रयोगकर्त्तरि उत्तमर्णे ३प्रयोजकमात्रे च अमर।

प्रयोग पु० प्र+युज–भावकर्मकरणेषु यथायथं घञ् कुत्वम्। १अनुष्ठाने २शब्दादीनामुच्चारणभेदे ३वशीकरणाद्युपाये कार्मणे कर्मणि। ४घोटके च मेदि०। प्रयोगैर्निर्वृत्त ठञ्। अनुमति० हिन्दद्दि। प्रायोगिक प्रयोगसाध्ये त्रि० स्त्रियां ङीप्। तत्र वाक्योच्चारण च अनुमानाद्युपायावयववाक्योच्चारण यथा "बलाय प्रयोग पर्वतो वह्निमान् धूमादित्यादि" यथायोग सन्निष्याद्युक्तत्वमो-च्चारण प्रयोग इति प्राज्ञिका। यज्ञादिक्रियाकलापेति कर्त्तव्यताबोधकार्य शब्दस्य प्रतिपादन पदप्रयोगात्मा ६यथा इति याज्ञिका। भूतप्रेताद्युच्चाटनादिसाधने मन्त्रोच्चारणभेदे तान्त्रिका। ६नाट्यादिप्रदर्शने प्रयोगा ७वाचकयोर्बन्धने क्रियाभेदे इत्यालङ्कारिका।

प्रयोगविधि पु० प्रयोगप्रापकोविधि मा०न०। प्रयोगप्रापके विधिभेदे मङ्गलादि कौमादि० उक्तं यथा "प्रयोगप्राशुभावबोधको विधि प्रयोगविधि। स चाङ्गवाक्यैकवाक्यतापन्न प्रधानविधिरेव। स हि साङ्गस्य प्रधानस्य विधत्ते प्रयोगप्राशुभावप्रत्यायकत्वेन प्रयोगप्राशुभाव विधत्ते। स च तदविलम्बेऽपि यथा

भाव इति साध्य विलम्बे ह्यङ्गप्रधानविध्येकवाक्यता नगततद्साहित्यानुपपत्ति विलम्बेन क्रियमाणयो पदार्थयोः इदमनेन सह कृतमिति साहित्यव्यवहाराभावात्। स चाविलम्बो नियते क्रमे व्याश्रीयमाणे भवति। अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तर वेति प्रयोगविक्षेपापत्ते। अत प्रयोगविधिरेव स्वविधेय प्रयोगप्राशुभाव सिद्ध्य नियत क्रममपि पदार्थविशेषण तया विधत्ते। अतएवाङ्गानां क्रमबोधको विधि प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमोनाम विततिविशेष पौर्वापर्यरूपो वा। तत्र षट् प्रमाणानि। श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि। क्रमप्रापकहेतवश्च क्रमशब्दे २२६० पृष्ठादावुक्ता।

प्रयोगातिशय पु सा०द० नाटकाङ्गप्रस्तावनाभेदे "यदि प्रयोग एकस्मिन् प्रयोगोऽन्य प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा"। यथा कुन्दमालायाम् "नेपथ्ये इतोऽवतरत्वार्या। सूत्रधार। कोऽयं खलु आर्याह्वानेन साहायक मे सम्पादयति। विलोक्य। कष्टमतिकरुण वर्त्तते। लङ्केश्वरस्य भवने सुचिर स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासिता जनपदादपि गर्भगुर्वी सीता वनाय परिकर्षति लक्ष्मणोऽयम्"। अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानमिच्छता सूत्रधारेण सीता वनाय परिकर्षति लक्ष्मणोऽयमिति सीतालक्ष्मणयो प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोग प्रयोजित"।

प्रयोगार्थ पु० प्रयोगस्यार्थम् "चर्यैनमष्ट नियमनाशीविभक्त्र बोधय" मार्त्ति०म०प्रयोगोऽर्थ प्रयोजनमस्य वा। प्रधानप्रयोगानुष्ठानानुकूले व्यापारभेदे मल्लुतकने अमर।

प्रयोगिन् त्रि० प्र+युज–घिनुण्। प्रयोगकर्त्तरि।

प्रयोग्य त्रि०प्रयुज्यते प्रयुज–कर्मणि ण्यत्। १प्रयोज्ये २अश्वे च "यथा प्रयोग्य प्राचरथे(रथे)नियुज्य" दा०भ०भाष्यम्।

प्रयोजक त्रि०कार्यादौभृत्यादीन् प्रयुनक्ति प्र+युज–ण्वुल्। निदेशकर्त्तरि १प्रेरके व्याकरणोक्ते हेतुरूपे २कर्त्तरि च। "तत्प्रयोजकोहेतुश्च" पा० तस्य लक्षणादि हरि०दि०। प्रयोजकत्व तत्त्व मा०वि० निर्णीत यथा "तत्रास्यापारवत्त्वेन सन्निपादक कर्त्ता, य कर्त्तारं कारयति स प्रयोजक। सोऽपि द्विविध एक प्रयोजक परा... देवताद्विता अर्थ दर्शयति अपर पुनरेव प्रयोजकोऽर्थादिना प्रोत्साहयति"।

[illegible]

प्रयोजन न. [illegible] प्र+युज–[illegible] । [illegible]

[illegible] प्र+युज–[illegible] । [illegible]

[illegible] [[illegible]]

[illegible] प्र+[illegible] । [illegible]

[illegible]

[illegible] प्र+[illegible] । [illegible]

[illegible] प्र+[illegible] । [illegible]

[illegible]

क्षीरोदसिन्धौ समागतः। चतुर्युगसहस्रान्ते सम्प्राप्ते प्रतिसञ्चरे। आत्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः। ततो भवत्यनावृष्टिस्तीव्रा सा शतवार्षिकी। भूतक्षयकरी घोरा सर्व्वभूतभयङ्करी। ततो यान्यल्पसाराणि सत्त्वानि पृथिवीतले। तानि चादौ प्रलीयन्ते भूमित्वमुपयान्ति च। सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः। असह्यरश्मिर्भवति पिबन्नम्भो गभस्तिभिः। तस्य ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे। तेनाहारेण ते सूर्य्या दीप्ताः सप्त भवन्ति हि। ततस्ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्द्दिशम्। चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा। व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वञ्चाधश्च रश्मिभिः। दीप्यन्ते भास्कराः सप्त युगान्ताग्निप्रतापिनः। ते सूर्य्या वारिणा दीप्ता बहुसाहस्ररश्मयः। खं समावृत्य तिष्ठन्ति निर्द्दहन्तो वसुन्धराम्। ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा। साद्रिनद्यर्णवद्वीपा निःस्नेहा समपद्यत। दीप्ताभिः सन्तताभिश्च ज्वालाभिश्च समावृतः। अधश्चोर्द्ध्वञ्च तिर्य्यक् च समावृत्य उपप्लुवः। सूर्य्याग्निना प्रमृष्टानां संसृष्टानां परस्परम्। एकत्वमुपयातानामेकज्वालो भवेत् प्रभुः। सर्व्वलोकप्रणाशश्च सोऽग्निर्भूत्वा तु मण्डली। चतुर्लोकमिदं कृत्स्नं निर्द्दहत्यात्मतेजसा। ततः प्रलीने सर्व्वस्मिन् जङ्गमे स्थावरे तथा। निर्व्वृक्षा निस्तृणा भूमिः कूर्म्मपृष्ठे प्रकाशते। अम्बरीषमिवाभाति सर्व्वमापूरितं जगत्। सर्व्वमेव तदर्च्चिर्भिः पूर्णं जाज्वल्यते नभः। पाताले यानि सत्त्वानि महोदधिगतानि च। ततस्तानि प्रलीयन्ते भूमित्वमुपयान्ति वै। द्वीपांश्च पर्व्वतांश्चैव वर्षाण्यथ महोदधीन्। तान् सर्व्वान् भस्मसात् कृत्वा सप्तात्मा पावकः प्रभुः। समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः। पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत्। ततः संवर्त्तकः शैलानतिक्रम्य महांस्तथा। लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः। स दग्ध्वा पृथिवीं देवो रसातलमशोषयत्। अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्ध्वं दहिष्यति। योजनानां शतानीह सहस्राण्ययुतानि च। उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्त्तकस्य च। गन्धर्व्वांश्च पिशाचांश्च सयक्षोरगराक्षसान्। तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः। भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः। दहेदशेषं कालाग्निः कालो विश्वतनुः स्वयम्। व्याप्तेषु तेषु

लोकेषु तिर्य्यगूर्द्ध्वं यथाग्निना। तत् तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः। अयोगुडनिभं सर्व्वं तदा चैकं प्रकाशते। ततो गजकुलोन्नादास्तडिद्भिः समलङ्कृताः। उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः। केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः। धूम्रवर्णास्तथा केचित् केचित् पीताः पयोधराः। केचिद्रासभवर्णाभा लाक्षारसनिभास्तथा। शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे। मनःशिलाभास्त्वन्ये कपोतसदृशाः परे। केचित् इन्द्रायुधवर्णाभास्तथान्ये घोरसन्निभाः। तथा कर्बूरवर्णाभा भिन्नाञ्जननिभास्तथा। इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा। चाषपत्रनिभाः केचिदुत्तिष्ठन्ति घना दिवि। केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः। कूटागारनिभाश्चान्ये केचिन्मीनकुलोद्वहाः। बहुरूपा घोररूपा घोरस्वरनिनादिनः। तदा जलधराः सर्व्वे पूरयन्ति नभःस्थलम्। ततस्ते जलदा घोरा वारिणा भास्करात्मजाः। सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत। ततस्ते जलदा वर्षं मुञ्चन्तीह महौघवत्। सुघोरमशिवं सर्व्वं नाशयन्ति च पावकम्। प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल। अद्भिस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः। नष्टे चाग्नौ वर्षशतैः पयोदाः क्षयसम्भवाः। प्लावयन्तोऽथ भुवनं महाजलपरिस्रवैः। धाराभिः पूरयन्तीदं चोद्यमानाः स्वयम्भुवा। अत्यन्तः सलिलौघैश्च वेला इव महोदधेः। साद्रिद्वीपा तथा पृथ्वी जलैः संछाद्यते शनैः। आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति। पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः। ततः समुद्राः स्वां वेलामतिक्रान्तास्तु कृत्स्नशः। पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति। तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे। योगनिद्रां समास्थाय शेते देवः प्रजापतिः। चतुर्युगसहस्रान्तं कल्पमाहुर्महर्षयः। वाराहो वर्त्तते कल्पो यस्य विस्तार ईरितः। असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः। कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः। सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः। तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः। योऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः। अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः। ध्यानं तपस्तथा ज्ञानं लब्ध्वा तेष्वेव योगिनः। आराध्य गिरिशं मह्यं यान्ति तत् परम

[illegible]

ज्ञानं दीपवदिन्द्रियोद्भवम्। यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे! विवेकजम्। मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम!। तदेतच्छ्रूयतामत्र साधु मे गदतो मम। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। द्वे विद्ये वेदितव्ये वै इति चाथर्वणी श्रुतिः। परया त्वक्षरप्राप्तिरृग्वेदादिमयाऽपरा। यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्। अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्। विभु सर्वगतं नित्यं भूतयोनिमकारणम्। व्याप्यव्याप्यं यतः सर्वं तं वै पश्यन्ति सूरयः। तद्ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम्। श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्। तदेव भगवद्वाच्यं स्वरूपं परमात्मनः। वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः। एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः। ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्। अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!। पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः। शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते। मैत्रेय! भगवच्छब्दः सर्वकारणकारणे। सर्वाणि तत्र भूतानि वसन्ति परमात्मनि। भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः। खाण्डिक्य जनकायाह पृष्टः केशिध्वजः पुरा। नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः। भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत्। धाता विधाता जगतां वासुदेवस्ततः प्रभुः। स सर्वभूतप्रकृतिर्विकारगुणांश्च दोषांश्च मुने! व्यतीतः। अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तरालम्। समस्तकल्याणगुणात्मको हि स्वशक्तिलेशावृतभूतसर्गः। इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ। तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः। परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे। स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकटस्वरूपः। सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः। संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम्। संदृश्यते वाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्॥" इति विष्णुपु०। "नारद उवाच। सत्यं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्। दिनमेकयुगं तत्र तस्य या चैकसप्ततिः। मन्वन्तरन्तु तज्ज्ञेयं ते च यत्र चतुर्दश। स कल्पो नाम वै [illegible] दः। सा ब्राह्मी राजेन्द्र! यत्र देवोऽम्बु-जासनः। तयोरंशात्तदा राजन्! क्षीयन्ते तन्निमित्ततः। नैमित्तिको लयो नाम दैनन्दिन इतीर्य्यते। एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम्। आयुः पूर्व्वपरार्द्धञ्च परार्द्धं द्वे प्रकीर्त्तिते। द्विपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः। तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप!। अयं प्राकृतिको ह्येष क्षीणे ब्रह्मणि भूपते!। ब्रह्माण्डकोषोऽपि सकलः प्रलयं याति सर्व्वशः। पूर्व्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते!॥ शतवर्षाणि भूमौ हि पर्ज्जन्यो नैव वर्षति। दुर्भिक्षे निर्जले घोरे प्रजाः सर्व्वाः क्षुधार्दिताः। परस्परं भक्षमाणाः क्षयं यास्यन्ति भूमिप!॥ समुद्रे च सरस्सु च हृदेषु च सरित्सु च। देहे च यो रसस्तं हि रविर्हरति रश्मिभिः। तत्र संवर्त्तको नाम ज्वालामाली हुताशनः। सङ्कर्षणमुखोद्भूतो दहत्यनिलसारथिः। सर्वं ब्रह्माण्डभाण्डं वै तत्कटाहस्योपगर्जितः। एवं दग्ध्वा महाराज! पञ्चकोश्यां समन्ततः। दग्ध्वा गोमयपिण्डाभं ब्रह्माण्डं भासवर्जितम्। प्रचण्डः पवनो राजंस्ततो वर्षशतं पुनः। संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति। ततो मेघा महाघोरा नानावर्णा अनेकशः। शत वर्षाणि वर्षन्ति गर्जन्ति च महास्वनाः। एकोदकं ततो विश्वं निर्गुणं निर्विकारकम्। भूमेर्गन्धगुणं राजन्! ग्रसन्त्यापः समन्ततः। गुणभावात् स्वयं पृथ्वी प्रलयं प्राप्यते तदा। तेजस्त्वपां रसगुणं ग्रसन्त्व ग्रसते यदा। तत्र प्रलयमायान्ति राजन्नापोऽपि तद्गुणात्। तेजसस्तु ततो रूपं रसगन्धसमन्वितम्। वायुर्हरति सप्तात्मा, तेजः प्रलयमृच्छति। आकाशस्तु ततो वायुं स्पर्शं परगुणैः सह। समादत्ते महाराज!। अम्बरेऽथ प्रलीयते। आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम्। अहङ्कारः समादत्ते महत्यस्मिन् प्रलीयते। तैजसे त्विन्द्रियाण्यत्र देवा वैकारिकास्तथा। अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम्। अहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः। ग्रसते तान् महाराज! आद्या प्रकृतिरुच्यते। न तस्याः कालदोषेण परिणामो नरर्षभ!॥ आद्यन्तरहिता सा हि नित्या कारणमव्ययम्। शक्तिर्भगवतः सा हि तदेकपरमा च सा। इत्युक्तः प्रलयो राजन्! विश्वस्यास्य महामते!॥ यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा॥" स च प्रलयो न्यायादिमते द्विविधः खण्डप्रलयो महा-

।८।२ भाष्ये दृश्यम्। तत्र टास्थाने "सुपांसुलोप" इत्यादिना पा० सात्। अतो नोपधालोप इति बोध्यम्।

[प्र]यम न० प्र+यम–गतौ भावे ल्युट्। १प्रकर्षेण २गमने करणे ल्युट्। ३प्रतोदे हेमच०। [२पुराणे निघण्टुः

[प्र]यस् त्रि० प्रकृष्टं वयोऽस्य। १वृद्धे स्थविरे हेमच०।

[प्र]य्या स्त्री प्र+वि–यत् "भय्यप्रवय्ये छन्दसि" पा०। प्रकर्षेण गतियुतायां स्त्रियां स्त्रियामेवास्य निपातः पुंसि कर्मणि तु यत् प्रवेय इति सि०कौ०।

[प्र]वर पु० प्र+वृ–अप्। १सन्ततौ २गोत्रे गोत्रप्रवर्तकमुनिव्यावर्तके ३मुनिभेदे च। ४श्रेष्ठे त्रि० ५अगुरुचन्दने न० मेदि०। गोत्रभेदे गोत्रप्रवर्तकमुनिगणाश्च चार्थशब्दे ८।१४प० दृश्याः। तदधिक प्रवराध्यायादौ दृश्यम्।

[प्र]वरललित न० "यमौ न सौ रौग प्रवरललितं नाम वो–ध्यम्" वृ०र० टीकोक्ते षोडशाक्षरपादके छन्दोभेदे।

[प्र]वरवाहन पु० द्वि०व०। प्रवरं वाहनं ययोः। अश्विनी कुमारयोः हेमच०।

प्रवर्ग पु० प्रवृज्यतेऽसौ प्र+वृज–घञ्। १विष्णौ हरिव० ४० अ०। २प्रवर्ग्ये महावीरे हेमच०। तत्र प्रवर्ग्यं इत्येव पाठो न्याय्यः।

प्रवर्ग्य पु० प्र+वृज–कर्मणि ण्यत् कुत्वम्। १महावीरे तत्प्रकार कात्या० श्रौ० २६अ० प्रवर्ग्याध्याये दृश्यम्। अस्त्यर्थे मतुप्। प्रवर्ग्यवत्। २तद्युते ३यज्ञभेदे पु० शत०ब्रा० १४।१

प्रवर्त्तक त्रि० प्रवर्त्तयति प्र+वृत–णिच् ण्वुल्। प्रवृत्तिजनके "मत्प्रवृत्तिविषयतत्सुखादीष्टसाधनत्वे सति कृतिसाध्यताविषयकं ज्ञानम् इष्टसाधनताविषयकं कृतिसाध्यताज्ञानं वा प्रवर्त्तकमिति जरन्नैयायिकाः। यथा वा प्वदिशेष वचनामतिसन्धानजन्यं कार्यताज्ञानं प्रवर्त्तकमिति गुरवः। "चोदनेति क्रियायाः प्रवर्त्तकं वचनम्" चोदनासूत्रे शबरभाष्यम् "क्रियाया नियोगस्य ज्ञानद्वारा प्रवर्त्तकं वाक्यं चोदनेत्यर्थः।

प्रवर्त्तना स्त्री प्र+वृत–णिच्–युच्। प्रवृत्तिजनकव्यापारे विध्यादौ "अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि" इति भर्तृहरिः। भावे ल्युट् तत्रार्थे आरम्भे च न०।

प्रवर्त्तित्र् पु० १मुनके २पितृसेवनके च विश्व।

प्रवसु पु० इक्ष्वाकुपुत्रे इवलम्भातरि न्पभेदे भा०आ०९४अ०।

प्रवह पु० प्र+वह–अच्। "यस्मात् ज्योतींषि वहति प्रवहस्तेन कीर्त्तितः" इत्युक्ते १वायुभेदे। भावे अप्। २नगरादुद्वहिर्गमने

प्रवहण न० प्र+वह–करणे ल्युट्। १मनुष्ययाने २वस्त्राच्छादिते स्त्रीयाने कर्णीरथे (महाफा) अमरः।

प्रवह्लि स्त्री प्रवल्ह्–इ–पृषो० अन्त्यादि०वर्णव्यत्यासश्च। प्रहेलिकाया भरत वा ङीप् तत्रार्थे स्वार्थे क। तत्रार्थे अम०

प्रवा पु० प्रकर्षेण वाति गच्छति वा–क्विप्। अश्वे यजु० १५।६ वेददी०।

प्रवाच् त्रि० प्रकृष्टा वाक् यस्य। युक्तियुक्तवाक्यवक्तरि जटा०।

प्रवाणी स्त्री प्र+वे–ल्युट् ङीप्। १तन्तुवायशलाकायाम् (माकु) निष्क्रान्ता प्रवाण्याः निरा०स० गौणत्वे प्रवाणिशब्दस्य ह्रस्वे सम्भवति भरतेन यत् षाणिशब्दस्यापि ह्रस्वान्तत्व कल्पितं तच्चिन्त्यम्।

प्रवात त्रि० प्रकृष्टो वातो यत्र। १सुगन्धिवातयुक्ते देशादौ प्र+वा–क्त। २भिन्ने प्रवणे च प्रवातैलम्शब्दे दृश्यम्।

प्रवाल त्रि० प्रकर्षेण वाति प्र+वा–शह। १प्रकृष्टगतियुते २प्राणे पु० "ताथा वै प्रवान्" शत०ब्रा० १४।२

प्रवातेजस् त्रि०प्रवात प्रवण तेज ओजो यस्य। प्रवाततेजसि निरु० ६।८ [लोकवादे १परस्परकथोपकथने च।

प्रवाद पु०प्र+वद–घञ्। १परम्परागतवाक्ये लोकेषु २प्रसिद्धे

प्रवादिन् त्रि० प्र+वद–ताच्छील्ये णिनि। परस्परकथनकारके स्त्रियां ङीप्।

प्रवार पु० प्र+वृ–आच्छादने करणे घञ्। आच्छादने वस्त्रे विभाषेत्यनुवर्तनात् अपि प्रवर तत्रार्थे सि०कौ०।

प्रवारण न प्र+वृ–णिच् ल्युट्। १काम्यदाने २काम्यस्य प्रशस्तवस्तुनो दाने च अमर। ३प्रकर्षेण वारणे मेदि०। ४महादाने त्रिका०तस्य प्रशस्तवस्तुनो दानरूपत्वात्तथात्वम्

प्रवास पु० प्रस्थितस्य वास। गृहात् प्रस्थितस्य भिन्नदेशे वासे चिरप्रवासगतस्य पुनरनागतस्य वार्त्ताद्यश्रवणे कालविशेषे तस्य प्रेतत्वावधारणसूक्तं ति०त० "सन्देहे त्वाह यम "गतस्य न भवेत् वार्त्ता यावत् द्वादशवार्षिकी। प्रेतावधारणं तस्य कर्त्तव्यं सुतबान्धवैः। यन्मासि यद्दिने यातस्तन्मासि तद्दहे क्रिया। दिनाज्ञाने कृष्णपक्षे आषाढस्याथ वा कुहूः"। नि सि छन्दोग "प्रोषितश्च तथा कालो गतश्चेद्द्वादशाब्दिकः। प्राप्ते त्रयोदशे वर्षे प्रेतकार्य्याणि कारयेत्"। वृहस्पति "यस्य न श्रूयते वार्त्ता यावद्द्वादश वत्सरान्। कुशपुत्तलदाहेन तस्य स्यादवधारणा"। भविष्ये "पितरि प्रोषिते यस्य न वार्त्ता नैव चागमः। ऊर्द्ध्वं पञ्चदशाब्दात् कृत्वा तत्प्रतिरूपकम्। कुर्य्यात्तस्य तु संस्कारं यथोक्तविधिना

[illegible]

प्रभाविन् त्रि० [illegible]

प्रभाषी स्त्री० [illegible]

प्रभाष पु० [illegible]

प्रभिव्याहति स्त्री० प्र+वि+आ+ह [illegible]

प्रभिदारण न० [illegible]

प्रभिदर न० [illegible]

प्रभिद्रेय त्रि० [illegible]

प्रभिषा स्त्री० [illegible]

प्रभिष त्रि० [illegible]

प्रभीष त्रि० [illegible]

प्रभीर पु० [illegible]

प्रभीरवाह पु० [illegible]

प्रभुवाणीय पु० [illegible]

प्रभूत न० [illegible]

प्रभूतयौवन पु० [illegible]

प्रभूत त्रि० [illegible]

प्रभूतव न० [illegible]

प्रभासन न० प्र+भस–णिच्–भावे ल्युट् [illegible]

प्रभासिन् त्रि० प्र+भस–णिनि [illegible]

प्रभास्थ त्रि० [illegible]

प्रभाष पु० प्र+भष–घञ् [illegible]

प्रभाष्य त्रि० प्र+भष–ण्यत् [illegible]

प्रभाषुक पु० [illegible]

प्रभाष्मिका स्त्री० [illegible]

क्रम" ह॰र॰ उक्ते वैतालीयप्रकरणीये मात्राहृत्तभेदे।

प्रवृत्तचक्र पु॰ प्रवृत्त स्वाज्ञानुसारेण चक्रं राष्ट्रादि यस्य। राष्ट्रादिष्वप्रतिहताज्ञे "प्रवृत्तचक्रतां चैव चाधिपत्यं प्रभुता तथा" याज्ञ॰ व्या॰ मिताक्षरा।

प्रवृत्ति स्त्री प्र+वृत–क्तिन्। १प्रवाहे २वार्त्तायाम् ३वृत्त्यादिदेशे मेदि॰ ४हस्तिमदे हेमच॰। ५न्यायोक्ते चिकीर्षाकृतिसाध्यताज्ञानाधीने ६प्रयत्नभेदे च प्रयत्नशब्दे दृश्यम्। "चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं मतम्" भाषा॰। "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" गौत॰सू॰ "एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चासत्येर्ष्यामायालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति वाचाऽनृतपरुषसूचनासम्बद्धानि, मनसा परद्रोहं परद्रव्याभीप्सा नास्तिक्यञ्चेति सेयं पापात्मिकाऽधर्माय अथ शुभा शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्चेति मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्माय। अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ। यथा अन्नसाधनाः प्राणाः, अन्नं वै प्राणिनः प्राणा इति। सेयं कुत्सितस्याभिपूजितस्य च जन्मनः कारणम्" भाष्यम्। "प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः" गौ॰ सू॰ "प्रवृत्तिदोषजनितोऽर्थः फलम्" गौ॰सू॰ "प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्" कणा॰। "प्रत्यगात्मनीति स्वात्मनीत्यर्थः इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ ताभ्याञ्च हिताहितप्राप्तिपरिहारफलके शरीरकर्मणी चेष्टाख्ये जन्येते तथा च परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्य आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मनोऽनुमानम्" उप॰ह॰। "इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्ति" गौ॰सू॰ "विहितकर्मणि रागनिबन्धना निषिद्धे कर्मणि हिंसादौ द्वेषनिबन्धना प्रवृत्तिः। तत्र रागनिबन्धना यागादौ प्रवृत्तिर्धर्मं प्रसूते द्वेषनिबन्धना हिंसादौ प्रवृत्तिरधर्मम्। तावतो रागद्वेषौ संसारमनुवर्त्तयत" वात्स्या॰। प्रवृत्तिश्च द्वयी। कारणरूपा कार्य्यरूपा च। तत्राद्या यत्नत्वजातिमती प्रत्यक्षसिद्धा। द्वितीया तु धर्माधर्मरूपा यागादरातस्यागमनादेव चिरध्वस्तस्य व्यापारतया कर्मनाशाग्नलस्पर्शादेः प्रायश्चित्तादेश्च नाश्यतया सिध्यतीति। (गौ॰ह॰ ४।१) भट्टमते प्रवृत्तिर्द्वेधा। स्वेच्छाधीना परप्रेरणाजन्या। तत्राद्याया प्रवर्त्तनाया अनुपयोगोऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका। यथा आचार्य्यप्रेरणयेदं करोमीति" दि॰क॰। ७शब्दानामर्थबोधनशक्तिभेदे "प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी" कुमा॰। द्रव्यस्वविषये इन्द्रियादीनां सञ्चारे च। [भिन्ने २चरभेदे पु॰ त्रिका॰।

प्रवृत्तिज्ञ त्रि॰प्रवृत्तिं वृत्तान्तं जानाति ज्ञा–क। १वृत्तान्त-

प्रवृत्तिनिमित्त न॰ ६त॰। १शब्दानां बोधनशक्तेर्निमित्ते शक्यतावच्छेदके। यथा घटशब्दस्य प्रवृत्तिनिमित्तं घटत्वमेव शुक्लादिशब्दस्य शुक्लत्वं पाचकादेः पाक इत्यादि तत्तत्गुणक्रियादि। "अङ्कितो गृहमते जातौ गुणद्रव्यक्रियासु च" काव्यप्र॰।

प्रवृद्ध त्रि॰ प्र+वृध–क्त। १वृद्धियुक्ते २प्रौढे च हेमच॰।

प्रवृद्धादि न॰ उत्तरपदस्थान्तोदात्तत्वनिमित्ते शब्दगणे स च गणः पा॰ग॰ उक्तो यथा "प्रवृद्ध प्रयुत अवहित अनवहित व्यूढ कविशस्त. आकृतिगण"।

प्रवेक त्रि॰ प्र+विच–कर्मणि घञ्। प्रधाने अमर।

प्रवेट पु॰ प्र+वी–ट। यवे त्रिका॰।

प्रवेणि(णी) स्त्री प्र+वेण–इन् वा ङीप्। १गजस्कन्धस्थकुथे २पत्रकम्बले २वेण्यां जलादिप्रवाहे च मेदि॰।

प्रवेल पु॰ प्र+वेल–अच्। पीतमुद्गे (सोनामुग) हेमच॰।

प्रवेश पु॰ प्र+विश–घञ्। अन्तर्गमने हेमच॰।

प्रवेशक त्रि॰ प्रविशति प्र+विश–ण्वुल्। १प्रवेष्टरि नान्दि धा॰द॰ उक्ते अर्थोपक्षेपके २रूपकाङ्गभेदे "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ" इत्युपक्रमे "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा"। अङ्कद्वयान्तरित्युक्ते प्रथमाङ्के चरमाङ्के चास्य प्रतिषेधः। यथा वेण्यामश्वत्थामाङ्के राक्षसमिथुनप्रयोजित" एवमन्यत्रापि।

प्रवेशन न प्रविश्यतेऽनेन प्र+विश–करणे ल्युट्। १प्रधानद्वारे २सिंहद्वारे च। भावे ल्युट्। ३प्रवेशे हेमच॰। प्र+विश+णिच्–ल्युट्। ४प्रवेशसम्पादने। प्रवेशन प्रयोजनमस्य छ। प्रवेशनीय प्रवेशसाधने त्रि॰।

प्रवेष्ट पु॰ प्र+वेष्ट–घञ्। १बाहौ अमर २बाहुनीचभागे शब्दच॰ ३एकदिग्दन्तमांसे हारा॰। ४गजपृष्ठस्थाने त्रिका॰स्वार्थे प्रायस्त्वे क। प्रवेष्टक दक्षिणबाहौ "प्रविश्य

[illegible]

प्रमत्त त्रि [illegible]

प्रमाथ पु [illegible]

प्रमाण न [illegible]

प्रमित पु प्र+मा—क्त [illegible]

प्रमेया स्त्री [illegible]

प्रमादवसित पु [illegible]

प्रमाद पु प्र+मद—घञ् [illegible]

प्रमोदन न प्र+मुद—णिच् ल्युट् [illegible]

प्रमोदा स्त्री प्र+मुद—णिच् [illegible]

प्रमोदोपमा स्त्री [illegible]

[illegible]

प्रयतन् [illegible]

प्रयस पु प्र+यस—घञ् [illegible]

प्रयसन न प्र+यस—णिच्—ल्युट् [illegible]

प्रयस्त त्रि प्र+यस—क्त [illegible]

प्रयस्ताद्रि पु [illegible]

प्रयस्ति स्त्री प्र+यस—क्तिन् [illegible]

प्रयाग स्त्री [illegible]

प्रयाणा स्त्री [illegible]

प्रयाण [illegible]

प्रयासन न प्र+यास—ल्युट् [illegible]

प्रयास पु [illegible]

प्रयाज त्रि [illegible]

प्रयित पु [illegible]

प्रश्न पु प्रच्छ—भावे नङ् [illegible]

प्रश्नदूती स्त्री प्रश्नस्य दूतीव । प्रहेलिकायाम् त्रिका० ।

प्रश्नविवाक पु० कृतान् प्रश्नान् विवक्ति उत्तरयति वि+वच- कर्त्तरि संज्ञाया घञ् । प्रश्नोत्तरदायके ज्योतिर्विद्ादि "मर्य्यादायै प्रश्नविवाकम्" यजु० ३०।१० वेददी० ।

प्रश्नव्याकरण पु० प्रश्नान् जिज्ञासितप्रश्नान् व्याकरोति उत्त- रयति वि+आ+कृ-ल्यु ६त० । १जैनभेदे हेमच० । भावे ल्युट् । २पृष्टार्थोत्तरज्ञापने न० ।

प्रश्नि पु० ऋषिभेदे भा०आ०२६अ० । प्रच्छ-बा नि वा ङीप् । २कुम्भिपाकायां (पाना) त्रिका० ।

प्रश्नोपनिषद् प्रश्नाधिकारेण प्रवृत्ता उपनिषद् । आथर्वणोप- निषद्भेदे "भगवन् ! कुतो वा इमाः प्रजाः प्रजा- यन्ते" इत्यादि षट्प्रश्नाधिकारेण तस्याः प्रवृत्तत्वात्तथात्वम् ।

प्रश्रय पु० प्र+श्रि-करणे अच् । प्रणये अमर ।

प्रश्रित त्रि० प्र+श्रि-क्त । १विनीते अमर ज्ञान्तिदेवस्य २पुत्रभेदे पु० भाग० ९ २४ २५

प्रश्लथ त्रि० प्रकृष्ट श्लथ प्रा स० । प्रकृष्टे शिथिले त्रिका० ।

प्रश्लिष्ट त्रि० प्र+श्लिष-क्त । सुसम्बद्धे युक्तियुक्ते व्याख्याता० भाषान्तोष्टासता ।

प्रश्वास पु० प्र+श्वस-भावे घञ् । कोष्ठस्थ वायोर्बहिर्नि सा- रणे "श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" पा०स० सू० भाष्यम् । कुम्भकशब्दे २११४पृ० दृश्यम् ।

प्रष्ट त्रि० प्रच्छ-क्त । प्रश्नकारके स्त्रियां ङीप् ।

प्रष्टि पु० प्रच्छ-कर्त्तरि बा० ति । बाह्लीकदेशप्रसिद्धे नि मृगभेदे सु० १२८।६

प्रष्ठ त्रि० प्र+स्था क "प्रष्ठोऽग्रगामिनि" पा० षत्वम् । १अग्र- गामिनि । १श्रेष्ठे च अमरः । तस्य पत्नी ङीप् । २तत् पत्न्यां स्त्री । गौरा० ङीप् । ३वस्तुकौषधौ स्त्री राजनि० ।

प्रष्ठवाह् त्रि०प्रष्ठ वहति वह-ण्वि । १युगपार्श्वगे प्रथमयो- जिते दम्ये गवादौ अमर युगपार्श्वे योजिते गवा दिके शिक्षार्थं यः प्रथमं वाहयति तस्मिन् । भत्वे वाह ऊट् प्रष्ठौहः प्रष्ठौहा इत्यादि । स्त्रियां ङीप् प्रष्ठौही तथाविधस्त्रियाम् २प्रथमगर्भिण्यां गवि धरणि ।

प्रस प्रसवे तनौ च सक०दिवा० आ० सेट् । प्रस्यते अप्रसिष्ट । मित् घटादि णिच् प्रसयति ते ।

प्रसक्त त्रि० प्र+सन्ज-क्त । १प्रसङ्गविषये "प्रसक्त हि प्रतिषिध्यते" सोमाच० । २नित्ये नित्यतायुक्ते त्रि०जटा० ।

प्रसक्ति स्त्री प्र+सन्ज-भावे क्तिन् । १प्रसङ्गे २व्याप्तौ ३अ नुमितौ दोषितिः । ४व्याप्तौ च "अतिप्रसक्तिरन्यधर्मत्वे" सा०सू० । अतिव्याप्तिसदर्थे । [१०] भाष्ये दृश्यम् ।

प्रसङ्गिन् पु० प्र+सञ्ज-बा० घिनुण् । प्रसङ्गनशीले भ०८८।१३।

प्रसङ्ख्यान न० प्र+सम्+ख्या-भावे ल्युट् । १सम्यग्ज्ञाने "स्मर प्रसङ्ख्यानपरो बभूव" कुमा० । प्रा०व० । २गुरुकर्मणा संख्यायुते त्रि० भा० व० १२१अ० ।

"आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म्म१ । तथा हस्तसंयोगाच्च मुषले कर्म्म२ । अभिघातजे मुषलादौ कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः ३ । तथात्मसंयोगो हस्तकर्म्मणि४ । अभिघातान्मुषलसंयोगाद्धस्ते कर्म्म५ । आत्मकर्म्म हस्तसंयोगाच्च ६ । संयोगाभावे गुरुत्वात् पतनम्७ । नोदनविशेषाभावान्नोर्द्ध्वं न तिर्य्यग्गमनम्८ । प्रयत्नविशेषान्नोदनविशेषः ९ । नोदनविशेषादुदसनविशेषः १० । हस्तकर्म्मणा दारककर्म्म व्याख्यातम्११ । तथा दग्धस्य विस्फोटने१२ । यत्नाभावे प्रसुप्तस्य चलनम्१३ । तृणे कर्म्म वायुसंयोगात्१४ । मणिगमनं सूच्यभिसर्पणमदृष्टकारणम्१५ । इषावयुगपत्संयोगविशेषाः कर्म्मान्यत्वे हेतुः १६ । नोदनादाद्यमिषोः कर्म्म तत्कर्म्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च१७ संस्काराभावे गुरुत्वात् पतनम्" १८ वै०सू० "संयोगश्च प्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोगप्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म्म, तस्य च कर्म्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणम्, प्रयत्नश्च निमित्तकारणम्, इयमेव चेष्टा, प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियायाश्चेष्टात्वात् स्वासमवेतस्वातिरिक्तस्वगंधवद्द्रव्यप्रयत्नजन्यक्रियाया वा१ । तथा हस्तसंयोगादित्येवमद्वसंयोगादित्यर्थः तत्र च यत्नवदात्मसंयुक्तेन हस्तेन मुषलस्य संयोगोऽसमवायिकारणम्, मुषलं समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे २। उदूखलाभिहतमुषलस्योत्पाताद् यदुत्पतनं जायते तत्र कारणमाह । तत्र यद्यपि मुषलेन उत्पतता हस्तस्य संयोगोऽप्यस्ति तथाऽपि स संयोगोऽन्यथासिद्धः किन्तु उदूखलाभिघात एव असमवायिकारणम्, कुत एवमित्यत आह व्यतिरेकादिति प्रयत्नस्य व्यभिचारादित्यर्थः । यदि तदा प्रयत्नः स्यात् मुषलस्योर्द्ध्वाकाशात्पतनं न भवेत् विधारकेण प्रयत्नेन मुषलस्य धारणमेव भवेत् चेष्टाधीनं मुषलस्य मुमक्षु(?)पतनं वा भवेत् इति भावः ३ । मुषलेन सहोत्पततो हस्तस्य कर्म्मणि कारणविशेषमभिधाय प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं निराकर्त्तुमाह । मुषलेन सहोत्पततो हस्तस्य कर्म्मणि आत्मसंयोगः प्रयत्नवदात्मसंयोगस्तथा अकारणमित्यर्थः अकारणमिति पूर्व्वसूत्रस्य तथेत्यतिदिश्यते४ । कुतस्तर्हि हस्ते तदोत्पतनमत आह । यथा मुषले उत्पतति मुषलगतस्य नोदनमुत्पतति तथा हस्तोऽपि तदोत्पतति । अत्राभिघातशब्देन अभिघातजनितः संस्कार उच्यते उपचारात्, उत्पततो मुषलस्य पटुतरेण कर्म्मणा अभिघातसहकृतेन साग्रे मुषले संस्कारो जनितस्तत्कृतः संस्कारमपेक्ष्य हस्तमुषलसंयोगादसमवायिकारणाद्धस्तेऽप्युत्पतनं न तु तदुत्पतनं प्रयत्नवदात्मसंयोगासमवायिकारणकम्, अथवा हि हस्तो मुषलेन सहोत्पततीति भावः५ । ननु शरीरे शरीरावयवे वा यत्कर्म्मोत्पद्यते तत्र प्रयत्नवदात्मसंयोगः कारणं भवति कथं न तथेत्यत आह । आत्मशब्दः शरीरावयवपरः उपचारात्, अन्वयानुपपत्तिर्वोपचारवीजम् । तथाचात्मनः शरीरावयवस्यापि हस्तस्य यत् कर्म्म तत् हस्तमुषलसंयोगात् चकाराच्च वेगसमुच्चयः, हस्तकर्म्मणि हस्तसंयोगस्तावदसमवायिकारणं तत्र व्यभिचारो नास्ति स च क्वचित् प्रयत्नवदात्मसंयोगः क्वचिद्वेगवन्मुषलादिसंयोगो यथा यातूलस्य शरीरावयवकर्म्मेति भावः ६ ॥ प्रयत्नानधीनकर्म्मप्रकरणमारभते । संयोगपदेन प्रतिबन्धकमात्रमुपलक्षयति तेन प्रतिबन्धकाभावे गुरुत्वादसमवायिकारणात् पतनम् अव्यसंयोगफलिका(?) क्रिया जायते, तत्र गुरुत्ववति फलादौ प्रतिबन्धकः संयोगः, विहङ्गमादौ तु विधारकः प्रयत्नः पतनप्रतिबन्धकः, एतेषामभावे गुरुत्वाधीनं पतनमित्यर्थः । अभिध्यानादिना विषादेरन्तरीक्षस्थापने अदृष्टवदात्मसंयोगो मन्त्रादिर्वा प्रतिबन्धकस्तेषामपि संयोगपदेन संग्रहः ७ ॥ ननु गुरुत्वाद् यदि पतनं तदा लोष्टादेरुत्क्षिप्तस्य क्वचिद्दूरं क्वचिच्च तिर्य्यग्गमनं कथमभेदित्यत आह । गुरुत्ववतोऽपि लोष्टकाष्ठादेर्यदूर्द्ध्वं तिर्य्यक् च गमनं तन्नोदनविशेषात् तीव्रतरान्नोदनात् । तथाच फलपक्षिवाणादौ संयोगप्रयत्नसंस्काराभावे यत् पतनं तत्र नोदनविशेषो नास्ति तेन न तिर्य्यक् नचोर्द्ध्वं गमनमिति भावः ८ । ननु नोदनविशेष एव कुत उत्पद्यते तत्राह । तिर्य्यक् ऊर्द्ध्वं दूरम् आसन्नं वा क्षिपामीतीच्छाकारणकः प्रयत्नविशेषः तज्जनितो नोदनविशेषस्ततो गुरुत्ववतो द्रव्यस्य लोष्टादेरूर्द्ध्वं तिर्य्यक् च गमनमुपपद्यते उदसनं दूरोत्क्षेपणम् ९,१०॥ उदूखलाभिघातात् मुषलेन सह हस्ते यत्कर्म्म उत्पन्नं तत्तावत् प्रयत्नपूर्व्वकं न भवति नापि पुण्यपापहेतुकमतस्तत्तुल्यतया बालकस्य क्रीडाकरचर-

[illegible] समवायिकारणत्वमिति । [illegible] यदपि [illegible] समवायिकारणत्व प्रत्यक्षपूर्वकत्वेन तथापि [illegible] [illegible] न [illegible] न [illegible] ॥ ११ ॥ इदानीं प्रत्यक्षपूर्वकेऽपि [illegible] पि [illegible] [illegible] — [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] गतीति यदि [illegible] [illegible] [illegible] [illegible] [illegible] पूर्वोक्तं न वा [illegible] [illegible] । '[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । "[illegible] [illegible] । [illegible] न [illegible] [illegible] ॥१२॥ इदानीं [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] तेन [illegible] [illegible] [illegible] [illegible] [illegible] ॥ १३ ॥ शरीरत्वमपि [illegible] [illegible] । [illegible] [illegible] [illegible] ॥१४॥ [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]समवायिकारणत्वम् [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तेन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] ॥१५॥ [illegible] [illegible] [illegible] नाना [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तेन [illegible] संयोग [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] [illegible] । [illegible] हि [illegible] [illegible] [illegible] संयोगसमवाय [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] संयोगे [illegible] [illegible] [illegible]

संयोग[illegible] [illegible] न [illegible] ॥१६॥ गौरव[illegible] संस्कार[illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] गौरव[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] संस्कारो [illegible] न [illegible] [illegible] [illegible] [illegible] [illegible] संस्कारेण [illegible] [illegible] संस्कार [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] संस्कारेण [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] संस्कार [illegible] न [illegible] [illegible] संस्कार[illegible] गौरवादिति [illegible] [illegible] [illegible] संस्कारा[illegible] [illegible] [illegible] संस्कार[illegible] गौरवम् [illegible] [illegible] [illegible] [illegible] [illegible] गौरव[illegible] [illegible] ॥१७॥ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] संस्कारस्य [illegible] [illegible] । [illegible] [illegible] [illegible] संस्कारेण [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥१८॥ [illegible] ।

'गौरवादिभिरावात् [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] । गौरवा[illegible] [illegible] । [illegible] [illegible] । [illegible] संस्कारो [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] । [illegible] [illegible] ॥११॥ [illegible] [illegible] न [illegible] ॥१२॥ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥१३॥ [illegible] [illegible] [illegible] ॥१४॥ [illegible] [illegible] ॥१५॥ [illegible] [illegible] [illegible] [illegible] न [illegible] ॥१६॥ [illegible] [illegible] ॥१७॥ [illegible] गौरवादि [illegible] [illegible] [illegible] । गौरव संयोगित्व [illegible] संयोगेन [illegible] [illegible] [illegible] [illegible] [illegible]

र्म भवति यः संयोगः शब्दनिमित्तकारणं न भवति सः । यः संयोगः शब्दनिमित्तकारणं भवति यस्मिन् सति कर्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः । ताभ्यामपि प्रत्येकं कर्म जन्यते पङ्काख्यायां पृथिव्याश्चरणेन नोदनात् चरणाभिघाताच्च कर्म जायते तत्र पङ्कः समवायिकारणम्, नोदनाभिघातौ यथायथमसमवायिकारणम्, गुरुत्ववेगप्रयत्ना यथासम्भवं निमित्तकारणम् । संयुक्तसंयोगादिति नोदनादभिघाताद्वा पङ्के कर्म तत्पङ्कस्थिते घटादावपि तत्समकालमेव कर्मदर्शनात् १ । ननु भूकम्पादौ नोदनाभिघातावन्तरेण जायमाने किमसमवायिकारणमत आह । तदिति पृथिवीकर्म परामृशति पृथिव्यामेव कर्म यदि विशेषेणाशयेन भवति तदाऽदृष्टकारितम्, तेन भूकम्पेन यस्य दुःखं सुखं वा भवति अदृष्टवदात्मसंयोगस्तत्रासमवायिकारणम्, भूः समवायिकारणम्, अदृष्टं निमित्तकारणम्, यद्वा तदा नोदनाभिघातौ परामृशति विशेषो व्यतिरेकः तथा च नोदनाभिघातव्यतिरेकेण यत् पृथिव्यां कर्म तददृष्टकारितमित्यर्थः २ । इदानीं द्रवद्रव्यसमवेतकर्मपरीक्षाप्रकरणम्, तत्राह । अपां यत् पतनं वर्षरूपं तद्गुरुत्वासमवायिकारणकम्, तत्संयोगस्य मेघसंयोगस्याभावे सति भवति तेन संयोगाभावस्तन्निमित्तकारणमित्यर्थः ३ । तेषामेव वृष्टिबिन्दूनामन्योन्यसंयोगजनकं कर्म कथमत आह । क्षितौ पतितानामपां बिन्दूनां परस्परं संयोगेन महज्जलावयवि स्रोतोरूपं यज्जायते तस्य यत् स्यन्दनं दूरसरणं तत् द्रवत्वादसमवायिकारणादुत्पद्यते गुरुत्वान्निमित्तकारणादप्सु समवायिकारणेषु ४ । ननु यदि भूमिष्ठानामपामूर्ध्वं गमनं भवति तदा गुरुत्वात् पतनवर्षणं सम्भाव्यते तदेव तु कुत इत्यत आह । कारयन्तीतिशेष यदपामूर्ध्वमारोहणं तत् नाड्यः सूर्यरश्मयो वायुसंयोगात् कारयन्ति ग्रीष्मे वाय्वभिहताः सूर्यरश्मय एव आरोहयन्त्यप इत्यर्थः । क्वचित् पाठो नाडीवायुसंयोगादिति स च नाड्यो नाडीसम्बन्धी यो वायुसंयोग इत्युपपादनीय ५ । ननु सूर्यरश्मीनां कथमयं महिमा यत् भूमिष्ठा अप ऊर्ध्वं नयन्तीत्यत आह । नोदनेन पतत्रवायुनोदनेन आपीडनादास्कन्दनात् , वायुसंयुक्तारश्मयस्तत्संयुक्ता आप ऊर्ध्वं धावन्ति यथा स्थालीस्था अपः कथ्यमाना वायुसंवलितरश्मय ऊर्ध्वं नयन्ति, चकार इवार्थस्तत्र च उपमानं स्थालीस्था एवापो द्रष्टव्या ६ । ननु मूले सिक्तानामपां वृक्षाभ्यन्तरेणोर्ध्वं गमनम् अभितः, तत्र नोदनाभिघातौ न चादित्यरश्मयः प्रभवन्ति तत्कथं तदित्यत आह । अभित सर्पणमभिसर्पणं तदभिसर्पणं मूले निषिक्तानामपां वृक्षे तददृष्टकारितं पत्रकाण्डफलपुष्पादिवृद्धिक्षत सुखं दुःखं वा येषामात्मनाम्, अदृष्टवत्तदात्मसंयोगादसमवायिकारणात् अदृष्टान्निमित्तादप्सु समवायिकारणेषु तत् कर्म भवति । येन कर्मणा आप ऊर्ध्वं गत्वा वृक्षं वर्द्धयन्तीत्यर्थः ७ । नन्वपां सांसिद्धिकद्रवत्वलक्षणमुक्तं तादृशानामेवापामूर्ध्वमधस्तिर्यक् च गमनमुपपादितं हिमकरकादे नाम्बु शैत्यादम्बुत्वविवादविरहम्, तत्कथं तेषां संघातः काठिन्यम्, कथञ्च विलयनमित्यत आह । दिव्येन तेजसा प्रतिबन्धादाप्याः परमाणवो द्व्यणुकमारभमाणा द्व्यणुकेषु द्रवत्वं नारभन्ते ततो द्रवत्वशून्यैरवयवैर्द्व्यणुकादिप्रक्रमेण द्रवत्वशून्या हिमकरकादय आरभ्यन्ते तेन तेषां काठिन्यमुपलभ्यते । नन्वेवं हिमकरकादीनामाप्यत्वे किं प्रमाणमत उक्तं विलयनञ्च तेजःसंयोगादिति तेजःसंयोगेन बलवता हिमकरकारम्भकपरमाणूनां क्रिया क्रियातो विभागस्ततः आरम्भकसंयोगनाशपरम्परया हिमकरकादिमहावयविनाशस्तत्र द्रवत्वप्रतिबन्धकतेजःसंयोगविगमात् त एव परमाणवो द्व्यणुकेषु द्रवत्वमारभन्ते ततो द्रवत्ववता हिमकरकादीनां विलयनं तत्र च बलवत्तेजोऽनुमेयो निमित्तम् ८ । ननु तद्दिव्यतेजोऽनुप्रवेशस्तत्र इत्यत्र किं प्रमाणमित्यत आह । तत्र दिव्यासु अप्सु दिव्यानां तेजसामनुप्रवेशे विस्फूर्जथुलिङ्गं वज्रनिर्घोष एव लिङ्गमित्यर्थः आत्यन्तिकविद्युत्प्रकाशस्तावत्प्रत्यक्ष एव तदनुपदञ्च स्फूर्जथुः सोऽपि प्रत्यक्ष एव तेनानुमीयते यस्मान्मेघात् करका प्रादुर्भवन्ति तत्र दिव्यन्तेजो विद्युद्रूपमनुप्रविष्टं तदुपष्टम्भेन करकारम्भिकाणामपां द्रवत्वप्रतिबन्ध इति ९ । अत्रैव प्रमाणान्तरमाह । अपां मध्ये तेजोऽनुप्रवेश आगमसिद्ध एवेत्यर्थः । तथा हि "आपस्ता अग्निगर्भमादधीरन् या अग्निं गर्भं दधिरे सुवर्णम्" इत्यादि १० । ननु विस्फूर्जथौ कथमुत्पद्यते संयोगविभागौ शब्दयोनी तौ च नानुभूयेते इत्यत आह । विस्फूर्जथुरितिशेष अभ्रिस्तनयित्नोः संयोगविभागौ निमित्तकारणीभूय स्तनयित्नोरेवाकाशेन संयोगादसमवायिकारणादाकाशे समवायिकारणे शब्दं गर्जितं जनयत । क्वचिच्च वायुबलाहकसंयोगविभागौ निमित्तकारणे बलाहकवियत्संयोगविभागावसमवायिकारणे, कर्मकारणाधिकारेऽपि प्रासङ्गिकमिदमुक्तम

[illegible] ॥१॥ [illegible] ॥२॥ [illegible] ॥३॥ [illegible] ॥४॥ [illegible] ॥५॥ [illegible]

[illegible] ॥६॥ [illegible] "[illegible]" [illegible] ॥७॥ [illegible]

असमवायिन् त्रि० न समवायि अनु+अय+इन् इति न० त० [illegible] ।

[illegible] ।

असमवेत त्रि० न समवेतम् [illegible] ।

इत्यादीनि दृत्त० उक्तानि ज्ञेयानि।च०।२अनुपसचरिते त्रि०

असमस्त त्रि० सम+अस–क्त न०त०। १असङ्क्षिप्ते २व्यस्ते "एते व्यस्ताः समस्ताश्चेति" विश्वामित्रवचनव्याख्याने "व्यस्ता असमस्ताः" प्रा०त० रघु०। ३असमासे व्याकरणोक्त-समासशून्ये विभक्त्यादिकार्य्ययुक्ते ४विग्रहवाक्ये न०।

असमाति त्रि० सम साम्यमतति अत–इन् न०त०। अतुल्ये अनुपमे "एवाहि जातो असमात्योजाः" ऋ० ६,२९,६।

असमान त्रि० न०ब०। अतुल्ये। "समान लघु चाणीव पूर्व्वेणैव विशुध्यति। असमान द्वितीयेन" यम।

असमानयानकर्म्मन् पु० न समानं तुल्यकालिकं यानकर्म्म यत्र। सन्धिभेदे। त्वमपि याहि ततोऽहं यास्यामीति समयं कृत्वा यत्र पूर्व्वापर जिगीषुभ्यां गम्यते तादृशे यानकर्म्मरूपे सन्धौ। [२समाप्तिशून्ये त्रि०।

असमापन न० अभावे न०त०। १सम्पूर्त्यभावे न०ब०।

असमाप्त त्रि० न समाप्तः। १असम्पूर्णे "असमाप्ते व्रते चैव नैव कुर्य्यात् व्रतान्तरम्" स्मृतिः। संकल्पपूर्व्वं गृहीतव्रतस्यासमापने व्रतान्तरस्याकर्त्तव्यताऽभोक्ता। आरब्धकर्म्मणः सम्पूर्णता समाप्तिः। २तच्छून्ये च "असमाप्ते परि-कर्म्मणि स्मृत" कुमा०। ३सम्यगप्राप्ते च।

असमाप्ति स्त्री अभावे न०त०। १समाप्त्यभावे न०ब०। २समाप्तिशून्ये त्रि०। ३सम्यगप्राप्तौ स्त्री ४तच्छून्ये त्रि०

असमावृत्त पु० न०त०। समावृत्तः चीर्णब्रह्मचर्य्यतया गुरु-णानुमतः गुरुकुलादावृत्तः गृहस्थकर्म्माचरणाय कृतसमावर्त्तनसंस्कार न०त०। तद्भिन्ने ब्रह्मचारिणि स्वार्थे कन् असमावृत्तकोऽप्युक्तार्थे। "भाविकाम्न तयो-र्ज्योयादसमावृत्त(वर्त्त)को द्विजः" मनु। असमावर्त्त-कोऽप्यत्र।

असमाहार पु० समाहारो मेलनं संघातः सम्यगाहरणञ्च अभावे न०त०। १तदभावे न०ब०। २तच्छून्ये त्रि०।

असमाहित त्रि० न०त०। १समाधिशून्ये चित्तैका-ग्रताशून्ये २असन्निवेशिते च।

असमीक्ष्यकारिन् त्रि० समीक्ष्य विविच्य न करोतीति कृ+णिनि। १विवेचनामकृत्वैव कर्म्मकारके, २मूर्खे च।

असमृद्धि स्त्री ऋद्धेराधिक्यं समृद्धिः अभावे न०त०। १ऋद्ध्याधिक्याभावे "नात्मानमवमन्येत पूर्व्वाभिरसमृद्धिभिः" मनु। न०ब०। २समृद्धिशून्ये त्रि०।

असम्पत्ति स्त्री अनुरूपात्मलाभः सम्पत्तिः सम्पदोऽभावे न०त०। १सम्पत्त्यभावे। न०ब०। २तच्छून्ये त्रि०।

असम्पन्न त्रि०। सम्पन्नं सम्पद्युक्तं अनुरूपात्मस्वरूपमाप्तञ्च न०त०। तद्भिन्ने। [२सम्पच्छून्ये त्रि०।

असम्पर्क पु० अभावे न०त०। १सम्बन्धाभावे न०ब०।

असम्पूर्ण त्रि० यावत्पर्य्यन्तानुसरणे समाप्तिस्तावान् सम्पूर्णः न०त०। तादृशपूर्त्तिशून्ये। यथा असम्पूर्णं चन्द्रमण्डलम् "कुरुष्व सकौतुकं चन्द्रमसः पूर्णं मण्डलमिदानीम्" शकुन्त०

असम्पृक्त त्रि० न०। १असङ्गते २असंयुक्ते।

असम्प्रज्ञात त्रि० न सम्यक् ज्ञातः ज्ञेयादिभेदो यत्र। पातञ्ज-लोक्ते ज्ञेयज्ञानज्ञातृभेदशून्ये निर्विकल्पके १समाधौ। समाधिस्तावत् द्विविधः सम्प्रज्ञातः असम्प्रज्ञातश्च तत्राद्यः सविकल्पकः ग्राह्यग्रहणग्रहीतृप्रतिभासत्वात् तत्-प्रतिभासशून्यो निर्विकल्पकः सर्व्वविकल्पशून्यत्वादसम्प्रज्ञातो द्वितीयः यथाह पात० सूत्रादौ "क्षीणवृत्तेरभिजातस्येव मणे-र्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" यथाऽ-भिजातस्यातिस्वच्छस्य मणेः स्फटिकादेः कुसुमाद्युपरक्तस्य स्वरूपाभिभवेन रक्ताद्याकारता भवति तथा अभ्यासवैरा-ग्याभ्यां क्षीणवृत्तेरभिभूतरजस्तमोवृत्तिकस्य चित्तस्य स्थूल-सूक्ष्मभूतात्मकग्राह्येषु ग्रहणैरिन्द्रियादिवृत्तिभिः ग्रहीता च वितर्कविचारानन्दास्मितानुगमात् तदाकारतापत्तिः समा-धिर्भवति सेयं सम्प्रज्ञाताख्या समापत्तिः। तद्भिन्ना च असम्प्रज्ञाता समापत्तिः। सम्प्रज्ञातभेदादिकं च तच्छब्दे वक्ष्यते। अस्या एव च निर्बीज इति संज्ञान्तरम् "तस्यापि निरोधात् निर्बीजः समाधिः" पात०सू० सत्त्वपुरुषा-न्यताख्यात्यनन्तरं परवैराग्यसंस्कारप्रचयेन तस्य सम्प्रज्ञात-समाधिसंस्कारस्य तत्प्रत्ययाय निरोधे सति सर्व्वस्य सम्प्रज्ञातजन्यसंस्कारप्रवाहस्य निरोधात् समाप्ताधिकार-त्वेन चित्तस्य कृतकृत्यता स्यात् निमित्तापाये नैमित्तिकापाय इति न्यायेन निर्बीजः समाधिर्जायते स च "आगमेनानु-मानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" इत्युक्त आगमेन श्रवणेन अनुमानेन मननेन ध्यानाभ्यासे योरसः परमवैराग्यं तेन प्रज्ञाप्रसादेन प्रज्ञा पुरुषसाक्षात्कारं सम्पादयन् योगं निर्बीजसमाधिं लभते इति तदर्थः कालक्रमेण निर्बीजसमाधिसंस्कार प्रचये सति स्वप्रकृतौ चित्तं लीयते क्लेशाभावात्, कृत्स्नोप-लक्षणाधिकारोऽपि चित्तस्य स्थितिहेतुर्न हि कृतभोग-विवेकख्यातिकस्य चित्तस्य कृत्यशेषोऽस्ति येन तदभि क्रियेत। प्रकृतौ चित्तस्य प्रलये च पुरुषः स्वरूपमात्रप्रतिष्ठः केवलो मुक्तो भवतीति" इति०। २असङ्गज्ञाते च।

असम्मति [illegible] । [illegible] "[illegible]" [illegible] ।

असम्बद्ध [illegible] असम्+बन्ध–क्त [illegible] । [illegible] "[illegible]" [illegible] "[illegible]" [illegible] ।

असम्भूमशाप [illegible] ।

असम्भव पु [illegible] "[illegible]" [illegible] "[illegible]" [illegible] ।

असम्बाध त्रि [illegible] "[illegible]" [illegible] ।

असमय पु [illegible] "[illegible]" [illegible] "[illegible]" [illegible] ।

असमपत् त्रि असम्+अ [illegible] "[illegible] ।

[illegible] "[illegible]" [illegible] ।

असमाप्त त्रि असम्+आप्–क्त [illegible] "[illegible]" [illegible] ।

असमापना स्त्री [illegible] ।

असमापनीय त्रि [illegible] ।

असमृति स्त्री असम्+भू [illegible] "[illegible]" [illegible] "[illegible]" [illegible] ।

असम्पन्न त्रि [illegible] ।

असम्भेद पु [illegible] ।

असम्भ्रम पु [illegible] "[illegible]" [illegible] ।

असम्मत त्रि [illegible] "[illegible]" [illegible] ।

असम्मति स्त्री [illegible] ।

असम्मित त्रि [illegible] "[illegible]" [illegible] ।

असम्मुख त्रि असम्+मुख [illegible] ।

असम्मूढ त्रि [illegible] "[illegible]" [illegible] ।

असम्मृष्ट त्रि [illegible] "[illegible]" [illegible] ।

असम्मोह पु [illegible] ।

दम मम" इत्युपक्रम्य "भवन्ति भावा भूतानां मत्त एव पृथग्विधा" इति गीतायां तेषां भावरूपत्वोक्तेः अयथार्थज्ञानपरत्वम् न०त० । २तच्छून्ये स्थिरप्रज्ञे त्रि० ।

असम्यच् त्रि० न०त० । सम्यग्भिन्ने १अनुचिते २अयुक्ते । "असम्यग्व्ययशीलैस्तु" देवीभा० । स्त्रियां ङीप् असमीची

असुरु पु० सरति सृ—उन् न०त० । (कुकुरसोङ्गा) वृक्षे

असल न० अस्यते क्षिप्यतेऽनेन अस+कलच् । अस्त्रविशेषोपयुक्ते १मन्त्रभेदे २लौहे च ।

असवर्ण त्रि० न समानो वर्णोऽस्य समानस्य सादेशः । असजातीये भिन्नवर्णे यथा ब्राह्मणस्य क्षत्रियादि । "द्विजानामसवर्णासु कन्यासूपयमस्तथा" बृहन्ना० ।

असश्चत् त्रि० सश्चतिर्गत्यर्थः निरु० सश्च—शतृ न०त० । १अगमनशीले स्त्रियां ङीप् "असश्चन्ती प्रजावती भूरिरेतसा" ऋ० ८।२२।४ । "असश्चन्ती अगमनशीला" भा० । २अपराजिते च "मधुजिह्वा असश्चत" ऋ० ९।७२।४ । "असश्चत अपराजितान्" भा० ।

असश्चुष् त्रि० सच—वा इसन् न०त० स्त्रियां ङीप् । अप्रतिबद्धे "यामो दोहते विरुद्धमसश्चुषी सुमत्" ऋ० ६।८६।१८ । "असश्चुषी अप्रतिबद्धा" भा० ।

असस्वत् त्रि० सस—स्वप्ने शतृ न०स० स्त्रियां ङीप् । स्वव्यापारे जागरूके "रेजन्ते असस्वन्तो अजरा" ऋ० १।१४३।३ । "असस्वन्तः स्वव्यापारेष्वस्वपन्तः" भा० ।

असह त्रि० न सहते सह—अच् न०त० । अक्षमे असहने

असहन पु० न सहति सह—ल्यु न०त० । १शत्रौ । २अक्षमागुणे त्रि० । भावे ल्युट् अभावे न०त० । ३क्षमाभावे

असहाय त्रि० नास्ति सहायो यस्य । १सहचरशून्ये अन्यसाहाय्यरहिते २सहायरहिते च "कृपास्तु ह्यसमूलानि कुर्वेतसहायता । समता यैव सर्वविधैतन्मु लस्य लक्षणम्," मनुः । ["स्वमनन्तमेवसहिष्णुता" नीति

असहिष्णु त्रि० न सहिष्णु । अक्षमे सहनशीलभिन्ने

असह्य त्रि० न सह्य । सोढुमशक्ये "असह्यपीडं भगवन् ऋणमन्त्यमवेहि मे" "द्विषामसह्यः सुतरां तरूणाम्" इति च रघु । "भवत्यभव्यमसह्यवेदनम्" कुमा० ।

असाक्षात् अव्य० न०त० । १परोक्षे २इन्द्रियायोग्ये च ।

असाक्षात्कार पु० अभावे न०त० । १प्रत्यक्षाभावे विरोधे न०त० । २ परोक्षज्ञाने न०ब० । ३ प्रत्यक्षाविषये ४तच्छून्ये च त्रि० ।

असाक्षिक त्रि० नास्ति साक्षी साक्षाद्द्रष्टा अधिष्ठाता वा यस्य कम् । १साक्षिशून्ये "असाक्षिकेषु त्वर्थेषु मिथोविवदमानयोः" मनुः । २अधिष्ठातृशून्ये च असाक्षिका जडप्रवृत्तिरनुचितेति वेदा०भा० ।

असाक्षिन् त्रि० न साक्षी । स्मृत्युक्ते वचनतो दोषादितो वा साक्ष्यकर्मसु अयोग्ये श्रोत्रियादौ । असाक्षिणश्च मिता० दर्शिता "उक्तलक्षणानां साक्षिणामसम्भवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रतिपादनार्थमसाक्षिणो वक्तव्या ते च पञ्चविधा नारदेन दर्शिताः "असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः । वचनाद्दोषतोभेदात्स्वयमुक्तिर्मृतान्तर" इति । के पुनर्वचनादसाक्षिण इत्याह । "श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः । असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः" या०स्मृ० तापसादानमस्या । आदिशब्देन पितापुत्रविवदमानादीनां ग्रहणम् । यथाह शङ्खः । "न पितापुत्रविवदमानगुरुकुलवासिपरिव्राजकवानप्रस्थनिर्ग्रन्थाः साक्षिणः" इति दोषादसाक्षिणो दर्शिता नारदेन "स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा । असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते" इति। चण्डाः कोपनाः कितवा द्यूतकृतः । भेदादसाक्षिणोऽपि स्मृत्यन्तरेषु दर्शितम् । "साक्षिणां लिखितानां च निर्दिष्टानां च वादिना । तेषामेकोऽन्यथा वादी भेदात्सर्वे न साक्षिणः" इति । तथा स्वयमुक्तिस्वरूपमप्युक्तम् । "स्वयमुक्तिरनिर्दिष्टः स्वयमेवेत्य यो वदेत् । सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हतीति" । मृतान्तरस्यापि स्वरूपमुक्तम् । "योऽर्थे श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि । क तद्वदतु साक्षित्वमित्यसाक्षी मृतान्तरः" इति । येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्रावयितव्यो भवेत् यूयमत्रार्थे साक्षिण इति । तस्मिन्नर्थिनि प्रत्यर्थिनि वा असति मृतेऽर्थे च अनिवेदिते साक्षी कं कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वदतीति मृतान्तरः साक्षी न भवति । यत्र तु मुमूर्षुणा स्वयेन वा पिता पुत्रादयः श्राविता अपिनर्थे अमी साक्षिण इति । तत्र मृतान्तरोऽपि साक्षी । यथाह नारदः । "मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्राविताद्दृते" । तथा । "श्रावितोनातुरेणापि यस्त्वर्थो धर्मसंहितः । मृतेऽपि तत्र साक्षी स्यात् षट्सु चान्वाहितादिषु" । तानेवासाक्षिणो दर्शयति । "स्त्रीवालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः" । रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः । पतिताप्तार्थसम्बन्धिसहायरिपुतस्कराः । साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः" । स्त्री प्रसिद्धा । वालोऽप्राप्तव्यव-

[illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] ।

[illegible] "[illegible]" [illegible] । [illegible] ।

यथा[illegible] न [illegible] न ह । [illegible] ।

यथा[illegible] त्रि [illegible] न ह । [illegible] ।

[illegible] "[illegible]" [illegible] । [illegible] "[illegible]" [illegible] ।

यथा[illegible] त्रि न ह । [illegible] ।

"[illegible]" [illegible] ।

[illegible] । [illegible] "[illegible]" [illegible] । [illegible] ।

यथा[illegible] त्रि [illegible] । [illegible] ।

यथा[illegible] त्रि [illegible] न ह । [illegible] ।

यथा[illegible] न [illegible] न ह । [illegible] ।

यथा[illegible] न [illegible] न ह । [illegible] "[illegible]" "[illegible]" [illegible] ।

यथा[illegible] त्रि [illegible] न ह । [illegible] ।

यथा[illegible] त्रि [illegible] । [illegible] न ह । [illegible] ।

यथा[illegible] [illegible] न ह । "[illegible]" [illegible] "[illegible]" [illegible] ।

यथा[illegible] न [illegible] । "[illegible]" [illegible] ।

यथा[illegible] त्रि न ह । [illegible] ।

यथा[illegible] न [illegible] न ह । [illegible] त्रि ।

यदि [illegible] । [illegible] "[illegible]" [illegible] "[illegible]" [illegible] ।

यदि [illegible] । [illegible] ।

अस-इन्। २खड्गे पु० "असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते। इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा"। खड्गपूजा-मन्त्रः. "सर्वा श्यामा असिकरा मुण्डमाला विभूषिता" श्यामाध्यानम्. खड्गलक्षणन्तु वृ० स० उक्तम् "अङ्गुलशतार्द्धमुत्तम ऊनः स्यात् पञ्चविंशति खड्गः। अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः॥ श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम्। सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च॥ कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः। खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च॥ स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः। स्वनश्च इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः॥ क्वणिते मरणायोक्तः पराजयाय प्रवर्त्तने कोशात्। स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे॥ नाकारणं विवृणुयान्न विघट्टयेच्च पश्येन्न तत्र वदनम् न वदेच्च मूल्यम्। देशं न चास्य कथयेत् प्रतिमानयेच्च नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम्॥ गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च। करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः॥ निष्पन्नो न च्छेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः। मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने॥ यस्मिंस्तस्मिन् देशे व्रणो भवेत्तद्वदेव खड्गस्य। वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्टः॥ अथ वा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदव-धार्य्य। कोशस्थस्यादेश्यो व्रणोऽसि शास्त्रं विदित्वेदम्॥ शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे। भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च॥ नासौष्ठकपोल-हनुश्रवणग्रीवांसकेषु पञ्चाद्याः। उरसि द्वादशसंस्थस्त्रयो-दशे कक्षयोर्ज्ञेयः॥ स्तनहृदयोदरकुक्षिनाभिषु चतुर्दशा-द्यो ज्ञेयः। नाभीमूले कट्यां गुह्ये चैकोनविंशतितः॥ ऊर्वोर्द्वाविंशे स्यादूर्वोर्मध्ये व्रणस्त्रयोविंशे। जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥ जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च। षड्विंशतिकाद्याः स्युः पदेऽपि मतेन गर्गस्य॥ पुत्रमरणं धनाप्तिर्धनहानि सम्पदश्च बन्धश्च। एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत् क्रमशः॥ सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधन-लाभौ। क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्-प्रभृति॥ लब्धिर्हानिः स्त्रीलब्धयो वधो वृद्धिमरणपरि-तोषाः। ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥ वित्ताप्तिरनिर्वाणं धनागमो मृत्युसम्पदोऽस्वास्थ्यम्। ऐश्वर्य-मृत्युराज्यानि च क्रमात्त्रिंशदिति यावत्॥ परतो न विशेषफलं विषमसमस्थास्तु पापशुभफलदाः। केचिदफलाः प्रदिष्टास्त्रिंशत्परतोऽपमिति यावत्॥ करवीरोत्पल-गजमदघृतकुङ्कुमकुन्दचम्पकसगन्धः। शुभदोऽनिष्टो गोमूत्र-पङ्कमेदःसदृशगन्धः॥ कूर्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः। वैदूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः॥ इष्टमौशनसे च गदापाम रुधिरेण श्रियमिच्छतः प्रदी-प्ताम्। हविषा गुणवत्सुताभिलिप्सोः सलिलेनाक्षय-मिच्छतश्च वित्तम्॥ वडवोष्ट्रकरेणुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिम्। झषपित्तमृगाश्वबस्तदुग्धैः करि-हस्तच्छिदये सतालगर्भैः॥ आर्कं पयो हुडुविषाणमषी-समेतं पारावताखुशकृता च युतः प्रलेपः। शस्त्रस्य तैल-मथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवे-द्विघातः॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत्। सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम्" वृ० स०। हेमा० परि० ख० तु तज्जात्यादिभेदात् फलभेदादिकं दर्शितं यथा "वत्स! पुरा भूतपूर्वैराचार्य्यैरुपदिष्टमेव यद्यथा तत्तथा उप-दिशामि निबोध खड्गस्य लोहं पञ्चविधं भवति। योनयः पञ्चविधाः संस्थानं चतुर्विधं करणमाकृतिर्द्विधा द्वादश कर्म्माणि गौरवं पञ्चदशधा विस्तारस्त्रिविधः वर्णच्छायाम्रपक्षस्य गन्धस्वरेण वा यत्र विशेषा भवन्ति तत्कीर्त्यमानं निबोध तीक्ष्णं मृदु स्निग्धं खरं मृदुतीक्ष्णं पञ्च चेति जातयः पञ्च भवन्ति वालुका कृताश्च पञ्चधातुसावर्णेति योनयः पञ्चधा भवन्ति। पीतेभ्यस्तीक्ष्णं भवति। नीलेभ्यो मृदु भवति। स्निग्धेभ्यः स्निग्धं खरेभ्यः खरं भवति। रक्तेभ्यो-द्रव्येभ्यो मृदुतीक्ष्णं भवति। रक्तवर्णैः पञ्चभिर्भेर्हरिद्भिः चित्रं यदन्तः उत्पद्यते लोहं तदव्यायुधनाम भवति। तच्च पाषाण एव पूजितं इति। भवन्ति चात्र श्लोकाः। तापं चिरादेव विमूर्च्छितस्य भिन्नाञ्जनाभं यत्कृष्णलोहम् पीतं भवेत् निर्म्मलरक्तवर्णं सर्वाणि लोहानि भिनत्ति तीक्ष्णम्। सम्भ्रम्यते ताममुपैति चाशु श्वेतं भवत्येव मलायनं मृदुम्। यत्-स्थूलकीर्णं च पुनश्च वर्णं सर्वेषु कार्य्येष्वपि तन्मृदु स्यात्। श्वेतं भवत्यभ्यधिकं स्थिरञ्च सघट्टनामेति चिराच्च तापम्। सघा-तलोहेन चिराद्वियोगं स्निग्धञ्च लोहं प्रवदन्ति तज्ज्ञाः। खरं विशीर्य्येत न चैति योगम् सर्वत्र योग्यं मृदुतीक्ष्ण-माहुः। यस्मात्तत्त्वं न च दह्यतेऽग्नौ तदव्यलोहं प्रवदन्ति

चतुस्त्रिंशदङ्गुले धन्यं दानधर्मभाजनं च पञ्चत्रिंशदङ्गुले मरणं चञ्च करोति । षट्त्रिंशदङ्गुले विजयं भर्त्तुर्ददाति सप्तत्रिंशदङ्गुले पराभवमरिभिः करोति । अष्टत्रिंशदङ्गुले शत्रुप्रमर्दनं करोति नवत्रिंशदङ्गुले पुत्रनैरेव परिक्लेशं नयति । चत्वारिंशदङ्गुले कन्यालाभमरिजयं च प्राप्नोति व्रणेन खड्गस्थितेन । तथैकचत्वारिंशदङ्गुले शत्रुभ्यः पीड़नाद्भयं लभते द्विचत्वारिंशदङ्गुले स्वराष्ट्रवृद्धिर्मन्त्रिण- स्त्रिचत्वारिंशदङ्गुले दुःखं प्राप्नोति सेनापतिरेव भर्त्ता भवति । चतुश्चत्वारिंशदङ्गुले श्रियं विपुलां लभते । पञ्च- चत्वारिंशदङ्गुले व्रणो भवति षट्चत्वारिंशदङ्गुले व्रणाः सुखसाध्या भवन्ति । सप्तचत्वारिंशदङ्गुले स्वपक्षं पीडयति परपक्षं वर्द्धयति अष्टाचत्वारिंशदङ्गुले राज्यश्रियं भुङ्क्ते एकोनपञ्चाशदङ्गुले शत्रोर्विजयं लभते । पञ्चाशदङ्गुले कुलवृद्धिर्भवति" । एकत्रिंशदाद्यङ्गुलेषु व्रणे फलविशेषोऽभि- हितः । अतः परं प्रवक्ष्यामि खड्गलक्षणमुत्तमम् । प्रधान- देहसम्भूतैरन्यास्थिभिररिन्दम । लोहं प्रधानं खड्गार्थे प्रशस्तं तद्विशेषतः । खटीकटुरूषिकाबद्धसूर्य्यारकेषु च । विदेहेषु तथाङ्गेषु मध्यमग्रामचेदिषु । सह- ग्रामेषु वीरेषु तथा कालञ्जरेऽपि च । लोहं प्रधानं खड्गानां प्रधानां शृणु लक्षणम् । खटी कटुरुजा ये च दर्शनीयाश्च ते स्मृताः । कार्य्ये दृढाश्च ऋषिकास्तद्वत् गुरवस्तथा" तीक्ष्णाश्छेदसहा वङ्गा दृढा सूर्य्यारकोद्भवाः । सुराष्ट्रीयाश्च विज्ञेयाः प्रभवन्ति विदेहजाः । अङ्गदेशोद्भवास्तीक्ष्णाः सहजास्ते दृढास्तथा । वेगवन्तस्तथा तीक्ष्णा मध्यमग्राम- सम्भवाः । असारलघवस्तीक्ष्णाश्चेदिदेशसमुद्भवाः । सह- ग्रामोद्भवाः खड्गाः सुतीक्ष्णा लघवस्तथा । निर्व्वला निर्मला खड्गा वीरदेशसमुद्भवाः । कालञ्जराभारसहास्तेषां वक्ष्यामि लक्षणम् । शताङ्गुलानां तु श्रेष्ठः खड्ग प्रकीर्त्तितः । तदर्द्धमध्यमश्चाथ ततो हीनं न धारयेत् । प्रमाणाभ्यधिकं देव ! छिन्नं वन्नाथैव च । दीर्घं सुमधुर- शब्दं यस्य खड्गस्य भार्गव ! ॥ किङ्किणीसदृशस्तस्य धारणम् श्रेष्ठमुच्यते । खड्गः पद्मपलाशाग्रो मण्डलाग्रश्च शस्यते । करवीरपलाशाग्रसदृशश्च विशेषतः । मधुघृतसगन्धश्च पद्मोत्पलसुगन्धिकः । वर्णतश्चोत्पलाकारः सवर्णो गगनस्य च । समाङ्गुलस्थाः शस्यन्ते व्रणाः खड्गेषु भार्गव ! । श्रीवत्सपर्वताकारछत्रपद्मनिभाश्च ये । मङ्ग- ल्यानां तथान्येषां सदृशा ये च भार्गव ! । काकोलूककबन्धाभा विषमाङ्गुलसंस्थिता । प्रमाणुगाः प्रभूताश्च न प्रशस्ता कदाचन । खड्गं न पश्येद्वदनं तथा न स्पृशयादसम् । न चास्य कथयेन्मूल्यं जातिं देशं कथञ्चन । उच्छिष्टो न स्पृशेत् खड्गं निशि कुर्य्याच्च शीर्षके । दिवा च पूजयेदेनं गन्धमाल्यादि- सम्पदा । खड्गं प्रशस्तं मणिहेमचित्रं कोषे सदा चन्दन- चर्च्चिताङ्गम् । संस्थापयेद्भूमिपतिः प्रयत्नात् यतेत चेह स्वश- रीरवच्च" विष्णुध० । देवीपु० । "खड्गस्य लक्षणं वक्ष्ये लिखि- तस्य तु सुन्दरि ! । नान्यवस्तोद्भवं कार्य्यं मृदुलोहमयं तथा । स्फुटितं चाविद्धं भुग्नं व्रणसाधितं तथा । मृदुलोहे- नचारब्धे मन्त्रिणो मरणं भवेत् । व्रणेनापि नृपद्रोही रेखाया घातकी भवेत् । भार्य्या माता तथा पुत्रो म्रियते खण्डितेन च । ह्रस्वेन लाघवं लोके दीर्घतापि कुलच्छिदा । अन्यवस्त्रोद्भवेनापि सम्भवेन्मरणं ध्रुवम् । पञ्चाशदङ्गुलं खड्गं त्रिशिखञ्च सुरेश्वरि ! । देवप्रकारयेत्खड्ग- मासु सिद्धिफलप्रदम्" । अस्यते क्षिप्यते अस-इन् । २बाणे "तिष्ठ मल्लोऽसिपथान् कल्पयन्त्यन्तरा स्वधीभिः" काव्या० २०।७।१ । "असे श्वासस्य पथ मार्गान्" कर्क० त्रि० । ४क्षिप्ते च्छगराड़ । [हेम० ।

असिक न० असि—शश्लाया चन् । अधरचिवुकयोर्मध्यभागे—

असिक्नी स्त्री सो—क्त सिता वोयादौ शुभ्रा जरती तद्भिन्ना अवृद्धा क्नादेश ङीप् च । अन्तःपुरचारिण्यामवृद्धायां १प्रेष्यायाम्, २नदीभेदे च । ३रात्रौ मेदि० तस्याश्च कृष्ण- तेजःशून्यतया असितत्वात् तथात्वम् "त्वचमसिक्नीं भूमनो दिवस्परि" ९।७३।५। "स्वञ्चिया विश्वायच- सिक्नीरसमाना" ऋ० ७।५।२ । असिक्नीरसितवर्णा राजस्य" भा० वीरस्य प्रजापते ४कन्याभेदे । "असिक्नी- मावहत् पत्नीं वीरणस्य प्रजापतेः" इति हरि० २अ० । "छन्दसि क्नमेके" वार्त्ति० उक्तेः छन्दस्येवाय क्नादेश लोके तु क्वचित् । "असिक्नी स्यादवृद्धायामित्यमरः" ।

असिगण्ड पु० असि क्षिप्तो गण्डो यत्र । गल्लोपधाने ।

असिजीविन् पु० असिना तद्व्यापारेण जीवति जीव—णिनि । शस्त्रव्यापारेण युद्धादिनाजीविकावति विप्रस्य तथात्वे नि- न्द्यत्वम् "असिजीवी मसीजीवी काण्ड पृष्ठश्च याजकः" इत्युक्ते ।

असित पु० सित शुभ्र विरोधे न०त० । १शुभ्रवर्णभिन्ने तद्वि- शिष्टे कृष्णवर्णे। २तद्वति त्रि० । ३कृष्णपक्षे पु० । ४नीलोषध्यौ अन्तःपुरचारिण्यामवृद्धायां ५प्रेष्यायाञ्च स्त्री ङीप् कृष्णवर्णपरतया क्नश्च असिक्नीत्येव । "असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्" पुष्पदन्तः "नन्तुमवव्ययनासि- तम्" ऋ० ४,१७,४। ५यमुनायां तस्याः कृष्णवर्णत्वात् तथात्वम्

[illegible] "[illegible]" [illegible] । [illegible] ।

[illegible] [illegible] १८ [illegible] ।

"[illegible]" [illegible] ।

[illegible]

असितार्चिस् पु॰ [illegible] [illegible] ।

असितगिरि पु॰ [illegible] । [illegible] ।

[illegible] ।

असितपीत पु॰ [illegible] ।

असितफल पु॰ [illegible] ।

असितमृग पु॰ [illegible] ।

असितांशुकेशर पु॰ । [illegible] ।

असिताक्ष [illegible] । [illegible] ।

असितार्चिस् पु॰ [illegible] । [illegible] ।

असितासु पु॰ [illegible] ।

असितास्मद् [illegible] । [illegible] ।

[illegible] "[illegible]" [illegible] ।

असिद् त्रि॰ [illegible] । [illegible] ।

[illegible] ।

असितोत्पल न॰ [illegible] । [illegible] ।

असितोपल पु॰ [illegible] । [illegible] ।

असिदंष्ट्र पु॰ [illegible] । [illegible] ।

असिद्ध त्रि॰ [illegible] । [illegible] ।

"[illegible]" [illegible] ।

असिद्धि स्त्री॰ [illegible] ।

[illegible] ।

[illegible] ।

[illegible] ।

कार्य्यसिद्धेः प्रथिमावहम्" मा सू० ।

असिधारा स्त्री ६त० । खड्गस्य तीक्ष्णाग्रभागे । "असिधारापरिहृत काम भग्नस्य तेन ते" । शरगण इव टज्ज्भग्नदैत्यासिधारैः" इति च रघु ।

असिधाराव्रत न० असिधारायां स्थितिरिव दुष्करं व्रतम् । असिधारास्थिति तुल्यदुष्करे व्रते असिधारायां स्थितौ मनाक् स्खलने यथा नाश एवं मनाक्स्खलने यत्रानिष्ट, तादृशे व्रते तच्च यादवेन दर्शितं यथा । "युवा युवत्या सार्द्धं यन् मुग्धा भर्त्तृवदाचरेत् । अन्तर्निवृत्तसङ्गः स्यादसिधाराव्रतं हि तत् "असिधाराव्रतमिदं मन्ये यदरिणा सह संवास" इति० सता केनोद्दिष्टं विपुलमसिधाराव्रतमिदम्' नीति ।

असिधाव पु० असिं खड्गं धावयति मार्ज्जयति धाव-अण् । शस्त्राणां मार्ज्जनकरे । स्त्रियाम् । असिधावकोऽप्यत्र ।

असिधेनुका स्त्री असिर्धेनुरिव यस्याः सा कप् । असिर्धेनुतुल्यत्वेन तद्वत्तनुत्वायाम् छुरिकायाम् । कप्रभावे असिधेनुरप्यत्र ।

असिपत्र पु० असिरिव तीक्ष्णं पत्रमस्य सा कप् । १इक्षुदण्डे "जात तमालान्यसिपत्रवधम्" रघु । २गुरुमामकवृक्षे च असे पत्रमिवाच्छादकम् । ३खड्गकोषे न० । असिपत्राकारोऽस्त्यस्य अर्श० अच् । ४इक्षुपत्राकारे ५उभयतोधारे खड्गे च "अत्याक्षीत् सासिपत्रादीमवमासत् परन्धयान्" भट्टिः ।

असिपत्रवन न० असिरिव पत्रमस्य तादृशं वनम् । असिपत्रवने नरकभेदे तत्स्वरूपादि भाग०५स्क०। अन्धतामिस्रादिकमुपक्रम्य "कालसूत्रमसिपत्रवनं सूकरमुख"मित्यादिना नरकभेदान् दर्शयित्वा तत्स्वरूपकारणञ्चोक्तं तत्रैव "यस्त्विह वै निजवेदपथादनापद्यपगतः पाषण्डञ्चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्रासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाषण्डानुगमनफलं भुङ्क्ते" "असिपत्रवनं नाम नरकम् शृणु चापरम् योजनानां सहस्रं वै ज्वलदग्न्यास्तृतावनिः । तप्तासूर्य्यकरैश्चण्डैः कल्पकालाग्निदारुणैः । प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः । तन्मध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते । पत्राणि यत्र खड्गानि फलानि द्विजसत्तम! । श्वानश्च तत्र शबलाश्चरन्त्यामिषलोभिनः । महावक्त्रा महादंष्ट्रा व्याघ्रा इव महाबलाः । ततस्तद्वनमालोक्य शिशिरच्छायमग्रतः । प्रयान्ति प्राणिनस्तत्र तृट्तापपरिपीडिताः । हा तात ! हा मातरिति क्रन्दन्तोऽतीव दुःखिताः । दह्यमानाङ्घ्रियुगलाः धरणिस्थेन वह्निना । तेषां गतानां तत्रासिपत्रश्चापि समीरणः । प्रवाति तेन पात्यन्ते तेषां खड्गास्तथोपरि । छिन्नाः पतन्ति ते भूमौ ज्वलत्पावकसञ्चये । लेलिह्यमाने चातीव व्याप्ताशेषमहीतले । सारमेयास्ततः शीघ्रं शातयन्ति शरीरतः । तेषां खण्डानि रुदतामदन्त्यानभीषणाः । असिपत्रवनं तात ! मयैतत् परिकीर्त्तितम् इति मार्क० पु० । "असिपत्रवनं चैव लौहदारकमेव च" मनुः ।

असिपत्रव्रत न० अश्वमेधे कर्त्तव्ये व्रतभेदे । [जलजन्तुभेदे ।

असिपुच्छ पु० असिरिव धारायुक्तः पुच्छोऽस्य । शिशुमारे

असिपुत्रिका स्त्री असेः पुत्रीव स्वार्थे कन् ह्रस्वे अत इत्त्वम् । छुरिकायाम् । कनभावे असिपुत्रीत्यप्यत्र ।

असिमेद पु० असिरिव तीक्ष्णः मेदो निर्यासो यस्य । विट्खदिरे

असिर त्रि० अस+क्षेपे किरच् । क्षेपके । "य ऋष्व आसिरेण ऋञ्जते" ऋ० ८,७६,४ ।

असिलोमन् पु० असिरिव तीक्ष्णं लोमास्य । दनौ पुत्रभेदे । "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारते" त्युपक्रम्य "असिलोमा च केशी च दुर्ज्जयश्चैव दानवः" भा०आ०प० ६५ अध्या० हरिवंशे तु "अभवन् दनुपुत्राश्च शतं तीव्रपराक्रमाः" इत्युपक्रम्य शतपुत्रमध्ये "असिलोमा च केशी च शठश्च बलकोऽमदः" इत्युक्तम् । "असिलोमा पुलोमा च वाष्कलः प्रमदोऽमदः" इति च हरि० । स च देवासुरयुद्धे वायुना सह युयुधे "असिलोमाथ बलिना मारुतेन महाहवे" हरि० २४४ अध्या० । त्रिविक्रमावसरे च स हरिणा सह युयुधे विष्णुना हतश्च "असिलोमा हरिश्चैव जग्मतुर्वै परस्परमित्युपक्रम्य १६१अध्या० "विप्रचित्तिः शिवः शङ्कुरित्युपक्रम्य च "असिलोमा पुलोमाचेत्यादिना बहून् दैत्यान् युयुधानानभिधाय" "प्रमथ्य सर्वान् दैतेयान् पादहस्ततलैः प्रभुः । जहार त्रिदिवं देवस्त्रिभिर्विक्रमणैर्हरि" हरि० २६२ अ० वामनेन तद्धननमुक्तम् । "असिलोम्नोऽप्यहन्ता वै तथा रावणनाशन" विष्णुस्तव ।

असिहत्य त्रि० असिना हत्य भावे हन-भा० क्यप् ३त० । खड्गेन हननीये । भवादौ अण् अनुमतिका० द्विपदवृद्धि आसिहात्य ।

असिहेति पु० असिर्हेतिः साधनमस्य । खड्गेन युद्धकर्त्तरि ।

असु पु० असते क्षिप्यते अस-उन् । १चित्ते । कर्त्तरि उन् ।

[illegible]

मधु [illegible]

मधुकर त्रि [illegible]

मधुक न [illegible]

मधुक्रम त्रि [illegible]

मधुग्रप [illegible]

मधुधारण न [illegible]

मधुच्छन्द त्रि [illegible]

मधुघ्न त्रि [illegible]

मधुमत् त्रि [illegible]

मधुमत् त्रि [illegible]

मधुर [illegible]

[illegible]

ह्रदस्तथा । संह्लादपुत्र सुन्दश्च निसुन्दश्चैव तावुभौ । ह्रदस्य पुत्रो ह्यायुर्वै शिवि कालस्तथैव च । विरोचनश्च प्राह्लादिर्बलिर्जज्ञे विरोचनात् । बलेः पुत्रशतन्त्वासीद्बाणज्येष्ठं नराधिप । धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापन । कुम्भनाभो गर्द्दभाक्ष कुक्षिरित्येवमादय । बाणस्तेषामतिबलो ज्येष्ठः पशुपतिप्रिय । पुराकल्पे हि बाणेन प्रसाद्योमापतिं प्रभुम् । पार्श्वतो विहरिष्यामि इत्येवं याचितो वर । बाणस्य चेन्द्रदमनो लोहित्यामुदपद्यत । गणास्तथा सुरा राजन् शतसाहस्रसम्मिता । हिरण्याक्षसुता पञ्च विद्वांस सुमहाबला । झर्झर शकुनिश्चैव भूतसन्तापनस्तथा । महानाभश्च विक्रान्त कालनाभस्तथैव च । अभवन् । दनुपुत्राश्च शत तीव्रपराक्रमा । तपस्विनो महावीर्य्या प्राधान्येन निबोध तान् । द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिरा प्रभु । शङ्कुकर्णो विराधश्च गवेष्ठी दुन्दुभिस्तथा । अयोमुख शम्बरश्च कपिलो वामनस्तथा । मरीचिर्म्मघवांश्चैव इरा गर्गशिरा वृक । विक्षोभणश्च केतुश्च केतुवीर्य्यशतह्रदौ । इन्द्रजित्सर्व्वजिच्चैव वज्रनाभस्तथैव च । महानाभश्च विक्रान्त कालनाभस्तथैव च । एकचक्रो महाबाहुस्तारकश्च महाबल । वैश्वानर पुलोमा च विद्रावणमहाशिरा । स्वर्भानुर्वृषपर्व्वा च तुहुण्डश्च महासुर । सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरि । असिलोमा च केशी च शठश्च बलको मद । तथा गगनमूर्द्धा च कुम्भनाभो महासुर । प्रमदो मयश्च कुपथो हयग्रीवश्च वीर्य्यवान् । वैसृप स विरूपाक्ष सुपथोऽथ हराहरौ । हिरण्यकशिपोश्चैव शतमायश्च शम्बर । शरभ शलभश्चैव विप्रचित्तिश्च वीर्य्यवान् । एते सर्व्वे दनो पुत्रा कश्यपादभिजज्ञिरे । विप्रचित्तिप्रधानास्ते दानवा सुमहाबला । एतेषां यदपत्यन्तु न तच्छक्य नराधिप । प्रसंख्यातु महीपाल । पुत्रपौत्रमनन्तकम् । स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्रयम् । उपदानवी हयशिरा शर्म्मिष्ठा वार्षपर्व्वणी । पुलोमा कालका चैव वैश्वानरसुते उभे । बह्वपत्ये महावीर्य्ये मारीचेस्तु परिग्रह । तयोः पुत्रसहस्राणि षष्टि दानवनन्दनान् । चतुर्द्दश शतानन्यान् हिरण्यपुरवासिन । मारीचिर्जनयामास महता तपसाऽन्वित । पौलोमा कालकेयाश्च दानवास्ते महाबला । अवध्या देवतानाञ्च हिरण्यपुरवासिन । कृता पितामहेनाजौ निहता सव्यसाचिना । प्रभाया नहुष पुत्र सृञ्जयश्च शचीसुत । पूरुर्जज्ञेऽथ शर्म्मिष्ठा दुष्मन्तमुपदानवी । ततोऽपरे महावीर्य्या दानवास्त्वतिदारुणा । सिंहिकायामथोत्पन्ना विप्रचित्ते सुतास्तथा । दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमा । सैंहिकेया इति ख्यातास्त्रयोदश महाबला । वंश शल्यश्च बलिनौ नभश्चैव महाबल । वातापिर्नमुचिश्चैव इल्वल खसृमस्तथा । आञ्जिको नरकश्चैव कालनाभस्तथैव च । राहुर्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दन । शुक पोतरणश्चैव वज्रनाभश्च वीर्य्यवान् । मूकश्चैव तुहुण्डश्च ह्रादपुत्रौ बभूवतु । मारीच सुन्दपुत्रश्च ताड़काया व्यजायत । एते वै दानवा श्रेष्ठा दनुवंशविवर्द्धना । तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रश । संह्रादस्य तु दैत्यस्य निवातकवचा कुले । समुत्पन्ना सुमहता तपसा भावितात्मन । तिस्र कोट्य सुतास्तेषा मणिमत्यां निवासिनाम् । तेऽप्यवध्याश्च देवानामर्ज्जुनेन निपातिता । षट्सुता सुमहासत्त्वास्ताम्रायाः परिकीर्त्तिता" । "वासेन यस्य जनिताऽसुरभीरपश्री" नैष० । "समवृत्तिरेषासुर इत्युपेयुषा" माघ । "तत कानीयसा एव देवा ज्यायसा असुरा, त एषु लोकेष्वस्पर्द्धन्त ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति" छा० उ० "असुषु विष्वग्विषयासु प्राणनक्रियासु रमन्ते रम्–ड । 8 स्वाभाविक्या तमआत्मिकायामिन्द्रियवृत्तौ । "देवासुरा वै यत्र संयेतिरे" छा० उ० । देवाश्चासुराश्च देवादीव्यतेर्द्योतनार्थस्य रूप शास्त्रोद्भासिता इन्द्रियवृत्तय । असुरास्तद्विपरीता स्वेष्वेवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात् स्वाभाविक्यस्तमआत्मिका इन्द्रियवृत्तय एव" भा० । स्वार्थे प्रज्ञा० अण् आसुर तत्रार्थे । तस्येदम् अण् आसुर तत्सम्बन्धिनि त्रि० स्त्रियां ङीप् "आसुरीरात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्" स्मृति "आसुरीं योनिमापन्ना "गीता । हितार्थे यत् । असुर्य्य । "असुर्य्यानाम ते लोका अन्धेन तमसा वृता" कठ० उ० सुरा सुधा पद्मोत्तत्त्वेनास्त्यस्य अर्श० अच् न० त० । "सुराप्रतिग्रहाद्देवा सुरा इत्यभिश्रुता । अप्रतिग्रहणात्तस्या दैतेयाश्चासुरा स्मृता" इत्युक्तनिर्व्वचनादपि तेषामसुरत्वम् । जातौ ङीप् असुरी "असुरी लिङ्गी देवानां मास समसमावेट्" अथ० । 8 कार्य्ये तस्यासुराश्रयत्वात्तथात्वम् । मेघे पु० निरु० । [रक्षणीये ।

असुरच त्रि० सुखेन रक्ष्यते सु+रक्ष–खल् न० त० । सुखेना-

असुरराज् पु० असुरेषु राजते राज् क्विप् ७त० । प्रह्लाद-

पौने बलिरूपे असुराणामयमाने च मा चा च गमादुपलक्षणे। "इतो वाडवमीश दुर्गति रसातलम्। दानवादयश्च निवसन्ति असुरं पुरी"।

असुररिपु पु० असुराणां रिपुः। दानवशत्रौ विष्णौ। तत्र रात्रिभवत्वोऽप्यम। [हलायुधे

असुरसा स्त्री न सह रसो यस्याः ६ब। (बालदूर्वायाम्)

असुरहन् त्रि असुरं हन्ति-हन् क्विप्। असुरनाशके। "असुरे रिपवो निहतोऽसुरहे ऋ० ७।१८।। स्त्रियां मायासात् ङीप्। असुरघ्नी।

असुरार्य पु० ६त। शुक्राचार्ये। [असुराणां च।

असुराधिप पु० ६त। महासुरेन्द्रे बलिराजे असुर-

असुराह्न न० असुरस्याह्ना वाला यत्र। कांस्ये हैम।

असुर्य त्रि असुराय हितं यत्। असुरहिते यत् असुर्ये च असुरसम्बन्धे परः।

असुवि त्रि सु-ना वि हिंसम् न त। पौरुषविकला करोति "निवहप्यसुवीन्" ऋ० ८।२६।१। असुवीन् प्रत्य पत्ना" ऋ० १।६१।११। "असुवीनां यतिर्योजम् मतवानाम्" भाष्यम्।

असुसम त्रि न सुसमं विरोधे। सुसमे तु नैव प्राप्ते।

असुह पु० असून् मानान् हरति इ-क्विप्। पापे "न वादि वाहकः पाकोदेवाभेद्ययावया" सिता। [ऋत च।

असुक्ष त्रि निरोधे न० १३ मैव व्यादि २०।वाणि-

असुहृद् पु० विरोधे न त। शत्रुहितो रिपौ "असत्तं समामानहृद्गुमख्य बार।

असू स्त्री न सूते सू-क्विप्। वन्ध्यायां स्त्रियाम् "कामिर्देहमयम्" ऋ० १।११२।३। [असूयादेः असूयायाम्

असू(ल)यक न अ(सू)य असूयादे सत् डेयावे बत्व।

असूक्ष त्रि विरोधे नञ्। सूक्ष्मातिरोहित बलादि।

असूत त्रि न त। अप्रसूते। [दोषारोपणयोः।

असूयक त्रि (असू)असूय-ण्वुल्। असूयि-णुच्। गुणेषु

असूया स्त्री असु (असू)-असूयति कण्ड्वा० यक् अच्। परगुणेषु दोषाविष्करणे अन्यत्र वाक्यं दोषारोपकार्ये-गुणत्व। बाध्यकारः ईर्ष्याया अक्षमे- तु। "गुणवुद्धिदोषाणामिर्ष्याः पर बोध यात"। "असूया परगुणेषु दोषाविष्करणम्" वि० धौ।

असूयु त्रि असु(प)-असूया। व वच्। असूयाशीले "सत्तु ते दुरासूयं प्रायच्छामपार्थं" बौधा।

असृज् त्रि पुरी सम्बे पञ्चभावेनातद्वाद भुवो मधि सत्र व च। क्षीमदीति। "असूदि वनि बलः ऋ० ८।१।१। ["असूर्य" शब्दे दृष्टि"यजु० १०।१०

असूर्त त्रि पुरो न दृश्यते न सह गमम्। "वा रि

असूर्यम्पश्या त्रि सूर्यमपि न पश्यति दृश-खश् मुम्। बल यथा। अन्तःपुर दारादिवर्गे रामदारानो "असूर्यम्पश्यता मे दिवयोवरदामेवि? चरि।

असृक्षर पु० असृक् योपिर्त क्षरति क्ष-अच्। शरीरस्थे रक्तादौ अवस्थितिविशेषवर्णं रक्तस्य रक्तरस प्रकीर्ति स्तरे मक्तिम्। तत्र रक्त यथा रक्तर भवु सनोति उच्यते। "रसाद्रक्तं ततोमांसं मांसान्मेद प्रजायते। मेदसोऽस्थि ततोमज्जा मज्ज्ञः शुक्रस्य सम्भवः" भावप्रकाशः यथा त्वचा। तत्राहारात् प्रथमं मानाविधेः। वायुः भेदजात् दृढोऽपि वाति च"। "अस्मामि शरीर गौर रक्त मासि बलन च। वैद्यं पूर्व शरीर वैन सुहारपचादि ह। मौर्य गोदानपूर्वादि वकर शोधनमासम्। सर्व विनिर्गतान्यादि रक्तादि हृ विन्यस्ते। पूर्वमामयकेशादि दीयते मासर्व यथा"। आयायवाद भरतः "मनितमाला श्रमोऽतस रत्यार्थं पूजा"। तत्र निवेश्याद। "शरीरेऽत्र-यस्तस्यादाश्यंश्च धरापस्वतः। आशायान्तु स्तनापयो हि यथामरा" । अस्विचेतिय इति सूरुदीतियानेन प्रस्तावाया वायुना सम्यक्ष्मीमान हर्षिता। मयाप्य पुष्टे। "मौजात्र मायमानाचो सर्व भवति हैयम्। योऽस्य संयवस्थ मासंबाभयस्य इति। तत्रापरत्र मानवर्णं भेदनात्यत्व। भेदइति भेद्याय सर्व विनिर्गि च। तत्र न उच्यते। "भेदेन भेदस्तस्य" अयर्थ च विषमाः इति च व्याहारः। बधुदो सामायाशो सार्व ततो मासादयस्तत्र बधुरय यक्ष्य दौयस्। वर्द्धं च च ह वारयन् ये हाषेशे दुरा विभाष विविध शीरस्या। अथोगुयाधिक व्याहरित्तमीरत्तो तरीर्हि। "विभागं च जाते यरनाश्वतीमया"। तत्राह सम्पाद "यवुचित ययाते यस्यायामविधिनाम्। मौदार्यो निर्षीया याहा वार- वीर्य गौरव चयु" इति। वार ततः पारः मायमपुरा प्रेरितासा विविधमुखाभि। साध्यमादिव्रीहिदोत पुत्रामोदर्शि। भर्त च। "अस यावयदिवे विरयसा आधा मवेति सावयीके यावयिन्नेपका सा व रव्यातो यादित्रधातिमानेन सवायनाया त सूता ये हितोयपदीय इति पौवढे च प्राह। "यथा स्थान

मरुता ग्रहणीमभि नीयते" । ग्रहणीलक्षणमाह "षष्ठी-पित्तधरा नाम पाकना परिकीर्त्तिता । आमपक्वाशयान्तःस्था ग्रहणीत्यभिधीयते" । पित्तधरा पाचकाख्यं पित्तं तदग्न्यधिष्ठानं तद्धारयति । तत्र ग्रहण्यामामाशयपक्वाशयमध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुश्च भवति । तथा च "ग्रहण्याम्पच्यते कोष्ठवह्निना जायते कटुरिति" । अयमर्थः । आहारो ग्रहण्यां कोष्ठवह्निना ग्रहणीस्थितपाचकपित्तेन वह्निना पच्यते पच्यमानः स ग्रहणीस्थितस्य कटुरसस्य पित्तस्य योगात्कटुर्भवति । एतदाहारपाके विशेषमाह । "शरीरं पाञ्चभौतिकम्" तत्र पञ्चसु भूतेषु पञ्चाग्नयः तिष्ठन्ति । उक्तञ्च चरकेण । "भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यतः" । अतोऽग्निपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनोत्तेजितेन शरीरवर्त्तिभूभागाग्निनाहारवर्त्तिभूभागः पच्यते पक्वो भूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते । तथा च सुश्रुते "पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः । विपक्वः पञ्चधा सम्यक्गुणान् स्वानभिवर्द्धयेदिति" । गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थिवादीन् भागानभिवर्द्धयेदित्यर्थः । एवमहोरात्रेण पक्वाहारो मिष्टः कटुश्च मधुरो भवति अम्लस्त्वम्लो भवति । कटुस्तिक्तः कषायश्च कटुर्भवति उक्तञ्च "मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः । कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वस्याहारस्य सारो निगदितो रसः शेषो ग्रहणीस्थो मलद्रवः । मलद्रवस्य जलभागः शिराभिर्बस्तिस्रोतोमूत्रम्भवति । उक्तञ्च "आहारस्य रसः सारः सारहीनो मलद्रवः । शिराभिस्तज्जलं नीतं बस्तौ मूत्रत्वमाप्नुयात् । शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते । समानवायुनानीतं सन्तिष्ठति मलाशये" । तत्र मलाशयेनापानवायुना प्रेरितं मूत्रं मेढ्रभगमार्गेण, पुरीषं गुदमार्गेण शरीराद्बहिर्यातीति उक्तञ्च "मूत्रं कृमपस्थमार्गेण पुरीषं गुदमार्गतः । अपानवायुनाक्षिप्तं बहिर्याति शरीरतः" । उपस्थः शिश्नो भगश्च । रसस्तु समानवायुना प्रेरितो धमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सह मिश्रितो भवति उक्तञ्च "रसस्तु हृदयं याति समानमरुतेरितः । स तु व्यानेन पुविक्षिप्तः सर्व्वान् धातून् विवर्द्धयेत् । केदारेषु यथा कुल्या प्रान्ति विविधौषधीः तथा कलेवरे धातून् सर्व्वान् वर्द्धयते रसः"

रसस्तु तत्र तत्र त्रिधा विभिद्यते । उक्तञ्च चरके "स्थूला एव मलभेदैस्तत्र तत्र त्रिधा रसः । स स्थूलोऽंशः परं सूक्ष्मस्तन्मलो याति तन्मलम्" । अयमर्थः स्थूलोऽंशः स यथास्थितः तिष्ठति सूक्ष्मस्तु यः परं द्वितीयं धातुं याति-तन्मल रसादिमलस्तन्मल शरीरारम्भक तत्तद्धातुमलं यातीत्यर्थः यथा लौकिकाग्निनेक्षुरसः पच्यते तथा शरीरारम्भकस्य रसस्य अग्निनाहाररसः पच्यते पच्यमानः स पञ्चाहोरात्रात्सार्द्धदण्डमेकं च यावत्प्राक्तनरसधातावेव तिष्ठते उक्तञ्च सुश्रुते "स खलु रसस्त्रीणि त्रीणि कलासहस्राणि पञ्चदशकला एकैकस्मिन्धातावेव तिष्ठति" इति । अत्र कलानां त्रिंशता मुहूर्त्तं स च दण्डद्वयात्मकः तथा च भोज "धातौ रसादौ मज्जान्ते प्रत्येकं क्रमतो रसः । अहोरात्रात्स्वयं पञ्च सार्द्धं दण्डं च तिष्ठति" । प्रत्येकम् एकस्मिन्नेकस्मिन्नित्यर्थः ततो यथा पच्यमानादिक्षुरसान्मलो निर्गच्छति । तथा पच्यमानादाहाररसान्मलो निर्गच्छति सः कफः उक्तञ्च सुश्रुते "कफपित्तमलाः खेषु प्रस्वेदो नखरोम च नेत्रविट्चक्षुषः स्नेहो धातूनां क्रमशो मलाः । खेषु मलः कर्णादिस्रोतोमलः । स च कफः प्राणानिलप्रेरितो धमनीमार्गेण शरीरारम्भकं क्लेदनाख्यं कफं गत्वा पुष्णाति । तत्र सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मो भागः शरीरारम्भकं रसं पोषयति सकलशरीराधिष्ठानेन व्यानवायुना प्रेरितो धमनीभिः सञ्चरन् पोषणस्नेहनजठरानलोद्दीपनसन्तापनिवारणादिभिर्गुणैः सकलं पुष्णाति शरीरम् तत्र स्थूलोभागः प्राणवायुना प्रेरितो धमनीमार्गेण शरीरारम्भकस्य रक्तस्य स्थानं गत्वा यकृत्प्लीहरूपञ्च गत्वा तेन सह मिश्रितो भवति । ततः प्राक्तनरक्तस्याग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावत्प्राक्तनरक्तधातावेव तिष्ठति ततो यथाग्निना पुनः पुनः पच्यमानादिक्षुविकारात् वारंवारं मलः निर्गच्छति । तथा पुनः पुनः पच्यमानादाहाररसात् प्रतिवारं मलः निर्गच्छति तत्र रक्ताग्निना पच्यमानान्मलः पित्तं निर्गच्छति । तच्च पित्तं समानवायुना प्रेरितं धमनीमार्गेण शरीरारम्भकं पाचकाख्यं पित्तं गत्वा पुष्णाति । ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः । स्थूलः सूक्ष्मश्च । तत्र सूक्ष्मो भागो रञ्जकाख्येन पित्तेन रक्तीकृतः शरीरारम्भकं रक्तं पोषयन् व्यानवायुना प्रेरितो धमनीभिः सञ्चरन् सकलशरीरगतानि रुधिराणि पुष्णाति । ततः स्थूलो भागो व्यानवायुना-

[illegible] ।

असुररिपु पु० [illegible] । [illegible]

असुरसा स्त्री० [illegible] । (वाचस्पत्यम्)

असुरहन् त्रि० [illegible] ।

[illegible]

असुराधिप पु० [illegible] ।

असुराह्व न० [illegible] ।

असुर्य्य त्रि० [illegible] ।

[illegible]

असुख त्रि० [illegible] ।

[illegible]

असूया स्त्री० [illegible] ।

असृज् न० [illegible] ।

[illegible]

असौ [illegible] ।

असंस्थित त्रि० [illegible] ।

असंसर्ग पु० [illegible] ।

[illegible]

शरीरे शब्दार्चिर्जलसन्तानवत् त्रिधा । सञ्चरत्यसहरूपोऽयं नित्यमेव हि देहिनाम्" । अस्यायमभिप्रायः पुरुषास्तीक्ष्णाग्नयो मध्यमाग्नयो मन्दाग्नयश्च भवन्ति तत्र तीक्ष्णाग्नीनां रसः शब्दसन्तानवच्छीघ्रं सञ्चरति । मध्याग्नीनामग्निसन्तानवन्मध्यवेगेन सञ्चरति । मन्दाग्नीनां जलसन्तानवन्मन्दं सञ्चरति । तेन मासेन रसः शुक्रं भवति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तं तीक्ष्णाग्नीनां तु रसः किञ्चिदूनेन मासेन शुक्रं भवति । मन्दाग्नेस्तु किञ्चिदधिकेन मासेनेति सिद्धान्तः" ।

असृग्धरा स्त्री असृक् धरति धृ+अच् । शोणितधारिण्यां त्वचि । अपि असृग्धाराप्यत्र ।

असृग्वहा स्त्री असृक् शोणितं वहति वह+अच् । शोणितवहायां नाड्यां तद्विवरणं सुश्रुते "सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः । द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्य्यक् च । भवन्ति चात्र । यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् । नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥ नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता । सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः ॥ तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं १७५ भवति तावत्य एव १७५ पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीह्नोरेवमेतानि सप्त सिराशतानि ॥ तत्र वातवाहिन्यः सिराः एकस्मिन् सक्थ्नि पञ्चविंशतिः । एतेनेतरसक्थिबाहू च व्याख्यातौ ॥ विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः श्रोण्यामष्टौ । द्वे द्वे पार्श्वयोः षट् पृष्ठे तावत्य एव चोदरे दश वक्षसि ॥ एकचत्वारिंशज्जत्रुण ऊर्द्ध्वं, तासां चतस्रो ग्रीवायाम् । कर्णयोश्चतस्रः । नव जिह्वायां । षट् नासिकायां । अष्टौ नेत्रयोः । एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम् । एष एव विभागः शेषाणामपि । विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि । स्वाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि ॥ यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः । तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥ नहि वातं सिराः काश्चिन्न पित्तं केवलं तथा । श्लेष्माणं वा वहन्त्येता अतः सर्व्ववहाः स्मृताः ॥ प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम् । ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः ॥ तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः । पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात् ॥ असृग्वहास्तु रोहिण्यः सिराः नात्युष्णशीतलाः"

मादसम्" । भद्र । "खषारन्त्याक्षणवे" । षन् । "ग्रीवानं मेयम्" । "वर्णानान्तणतिनितान्तानाम्" १० । आदिरु-दात्त, एत हरिण:, शितिं, पृश्नि, हरित्। "हुखान्तस्य हुखमन्त्र ताच्छील्ये" ११ । हृस्वं हुखा-न्तस्यादिभूत हुखमुदात्त स्यात् । मुनि: । "वृक्षस्यादे-मनस्य" १२ । आदिरुदात्त:, "तस्य नाम्न" देवने तु "अक्षैर्मा दीव्य"।"वर्ण स्यासमद्योतने"१३। अर्द्धो ग्राम-स, समेऽथके तु षड्ड पिप्पल्या' । "पीतद्र्वर्थानाम्" १४ । आदिरुदात्त, पीतद्रु, सरल । "ग्रामा-दीनाञ्च" १५ । ग्राम, सोम, याम' । "लुमन्तस्यो पमेयनामधेयस्य" १६ । चञ्चे व चञ्चा, स्फिगन्तस्येति पा-ठान्तरम् । स्फिगिति लुप प्राचा संज्ञा । "न हृक्षपर्वत-विशेषव्याघ्रसिंहमहिषाणाम्" १७ । एषामुपमेयनाम्ना-मादिरुदात्तो न । ताल इव ताल, मेरुरिव मेरु, व्याघ्र, सिंह, महिष । "राजविशेषस्य यमन्वा चेत्" १८ । युमन्या इद्ध', आङ्ग उदाहरणम् । वङ्गा प्रत्यु-दाहरणम् । "स्त्रीविषयवर्णाच्युपूर्व्वाणाम्" २० । एषान्त्रयाणामाद्युदात्त, स्त्रीविषय, मल्लिका, वर्ण, श्येनी, हरिणी, अणुशब्दात् पूर्वोऽस्येयान्ते अनु-पूर्वा, तरञ्जु । "शकुनीनाञ्च लघुपूर्वम्" २१ । पूर्व लघु उदात्त' स्यात्, कुक्कुट, तित्तिरि, । "नर्त्तुप्राख्या-ख्यायाम्" २२ । यथालक्षण प्राप्तमुदात्तत्वञ्च, वसन्त, ककुभ । "धान्यानाञ्च वृद्धखान्तानाम्" २३। आदिरु-दात्त, कान्तानाम्, श्यामाका, यान्तानाम्, राज-माषा' । "जनपदशब्दानामषान्तानाम्" २४ । केकय, "ह्रयादीनामसंयुक्तलान्तानामन्त पूर्व्वं वा"२५। हयिति हल संज्ञा । पललम्, शललम्, ह्रयादीना किम् एकल असंयुक्तेति कि मल्ल । "इगन्तानाञ्च द्व्यषाम्" २६। आदिरुदात्त:, कपि एतानि २पादस्थानि । "सक-रदरकुपारेवतवितस्तेक्ष्वार्च्चिद्राचाकालोमाकाशायुलवा का-शीनामादिर्वा"२,८,। एषामादिर्द्वितीयो वा उ-दात्त' । सकर वरुड ।"छन्दसि च"१०। अमकराद्यर्थ आरम्भ' । लघ्वादुमारादादिर्द्वितीयम् वा उदात्त मेयम् । "कटेमादीनाञ्च" ११ । आदिर्द्वितीय वोदा-त्त: । "सुगन्धितेजनस्य ते वा" १२ । आदि द्वितीय ते शब्दे इति पर्य्यायेण वोदात्ता । "नप फलान्ता-नाम्"१३। आदिर्द्वितीय वोदात्तम् । राजादनफलम् । "ईयान्तस्य हलादेरादिर्वा" १४ । हलीषा लाङ्गलीषा । उशीरदाशेरकपालपलाशशैवालश्यामाकशरीरशरावहृदय-हिरण्यारण्यापत्यदेवराणाम्" १९ । "एषामादिरुदात्त: स्यात् । "महिष्याषाढयोर्ज्जायेष्टकाख्या चेत्"२० । आदि रुदात्त, "महिषी जाया"आषाढा उपदधाति । एतानि ३पादस्थानि । "निपाता आद्युदात्ता" फि० ४,१२ । स्वाहा "उपसर्गाश्चाभिवर्ज्जम्" फि० ४,१३ । तथा च माणिनिशान्तनवाचार्य्यादिभिर्यस्यादेरुदात्तत्व' विहित ते शब्दा लोके वेदे च आद्युदात्ता भवन्ति ।

आद्यून त्रि० आ+दिव–क्त ऊट् नत्वञ्च । औदरिके (पेटुक) जिगीषावर्ज्जिते । जिगीषायान्तु न नत्वम् । आद्यूत । जिगीषया देवनकर्त्तरि । [मायधिषेयमर्यन्ते ।

आद्योपान्त पु० आद्यावधि उपान्त अन्तपर्य्यन्त । प्रथ-

आधमन न० आधीयते आ+धा–कमनन् । मन्धकदाने आधौ, । "योगाधमनविक्रीत योगदानप्रतिग्रहम् । यस्य वाप्युपधि पश्येत्तत् सर्व विनिवर्त्तयेत्" स्मृति: "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्" स्मृति० एकोऽन्यमीष सर्वत्र दानाधमनविक्रये" कात्या०स्मृति: आधिशब्देऽस्य विवृति ।

आधमर्ण्य न० अधमर्णस्य भाव कर्म वा ष्यञ् । ऋणग्रहणे अवश्यदेयद्रव्यस्वामित्वे"आवश्यकाधमर्ण्ययोर्णिनि "पा० ।

आधर्म्मिक त्रि० अधर्मं चरति ठक् । अधर्मशीले दैवगात् अधर्मानुष्ठातरि तु भाव साधुत्वम् । अधार्म्मिक इत्यत्र तु न धार्म्मिक इति विग्रह इति भेद ।

आधर्ष पु०आ+धृष–भावे घञ्। १तिरस्कारे२बलात्पीडने च

आधर्षण न०आ+धृष–भावे ल्युट्। १आधर्षे २बलात्पीडने।

आधर्षित त्रि० आ+धृष–क्त अर्थयास्ये इट् गुणश्च । १अवमा-नित २तिरस्कृते ३बलात्कारेणाभिभूते च "स्तुत्याचारव्य-पेतेन मार्गेणाधर्षित परै' । आवेदयति चेद्राज्ञे व्यवहा-रपद हि तत्' या० स्मृति भाष्येऽपि आङ्गष्ट इत्येव ।

आधर्ष्य त्रि० आ+धृष–णिच्–यत् । १अवमाननीये २बलात् पीडनीये ३दुर्धर्षे च भावे यत् । ४ दुर्धर्षत्वे न०। "आध-र्षं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् । विवादे साक्षिण-स्तत्र प्रष्टव्या प्रतिवादिन" नार० । "आधर्ष्य दुर्धर्षत्वम्" व्य०त०रघु०।

आधान न० आ+धा–भावे ल्युट् । संस्कारपूर्व्वक वह्न्यादे स्थापने १अग्न्याधाने २गर्भाधाने च । "आधाने सोम-पाने च वपन सप्तसु स्मृतम्" प्रा०त०पु०"भार्य्यायै पूर्व्व-मारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि। पुनर्दारक्रिया कुर्यात

मप्यदोषमाह मदनरत्ने सुमन्तुः "पिता यस्य तु नाधत्ते कथं पुत्रस्तु कारयेत्। अग्निहोत्रेऽधिकारोऽस्ति शङ्खस्य वचनं यथेति" नाधानं कृतमित्यर्थः एतदाज्ञायामेवेति हेमाद्रिः यत्तु "पितुः सत्यप्यनुज्ञाने नादधीत कदाचनेति" तत्सत्यधिकारे ज्ञेयम्"। एवं स्मृतिसूत्रयोराधानाऽनाकरणे प्रत्यवायश्रवणादाधानं नित्यमेव। एतेन कलिवर्ज्येषु आदित्यपुराणेऽग्निहोत्रस्योत्कीर्त्तनदर्शनेन गौडानां तदनाचरणमनाचार एव स्मृतेस्तत् पुराणस्य दुर्बलतया स्मृतिविहिताधानस्य बाधकत्वायोगात् "नैवानाहिताग्निर्म्रियेतेति" श्रुतेः सर्व्वापेक्षया बलवत्त्वाच्च। तेन मृत्युकालात् पूर्व्वमप्याधानं कर्त्तव्यमिति प्रतीयते व्यक्तं भविष्यति चैतदुपरिष्टात्। आधानस्वरूपादिकम् आश्व०श्रौ०सू० नारायणीयवृत्त्योर्दर्शितं यथा "अग्न्याधेयप्रभृतीन्याह वैतानिकानि" सू० १२। अग्न्याधेयप्रभृतिरादिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि अग्निहोत्रादीनि कर्माणि, आधानं कृत्वैव कर्त्तव्यानीत्यर्थः। तत्र हेतुमाह, वैतानिकानीति। वितानेषु भवानि वैतानिकानि, वितानसाध्यानीत्यर्थः। वितानशब्दोऽस्मिन् सूत्रे भावसाधनोऽग्नीनां विस्तारवाची, पूर्वस्मिंस्त्वधिकरणसाधनोऽग्निहोत्रादिकर्मवचनः। एतदुक्तं भवति, गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि, अग्नयस्त्वाधानसाध्याः, तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्मणाम्। बहुवचनं सर्व्वश्रौतपरिग्रहार्थं सर्वाणि श्रौतान्याधानादूर्द्ध्वमेव कर्त्तव्यानि न किञ्चिदपि, श्रौतमाधानादर्व्वागित्यनेन प्रकारेणाधानस्य कर्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात् साधितं भवति। तद्यदि कर्मार्थं स्यात् प्रति कर्म क्रियेत, तत्र कस्यचित् परस्तादपि स्यात्, यस्य परस्तादाधानं स्यात् तस्याग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः श्रामणत्वादयो न भवन्ति, अवकीर्णिनः पश्वाद्यर्थं चाधानं न कर्त्तव्यं, साधितं भवति न परस्तात्" इति। "अग्न्याधेयम्" १,२,८, सू० प्रथमप्राप्तमाधानमुच्यते। विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैर्मन्त्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थं यदङ्गाराणां निधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयमग्न्याधेयं, तत्कर्तव्यमित्यर्थः इहास्ति। कस्मिन् काल इत्याह। "कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः" १० सू०। एतेषां कस्मिंश्चित् ११। वसन्ते पर्वणि ब्राह्मण आदधीत" १२। ग्रीष्मवर्षाशरत्सु च क्षत्रियवैश्योपकुष्टाः १३। यस्मिन् कस्मिंश्चिदृतावादधीत" १४। सूत्राणि एषा नारायणीया वृत्तिः "फल्गुनीष्विति पूर्वे उत्तरे च गृह्येते, अविशेषाद्बहुवचनाच्च। प्रोष्ठपदास्तूत्तरे एव। अत सप्त एतानि नक्षत्राणि, तेषामेकस्मिन्नक्षत्रेऽग्न्याधेयं कर्तव्यमित्यर्थः १०। एतेषां कस्मिंश्चित् पर्वणि। एवमेतत्सूत्रमर्थतो द्रष्टव्यम्। उत्तरञ्च सूत्रं "वसन्ते पर्वणि ब्राह्मण आदधीत" इति। एवं कृते सर्वमनुगुणं भवति एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि चाग्न्याधेयं कर्तव्यमितीदं सूत्रं पर्वनक्षत्रसमुच्चयमग्न्याधेयस्य कालत्वेन विदधाति। पूर्वसूत्रन्तु केवलनक्षत्राणामेवाधानसम्बन्धं विदधाति। अतो द्वौ पक्षौ स्तः। समुच्चयस्तत्र प्रथमः कल्पः। तदसम्भवे केवलनक्षत्रमेवेति विनिवेशो युक्तः'। इदं कल्पद्वयं सोमाधानवर्जितेषु सर्व्वेष्वाधानेषु भवति ११। इदमपि सूत्रमर्थत एव भवति। अनेन वसन्ते ब्राह्मणगुणकमाधानं विधीयते १२। वैश्यक्षत्रकर्मोपजीवी उपकुष्ट इत्युच्यते। अस्मिन् सूत्रे त्रीण्याधानानि विधीयन्ते। ग्रीष्मे क्षत्रियगुणकं, वर्षासु वैश्यगुणकं, शरदि उपकुष्टगुणकञ्च। एते वसन्तादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षट्। वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराः। ते च चैत्रमासमारभ्य द्वौ द्वौ मासावृतवः। वसन्तादयो मासाश्चैत्रादय एव १३। आदधीतेति स्थिते पुनरादधीतेतिवचनम् आपत्कल्पोऽयमाधानविधिरिति दर्शयति। अत्यापदि सम्पूर्णेषु सर्व्वेष्वृतुषु आधानं कर्तव्यं 'नैवानाहिताग्निर्म्रियेतेति'। इदञ्चापरमाधानं, पूर्वोक्तानि चत्वारि, तेषु सर्वेषु पर्वनक्षत्रविधय उपसंहर्त्तव्याः, न पर्व्वर्त्तुस्वातन्त्र्येणाधानस्य कालविधयो भवेयुः। अत एव सूत्रकारः पर्वनक्षत्रविधीनामृतुविधिभिः सम्बद्धानामेवाधानकालताप्रदर्शनार्थमेवैतेषां कस्मिंश्चिद्वसन्त इति पर्वनक्षत्रसमुच्चयविधिपरे सूत्रे उत्तरसूत्राय पठितव्यम् ऋतुशब्दं व्यतिषज्य पठितवान्। पर्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च नास्ति, तत्रैव तयोरन्तर्भावदर्शनादिति १४। "अश्वत्थाच्छमीगर्भादरणी आहरेदनेवमायः" १६। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं त्वाहरामि ब्रह्मणा यज्ञियैः केतुभिः सहेति, पूर्णाहुत्यन्तमग्न्याधेयम् १७। शम्या गर्भः शमीगर्भः। शमीगर्भादश्वत्थादरण्याहरणं कुर्यात्। तच्चाधानार्थम्, आहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानो-

त्मनेव यत्न आहरेत् । अपचेतव्या ब्रह्मीत्येव आधा । अवदानगीर्णि कृत्वा न कृतीभिति गम्यते मनाम अकृतविकारोण ध्यानं ।१। पूर्वाङ्गविरुद्धे तत्र तत् पूर्वोक्तमनम्, अन्यथार्थ्य कोमलम् । तद्वाम्याणेन तद्वत्यावदादि पूर्वोक्तमत्र उपनीयते । यत्र पुनश्च प्रयोजनं पूर्वोक्तमते आहितायामिमाहितः । यदपि चेत् । प्रकाशितमधातम् । "अनया इदमर्थाया" इति प्रस्तुत 'यदन आज्यभोजिनमारभीय' इत्येवमादीनि च-रुमादिरूपाणि आज्यादिक्रमेणापि कर्तव्यादिविधानं सूचानि विदधिमाराणि आधानानि भिन्नान "तयोः रत्नी आहरेत्, तस्माद्वा अहरेत् अम्प्रादपनादि कुर्यात्, वैश्वदेव गौरेत् आज्योरमितयोजयमितं विद-ध्यात्, वनित् मन्त्रोर्थं यजेत्, यथेव आदध्यात् आवस्थेन रुथास्तविकल्पत्, आज्योदितिबद्धरुतो यथा दोष यविना गार्ह्यपत्यादौ आधात्, तन यावित्, न मिव आदध्यात् अग्निहोत्र अनुग्रहात्, पूर्वोक्तादि सुप्रधात् तत आधानयथायाती विदधेत् तदवरेत्, तद्धर्मादिवर्णाद्धमाधामां आधायां यत्किंचित् कार्ये तत आज्यभीमि निर्विशेत् तदाकारानि कर्तीमि इति १०। तत्र विनापादद्वत्ते गौतमवचने अवधारणे कार्या प्रायश्चित्तेवेदि याज्ञवल्क्यवचना यथा आधानम् प्राय-श्चित्तेवादिति याते तु अस्माभिरपि अप्राधानात् यदि कर्ता इति गौतम् वचनैः यावा पूर्वोक्ता इति आदि पूर्वं तदानयेत् विवरेण तदनुविधायते । ता आवस्थीयात् यत्नितेव तदविशिष्टे विहितोदेवा । गौतमाते विवेचन विधानवाधोक्ता आदि गौतमहारी च वा । आधा+षी रूपं आधाते स्वकारकादुचित-कारकान् "एकादशायां आधा । १,८ । आधान पूर्वक आदध्यादि यथाविकारे यथोक्त विना "अग्निषेय वैश्वानरस्तु आदिवेदाग्निरहः इत्येव तद्धानादिवेदा अग्नी तदा शक्तिमतो दीप्तादिनो एकादशोमत आधा-नादि इह चौलमानादि यथं कार्यं तत्काल तथा च यत्र । "अग्नितैवानुप्रयोनामपयोगमुत्तमोरुकारक अग्निपैतामहोराजेयत्यसद्गुणादिविधायामपिविधा इत वैद अन्यत्रो विवक्षु ।(हलेके नामे अनु) इत्यादावे तु

आधाय अव्य आ+धा ल्यप् । आधानमित्यर्थे इत्यादावे ।

आधायक त्रि आ+धा-ण्वुल् । आधानकारके ।

आधायिन् त्रि आधाता अधीयायां प्रयोजनमस्य इन् ।

गर्भाधानविधिमि वैदविधि गर्भाधानमाधाने ।

आधार पु आ+धृ-आधारे घञ् । अधिकरणे कारके, अधारिताधारवदधिकरणम्" इत्या "सदाधारा पृथ्वी अधिकरणादौ मते कृत्या "अध्यात्मारवेदयोनामा ऐक्य धर्मादि" सा सर्वि । एकाधारतानिरूपे गौत-म विशेषविधाविभागवाक्यमविधिरूपवादे, तत्र व्याप्त्यादौ अवरोध्यतां इत्यादौ इतरेषां तत्र आधारे वा आधारे च । आधारमप्यशक्तिरिति रघु । "आधारेऽधिकरणम् या अधिकरणम् आधारतत्त्व-रुता या विधाना अधिकरणम् निर्दिष्ट यत्र निर्वि-तत् गौणम विशेषविधानिभागविधेयात् । तत् गौत-मे मिव दर्शकमस्या तथा च आधा । वैकालिका कोर्य इत्यादि । अधिगमाः विवेक् एतदपि । इतर-शीलादौ 'गार्हीनाढे परिवर्तेनीमहाभागपूर्वमि इति गार्हीमाला आयासप्रीमार । हदिमान् महतो सौमित्रिसौमादाधिरु यत्सर्वस्य महावयीसोपरिग्रहोचितो न तत्र विज्ञानैवादि शाश्वतीमाः । एकदेशे तद्-व्यवसमयो आधानकारकादि आधारे विशेषो यत्र पूर्वे आनुपूर्वे यथारे आनन्दरूपा । आधारताः तत् आधारता अन्यमतिधेय तदर्थविशेषाधानाया-द्यौ तत्र विशेषे यत्र च आधारता आधेयता विद-विता आधेयता च आधारतया इति तयोः परस्पर विरूपनिरूपकभावः आधारतायां अवच्छिन्नविशेषे आधारतामधेयम् । एतावेवाधारा अवच्छिन्नादि सर्वं आधेयतामध्यम तथा भरीयेन प्रधाने पूर्वे पूर्वकालतामतायोदेय सर्वाधारे यत च पाप आधेयतामध्यवम् आधेयतामयेवलात् आधाराधार-तामेवापि आमिरिपते यथा परतादिता अर्थिता इत्यादिना यथा पूर्वकालादित्या पूर्वविधावमयानता इति अवच्छेदिवात्ता दीधिति आधारत्वं । उद्यौ च ।

आधारशक्ति स्त्री आधारस्य शक्तिः । तन्त्रोक्तशक्तिकार्ये तदविवरस्मि आधारायां एतन्मी च तन्त्रीकामां पूजा-कारकायां पूजाविधौ इत्यरेवामायाम् । शक्तिवदुच्यते वैद वेदे च "आधारशक्ति प्रकृतिविगाहि" तत्र "तद-मादिकवीरामेन मीतमक्षी प्रयमनेत्" तत्त्वत नीतकि-हवेषस्य निर्विशि ।

आधाराधेयभाव पु आधारत्वेन अधीतं । एकत्र तदैवता आधारतामे तत्त्व तदैव यत

आधेयत्व तादृशे सम्बन्धभेदे । यथा घटभूतलयोः ।

आधि पु० अधीयतेऽभिनिवेश्यते प्रतीकाराय मनोऽनेन आ+धा—कि । भावसद्व खकारके व्यथाभेदे "नाधयोव्याधय क्लेशाद्दैवभूतात्महेतव" भा०म० । "यान्त्येव गृहिणीपदं युवतयो वामा कुलस्याधय" शकु० । आधिर्दैविकशब्देऽस्य विवृतिः । ईषत् अधिक्रियते उत्तमर्णोऽत्र आ+ईषदर्थे धा—अधिकारार्थे आधारे कि आधीयते ऋणशोधनार्थम् आ+धा—कर्मणि किवा ऋणशोधनार्थं प्रतिभूस्थानीयतया बन्धकत्वेन उत्तमर्णसमीपे अधमर्णेनाधीयमाने उत्तमर्णस्य ईषत्स्वत्वहेतुभूतव्यापारविशिष्टे २द्रव्येऽस्य विवृतिः मिता० । "धनप्रयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च । यथाह नारदः । "विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव चेति"। तत्र प्रतिभूर्निरूपित इदानीमाधिर्निरूप्यते । आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णाधिक्रियार्थं आधीयत इत्याधिः स च द्विधैव कृतकालोऽकृतकालश्च पुनश्चैकैकशोद्विविधः गोप्योभोग्यश्च । यथाह नारदः । "अधिक्रियत इत्याधिः स विज्ञेयोद्विलक्षणः । कृतकालोऽपनेयश्च यावद्देयोद्यतस्तथा । स पुनर्द्विविधः प्रोक्तोगोप्योभोग्यस्तथैव चेति" । कृतकाल आधानकाल एवास्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेय. आत्मसमीपे नेतव्योमोचयितव्य इत्यर्थः । देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतोनियत स्थापित इत्यर्थः । यावद्देयम् उद्यतोयावद्देयोद्यत गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः गोप्योरक्षणीय । एवञ्चतुर्विधस्याधेर्विशेषमाह । "आधि प्रणश्येत् द्विगुणे धने यदि न मुच्यते । काले कालकृतोनश्येत् फलभोग्यो न नश्यति" या० । प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तदा नश्यत्यधमर्णस्य धनप्रयोक्तुः स्वं भवति । कालकृत कृतकाल आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्विगुणत्वाभावेऽपि । फलभोग्य फलं भोग्यं यस्यासौ फलभोग्य क्षेत्रारामादि स न कदाचिदपि नश्यति । कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाशउक्त "काले कालकृतोनश्येदिति । अकृतकालस्य भोग्यस्य नाशाभावउक्त "फलभोग्यो न नश्यतीति" पारिशेष्यादाधि प्रणश्येतद्विगुणे इत्यकृतकालगोप्याधिविषयमवतिष्ठते । द्विगुणत्वातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षणं कर्त्तव्यम् वृहस्पतिवचनात् "हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ । बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च । तदन्तरा धनन्दत्त्वा ऋणी बन्धमवाप्नुयादिति" । नन्वाधि प्रणश्येदित्यनुपपन्नम् अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् मनुवचनविरोधाच्च "नचाधे कालसंरोधान्निसर्गोऽस्ति न विक्रय" इति । कालेन संरोध कालसंरोधश्चिरकालमवस्थान तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्न्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति न च विक्रय एवमाधीकरण विक्रयप्रतिषेधाद्धनिन स्वत्वाभावोऽवगम्यत इति उच्यते आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः । आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतु प्रसिद्ध । तत्र धनद्विगुणत्वे निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्त निवृत्तेरनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिरुत्तमर्णस्य चात्यन्तिकं स्वत्वम्भवति । न च मनुवचनविरोध यत "नत्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति" भोग्याधि प्रस्तुत्येदमुच्यते "नचाधे कालसंरोधान्निसर्गोऽस्ति न विक्रय" इति भोग्यस्याधेश्चिरन्तनकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वन्नास्तीति । इहाप्युक्त "फलभोग्योन नश्यतीति"। गोप्याधौ तु पृथगारम्भमनुना । "न भोक्तव्यो बलादाधिर्भुञ्जानोवृद्धिमुत्सृजेदिति" । इहापि वक्ष्यते "गोप्याधिभोगे नोवृद्धिरिति" आधि प्रणश्येद्द्विगुण इति तु गोप्याधि प्रत्युच्यत इति सर्वमविरुद्धम् । किञ्च "गोप्याधिभोगे नो वृद्धि सोपकारेऽथहापिते । नष्टोदेयो विनष्टश्च दैवराजकृतादृते"या० । गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति । स्वल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहारावमत्व गमिते नो वृद्धिरिति सम्बन्ध नष्टोविकृतिङ्गतस्ताम्रकटाहादिश्छिद्रभेदादिना पूर्ववत् कृत्वा देय तत्र गोप्याधिर्न्नष्टश्चेत् पूर्ववत् कृत्वा देय । उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या भोग्याधिर्यदि नष्ट तदा पूर्ववत् कृत्वा देय । एतस्मिन्नावे वृद्धिर्या हातव्या विनष्ट आत्यन्तिकं नाशं प्राप्त सोऽपि देयोमूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूलनाश "विनष्टे मूलनाश स्याद्दैवराजकृतादृते' इति नारदवनात् । दैवराजकृतादृते दैवमग्न्युदकदेशोपप्लवादि ।

[illegible]

[illegible]

एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूलदानं तावदुपभुङ्क्ते एवाधिम् एतदेव स्पष्टीकृतं वृहस्पतिना "ऋणी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम्। यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी। ऋणी च न लभेद्बन्धं परस्परमतं विना" अस्यार्थः। फलभोग्यः यस्यासौ फलभोग्यः बन्ध आधिः स च द्विविधः सवृद्धिकमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र सवृद्धिमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी। यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकन्दत्त्वा प्राप्नुयादृणी। समं मूलं सममेव सामकम्। अस्यापवादमाह। यदि प्रकर्षितं तत्स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरभ्यधिकफलं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेद्बन्धं, मूलमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्धेरप्यपर्याप्तन्तदा सामकं दत्त्वापि बन्धम् न लभेतमर्णः वृद्धिशेषं दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह। परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम्। परस्परानुमतौ तत्कृष्टमपि बन्धकं यावन्मूलदानन्तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदानेनैवाधमर्णो लभत इति"।

आधिकरणिक पु० अधिकरणे विचारस्थाने नियुक्तः ठक्। विचारस्थाने नियुक्ते प्राड्विवेकादौ।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अतिशयितायाम्। "यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः" मनुः "युग्मायामपि रात्रौ चेत् योषितं प्रचुरं तदा। कन्या च पुत्रवत् भवति शुक्राधिक्ये पुमान् भवेत्" ज्योतिस्तत्त्वम् "प्रातिपदिकमात्रे लिङ्गमात्राद्याधिक्ये" सि० कौ० "एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये व्यवस्थितम्" सुश्रु०।

आधिज्ञ त्रि० आधिं मम पीडां जानाति अनुभवति ज्ञा-क ६त०। व्याथानुभावके व्यथिते अमरपालः।

आधिदैविक त्रि० अधिदेवं भवः देवान् वातादीन् अधिकृत्य प्रवृत्तः वा ठञ् अनुशतिका० द्विपदवृद्धिः। देवाधिकारेण प्रवृत्ते, १शास्त्रे "अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च" मनुः देवताऽधिकारेण प्रवृत्तवेदभागस्तु उपनिषत्प्रसिद्धः। वातादिनिमित्तके २दुःखे च। दुःखं हि त्रिविधमाध्यात्मिकादिभेदात् तेषां स्वरूपकारणविभागादि सुश्रुते दर्शितं यथा "तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथाऽऽदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः सङ्घातबलप्रवृत्ताः कालबलप्रवृत्ताः दैवबलप्रवृत्ताः स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातुरपचारात्पङ्गुजात्यन्धबधिरमूकमिन्मिनवामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसकृता दौर्हृदापचारकृताश्च॥ दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्था पक्वाशयसमुत्थाश्च पुनश्च द्विविधा शारीरा मानसाश्च त एत आध्यात्मिकाः॥ सङ्घातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्तेऽपि द्विविधा शस्त्रकृता व्यालादिकृताश्च। एत आधिभौतिकाः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्तास्तेऽपि द्विविधा व्यापन्नर्त्तुकृता अव्यापन्नर्त्तुकृताश्च॥ दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ता क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृताश्चाकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता एत आधिदैविकाः"। एतदभिप्रायेणैव "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति सा० सू० "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सा० का० दुःखत्रयञ्च विवृतञ्च सां० त० कौ०। "दुःखानां त्रयं दुःखत्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणाम् वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम्"। "तापत्रयोन्मूलनम्" भाग० १स्क० उक्तम्। दुःखञ्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणादि धर्म इति सांख्यादयः। अन्तःकरणादेः त्रिगुणात्मकप्रकृतिकार्य्यत्वात् प्रीत्यप्रीतिविषादानां त्रिगुणधर्माणां स्वस्वकार्य्ये सङ्क्र-

एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि याव-न्मूलदानं तावदुपभुङ्क्ते एवाधिम् एतदेव स्पष्टीकृतं वृहस्प-तिना "ऋणी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम्। यदि प्रकर्षितं तत्स्यात्तदा न धनभा-ग्धनी। ऋणी च न लभेद्बन्धं परस्परमतं विना" अस्यार्थः। फलम्भोग्यं यस्यासौ फलभोग्यः बन्ध आधिः स च द्विविधः सवृद्धिकमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र सवृद्धिमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी। यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धि-मात्रापाकरणार्थन्तु बन्धं सामकन्दत्त्वा प्राप्नुयादृणी। सम-मूलं सममेव सामकम्। अस्यापवादमाह। यदि प्रक-र्षितं तत्स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरप्यधिक-फलं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेद्बन्धं, मूलमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्धेरप्यपर्याप्तं तदा सामकं दत्त्वापि बन्धम् न लभे-तमर्णः वृद्धिशेषं दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवाद-माह। परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परा-नुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम्। परस्परानुमतौ तत्कृष्टमपि बन्धकं यावन्मूलदानन्तावदुपभुङ्क्ते धनी नि-कृष्टमपि मूलमात्रदानेनैवाधमर्णो लभत इति"।

आधिकरणिक पु० अधिकरणे विचारस्थाने नियुक्तः ठक्। विचारस्थाने नियुक्ते प्राड्विवेकादौ।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अति-शयितायाम्। "यदायगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः" मनुः "युग्मायामपि रात्रौ चेत् शोणितं प्रचुरं तदा। कन्या च पुत्रवत् भवति शुक्राधिक्ये पुमान् भवेत्" ज्योतिस्तत्त्वम् "प्रातिपदिकमात्रे लिङ्गमात्राद्याधिक्ये" सि०कौ० "एव-मेतद्गुणाधिक्यं द्रव्ये द्रव्ये व्यवस्थितम्" सुश्रु०।

आधिज्ञ त्रि० आधिं मम पीडां जानाति अनुभवति ज्ञा-क इत०। व्यथानुभावके व्यथिते अभयपालः।

आधिदैविक त्रि० अधिदेवं भवः देवान् वातादीन् अधि-कृत्य प्रवृत्तः वा ठञ् अनुशतिका० द्विपदवृद्धि। देवाधि-कारेण प्रवृत्ते, शास्त्रे "अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च" मनुः देवताऽधिकारेण प्रवृत्तवेदभागस्तु उपनिषदु-प्रसिद्धः। वातादिनिमित्तके दुःखे च। दुःखं हि त्रिवि-धमाध्यात्मिकादिभेदात् तेषां स्वरूपकारणविभागादि सु-श्रुते दर्शितं यथा

"तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविक-मिति। तत् सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथाऽऽदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ता सङ्घातबलप्रवृत्ता कालबलप्रवृत्ता दैव-बलप्रवृत्ता स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातु-रपचारात्पङ्ग्वात्यन्धबधिरमूकमिन्मिनवामनप्रभृतयो जाय-न्ते तेऽपि द्विविधा रसकृता दौहृदापचारकृताश्च॥ दोष-बलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधाः शारीरा मानसाश्च त एत आध्यात्मिकाः॥ सङ्घातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एत आधिभौति-काः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमि-त्तास्तेऽपि द्विविधा व्यापन्नर्तुकृता अव्यापन्नर्तुकृताश्च॥ दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उप-सर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशा-चादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ता क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृताश्चाकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता एत आधि-दैविकाः"। एतदभिप्रायेणैव "अथ त्रिविधदुःखात्यन्त-निवृत्तिरत्यन्तपुरुषार्थः" इति सां०सू० "दुःखत्रया-भिघाताज्जिज्ञासा तदभिघातके हेतौ" सां०का० दुःख-त्रयञ्च विवृतञ्च सां०त०कौ०। "दुःखानां त्रय दुःख-त्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वात-पित्तश्लेष्मणाम् वैषम्यनिमित्तं, मानसं कामक्रोधलोभ-मोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैत-दान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपाय-साध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधि-भौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधि-दैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्"। "ताप-त्रयोन्मूलनम्" भाग० १स्क० उक्तम्। दुःखञ्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणादि धर्म इति सांख्या-दयः। अन्तःकरणादेः त्रिगुणात्मकप्रकृतिकार्य्यत्वात् प्रीत्यप्रीतिविषादात्मना त्रिगुणधर्म्माणां स्वस्वकार्य्ये सङ्क्र-

नम् यर्थो निमाधाचीर इत्यादिप्रत्ययिति भेदः। आधिपत्य न अधिपतेर्भावः कर्म वा ब्राह्मणत्वात् ष्यञ्। स्वामित्वे “बलान् पुराण्यनुभव राज्ञ इत्याचाति चाधिपत्यम्। भोक्ता। ‘राज्याधिपत्यं मे देहि’” भा० १। ११०१। “भोगस्यार्थं प्रजानामाधिपत्याय राज्यार्थे” भव भा० “सर्वलोक-प्रभाव वैश्याधिपत्यर्थेऽपि इति मनुः प्रजाधिपत्याधिष्ठाय राजराजस्येव च” भा० व० २०१ अ०। २राज्यकार्ये प्रजापालनादौ। “इन्द्रियेश्व नहिव वै निमाद भास्करः इम श्रुत्पूर्णिमाचे। प्रजापत्यर्थि विश्वरात्री धर्मदेवा हविषी माघ राज्ये” भा० व० ४० अ०।

आधिभक्त इ आधि प्रकृष्टमाधौ तत्र भाव आधिदि विना एव भक्तः। प्रकृत्यारुपवार्थविकारेऽपि “सर्वं राज्यम्। प्रजाररूपवार्थभावेन हृष्यते” इतिविदपत्ये तद्भाविधितस्वामिनारयति यथा राज्यापवर्ग्य प्रजोपर्ते प्रति भोक्ष्य भा० वा० ७ अ० “सर्वाभिव नै राज्यम्। सर्वम् प्रजाभि सामराज्। विश्वे भेद सर्वाना च सामान्यस्य स्वात्। सर्वभिराज् मुक्ती देवराज्याधिराज्। सर्वभिः सर्वदाना सर्वे पूजवतो विनाय। प्रजासाधीर्य्यस्य सत्यापिदिता च। अत प्रजोऽपि दुर्लीना वार्त्तापि बहुरीहिता। सर्वभावादिप निर्मितं बहुधापि बहुत्र च। आकृष्णाम् अान्येवावराष्टविदाम्बाचिन। आर्येव च सत्यो इमा सुख च बारज। बलाद प्रतिबद्धयोक्ता बाब आशी च सर्वदेः। भावयोगी इत्यन्न मौर्य राजा-इतिस्मृति। च च सर्वे च भावये प्रतिबद्धाति वा विद्यः। मा च प्रमाद पूर्वोत भावायेन्द्र सनूनुवा। अन्याम् युधिष्ठिरयाम् सर्वसत्त्व भोक्ष्ये। पूर्वो सुविज्ञानोऽपि सार्वभावामिमारण। प्रजा हिमायको सेन भावाजोदयर्षीनाम्। नविक्रम च पुण्येन एकेना चाराचिकाम्। आत्मापि तेन विदेशा वैदेन मना-नवम्। धार्मिका सर्व सर्व राज्य भोक्ता भवातिधि। धर्मी भवतेहुरमा भोगसेवनमिमः। भोगविभारं दावारं धर्मिष्ठमाविहृतम्। भवात्मनेयत्कृतहरत्मानि भावना। वा भावतैव भोगेन विदेशार्थं भवामयम्। धर्मोदान्मृती सह यो न भाजयते भीष्म। अन्यवाभ्यरो राजा धर्मोपदेशाविनवाति। अवार्थे बाह व दिन धर्मेण लिप्यति। धर्मपूतो हि विचारः इति अन्नाभावन। धर्मदानाख हि भोक्तान् धर्मीच्चेत् मजा। अर्थाभिप्रायात् यो भेना धरायौ न कर्मेषु मजा। एवं राज्यभोगेन भोक्तुम न विनाशि। यो हि दोषाविशालेनै च च विना विनाशे मजा। एव राज्यमा भैन प्रजानी भवते बचम्। अत राज्यभोगेन बख धार्म सुरक्षितम्। भगवन्तदुर्गा निर्भ भोगाहि पुनि विद। दोषेषु नाम निरवधाद भवी राजा कर्तव्या। निम बोध दैवभय प्रजा भावा भवा मद। भाषा भारोतपी राज्यम् मन बाह्यादिपीवन। प्रजा भूत्वनि राज्य भोक्षु सत्यानि भाषवम्। हत्याधिदिप्रवेन यदि मै शक्यवाम्। यत्र कार्यार्थ दिव्य वा भवमानपेन मद्। मा च ते भाइये एरा भवाम भय कैवाम। च भोजानमरायां विश् सर्वेषु भारव। यवादि देवो इयाच्य भवार्थि भवातुर्येव। आभवन् परिवेर्ष च आद्यादि दुर्गविम्। एवं सर्वेण दृश्येन प्रजाव यदि भावय। यस इति भवी निम भाइये इतरतृत्र। सर्वे देवादत्तेय मर्मा भावन भावतु। युधिष्ठिर यद दुखी भाविकाय्येन भोक्ष्ये। यन् एव यदे सर्वो अस्मा दचादि प्रजा। पुराणं हि यदा सर्वो एवय्य भरता द्वारा। चतरेव एर्व सर्वं सवाचे सर्वभोगिनः। यो राजा रक्षति दुखी भूतैन इति इयाद्। अरजा इतो भावतवेन यथ प्रजा। राजा धर्मविदव्य वयान्-भावियमानि। अरजा इतो सर्वं प्रजा सर्वेण भावतु। इम धर्मचनानि तदनुकृत्यं हिति। निर्मि सवीहि सुरक्षा भोगान् सवति भारतः। सवेन भावयोगानि प्रजा सर्वेण शासयत्। एवं सर्वं स्वधर्मेण भोजयत्। यदि भावय। सा इत्यत्र च भु शाधिवर्तेन भोक्ष्ये”।

आधिभोग इ आर्थेभोगस्य भोगः। स्वधनस्य बोधे भोगाधिकारे भो इति” आधिवृद्धे वहाः आधेयभोजपदा भवनपत्रे १०भो च।

आधिभौतिक त्रि० भूतानि भावसत्येधिकृत्य भवम्। “अधिभूत-कम् दित्यर्थ्य”। भावसवर्णादिपनिषि इति। आधिदैविकाद्ये निमि।

आधिमान्य अधिकस्मि दिवा भाव। धरायो धारा भावमासे हि अधिकस्मोद्भावक भवन्त्।

आधिरथि इ अधिरथः इतयापत्यादिषः प्रजामन् इञ्। सम्प्रसे सर्वे “निरवस्थवी” भवति पालमा या बद भोज्यामान्। सि दयावीन वं भिन्नानानिर्णिता वा

व० प० ३०८ अध्या० । तस्याधिरथपुत्रत्वप्राप्तिकथा स हि कन्यावस्थाया सूर्य्येण कुन्त्याम् उत्पादित पश्चाच्च तया स्वकुलभयात् जले त्यक्त अधिरथेन स्तेनोतो वर्द्धितश्च यथोक्त "निगूहमाना जातं वै बन्धुपक्षभयात्तदा । उत्ससर्ज्ज जले कुन्ती त कुमारं यशस्विनम् । तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशा. । राधाया कल्पयामास पुत्र सोऽधिरथस्तदा । चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ । दम्पती वसुषेणेति" भा० आ० ६७अ० ।

आधिराज्य न० अधिराजस्य भाव कर्म्म वा ष्यञ् । आधिपत्ये "प्रभौ भूय कुमारत्वादाधिराज्यमवाप्य स " रघु. ।

आधिवेदनिक त्रि० अधिवेदनाय विवाहोपरिविवाहाय हित ठक् तत्र काले दत्त ठञ् वा । अधिवेदनार्थं तत्र काले च स्त्रियै पत्या दीयमाने स्त्रीधनभेदे । "पितृमातृपतिभ्रातृ दत्तमध्यग्न्युपागतम् । आधिवेदनिकञ्चैव स्त्रीधन परिकीर्त्तितम्"या० स्मृ० "यञ्च द्वितीयविवाहार्थिना पूर्वस्त्रियै पारितोषिक धन दत्त तदाधिवेदनिकमधिकस्त्रीलाभार्थत्वात्तस्येति"दायभा०। मिताक्षरायां तु "आधिवेदनिकाद्यञ्चेति" पठितम् आधिवेदनिकम् अधिवेदननिमित्तमिति व्याख्यातञ्च आद्यपदेन क्रयरिक्थादिप्राप्तस्य ग्रहणमित्युक्तम् । तत्र अधिवेदननिमित्तदाने विशेष या० स्मृत्युक्त "अधिविन्नस्त्रियै देयमाधिवेदनिक समम् न दत्त स्त्रीधनं यस्या दत्ते त्वर्द्ध प्रकल्पयेत्" "एतदपि सामर्थ्ये असामर्थ्ये तु यत् किञ्चित् भरणपर्य्याप्त दत्त्वा परितोषयेदिति भेद । "एकामूढ्वा तु कामार्थमन्या वोढु यदृच्छति । समर्थस्तोषयित्वार्थैः पूर्व्वोढामपरा वहेत्" स्मृतौ समर्थपदस्वारस्यात्तथात्वम् । एवमेव मदनपारिजातविधानपारिजाताद्य ।

आधिस्तेन पु० आधेर्गोप्याधेर्भोगात् स्तेनइव । गोप्याधेर्बलात्कारेण भोक्तरि । "न भोक्तव्यो बलदाधिर्भुञ्जानोवृद्धिमुत्सृजेत् । मूल्येन तोषयेदेनमाधिस्तेनोऽन्यथा भवेत्"मनुना तद्भोगे स्तेनत्वस्योक्तेस्तथात्वम् ।

आधीकरण न० अनाधिराधिक्रियते आधि+च्वि+कृ-ल्युट् । बन्धकीकरणे आधिशब्दे मिताक्षरावाक्ये उदा०" क्त आधीकृत । दत्तबन्धके द्रव्यादौ त्रि० ।

आधुत त्रि०आ+धु-क्त । चालिते । [अप्राचीने च स्त्रियां ङीप्

आधुनिक त्रि०अधुना भव ठञ् । १साम्प्रतभवे २अर्वाचीने

आधृष्टि त्रि० आ+धृष-भावे क्तिन् । १परिभवे २बलाद्ग्रिग्रहे च ।

आधेय त्रि० आ+धा-कर्मणि यत् । १उत्पाद्ये । "आधेयस्याक्रियाजस्य सोऽसत्त्वप्रकृतिर्गुण" व्या०का०। यस्य सतो गुणान्तरमुत्पाद्यम् २तादृशे उत्पाद्यगुणान्तरे विद्यमाने एव यत्र घटादिपदार्थे पाकादिना रक्ततागुणान्तरमाधीयते तादृशे घटादौ । आधानविधिना ३स्थापनीये वह्नौ पु०। ४अधिकरणेऽभिनिवेशनीये "अधिकं ववृधाधारादाधेयाधिकमर्चनम्" चन्द्रा०। ५स्थापनीये द्रव्ये च । भावे यत् । ६आधाने न०। "अग्न्याधेयम्" आश्व० श्रौ०सू० । "अन्यतराभावे कार्या प्रागग्न्याधेयात्" बौधा०सू० ।

आधोरण पु० आ+धोर-गतिचातुर्ये ल्यु । हस्तिगतिचातुर्यवति हस्तिपके । स्वल्पबलेनापि महाबलस्य हस्तिन सङ्केतादिनैव चालनात्तस्य गतिचातुर्य्यवत्त्वात्तथात्वम् ।

आध्मात त्रि० आ+ध्मा-क्त । १शब्दिते, २दग्धे, ३वातदोषजातोदरस्फीततारूपाद्करोगयुक्ते "साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्" सुश्रु० । भावे क्त ४आध्माने न० ।

आध्मान पु० आ+ध्मा-आधारे ल्युट् । "आध्मानमिति जानीयाद्घोरं वातनिरोधजम्"इत्युक्ते १वातव्याधौ । "मूत्रस्य मूत्र सङ्गमेदु मर्दन्ति बस्तितोदमाध्मानञ्च" सुश्रु० भावे ल्युट् । २उदरस्फीततायाम् । ३अग्निसंयोगजे शब्दभेदे न० । करणे ल्युट् । ४नलिकानामगन्धद्रव्ये स्त्री० ङीप् ।

आध्मापन न० आ+ध्मा-णिच्-पुक्-भावे ल्युट् । १शब्दनिष्पादने २आध्माननिष्पादने सुश्रुतोक्ते ३शल्यापसारणीयव्यापारभेदे च । "अणून्यशक्यानि परिषेचनाध्मापनैर्मार्जनैस्तपाणिभि प्रमार्ज्जयेत्" सुश्रु० ।

आध्यक्ष्य न० अध्यक्षस्य भाव ष्यञ् । १अधिष्ठातृत्वे २अधिकर्त्तृव्यापारे ३प्रत्यक्षत्वे च ।

[स्मृतौ

आध्या स्त्री आ+ध्यै-भावे अङ् । १चिन्तने २औत्सुक्येन

आध्यात्मिक त्रि० आत्मानं मन शरीरादिकमधिकृत्य भव ठञ् । शोकमोहज्वरादिरूपे दु खे । आधिदैविकशब्देऽस्य विवृति ।

[र्वकस्मरणे च ।

आध्यान न० आ+ध्यै-ल्युट् । १चिन्तायाम्, २उत्कण्ठापू-

आध्यापक पु०अध्यापकएव स्वार्थेऽण् । अध्यापके शब्दरत्ना०

आध्यायिक पु० अधीयतेऽध्यायोऽध्येयोवेदस्तमधीते ठञ् । अधीतवेदे "युवा स्यात् साधुयुवाध्यायिक " तैत्ति०उ० । "आध्यायिकोऽधीतवेद "भा० ।

आध्यासिक त्रि० अध्यासेन कल्पित ठक् । वेदान्तिमते अध्यासेन कल्पिते अतद्वति तत्त्वारोपेण कल्पिते पदार्थे यथा शुक्तिकादौ रजतादि कल्पितम् एव ब्रह्मणि जगदादि

[illegible] ।

आमु पु [illegible] ।

[illegible] ।

आम्लिक त्रि [illegible] ।

[illegible] ।

[illegible] ।

आथर्वण त्रि [illegible] ।

आम पु [illegible] ।

आमय पु [illegible] ।

[illegible] त्रि ।

[illegible] ।

आमलकी स्त्री [illegible] त्रि ।

[illegible] ।

[illegible] ।

[illegible] त्रि [illegible] ।

[illegible] ।

[illegible] ।

आमर्ष पु [illegible] ।

[illegible] ।

कल्याणि । सोऽमृतानन्त्यमश्नुते" भा०व०प०२१अ० ।

आनन्द पु० आ+नन्द–घञ् । १हर्षे सुखे, २दुःखाभावे, ३ब्रह्मणि च । अर्शआदित्वादच् । ४आनन्दवति त्रि० "सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतिः । नैयायिका आनन्दशब्दः दुःखाभावे लाक्षणिक इत्याहुः ब्रह्मणि आनन्दाभावेऽपि दुःखाभावरूपानन्दस्य तत्र सत्त्वात् आनन्दवत्त्वमिति ते मन्यन्ते वेदान्तिनस्तु आनन्दस्य मुख्यत्वमिति आनन्दस्वरूपत्वमेव ब्रह्मणः दुःखाभावरूपस्यानन्दस्याधिकरणस्वरूपत्वादित्याहुः एतदभिप्रायेणैव विवरणे "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते इत्युक्तम्" यथा च ब्रह्मण आनन्दप्रचुरत्वादानन्दमयत्वं तथा "आनन्दमयोऽभ्यासात्" शा०सू०भा० व्यवस्थापितम् तैत्ति०उप० आनन्दमयं प्रकृत्य "तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा"। "तस्यानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः । स एव च प्रकृष्टो हर्षः प्रमोदः । आनन्द इति सुखसामान्यम्, आत्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म । तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसा । प्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते तद्विषयसुखमिति प्रसिद्धं लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात् सुखस्य क्षणिकत्वम् । तद्यदन्तःकरणं तपसा तमोघ्नेन, विद्यया, ब्रह्मचर्य्येण, श्रद्धया च निर्मलत्वमापद्यते यावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणे विशेष आनन्द उत्कृष्यते विपुलो भवति । वक्ष्यति च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति एष ह्येवानन्दयाति" "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुत्यन्तरात् एवञ्च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते । एवञ्चोत्कृष्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्तलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः । यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठा" भा० ब्रह्मण आनन्दरूपरसत्वमपि तत्रैव दर्शितं यथा "यद्वै तत् सुकृतं रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते" तै० उ० । "कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह । यद्वै तत्सुकृतं रसो वै सः । रसो नाम तृप्तिहेतुरानन्दकरो मधुराम्लादिः प्रसिद्धो लोके । रसमेवायं लब्ध्वा प्राप्यानन्दी सुखी भवति नासत आनन्दहेतुत्वं दृष्टं लोके । बाह्यानन्दसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्यरसलाभा इव सानन्दा दृश्यन्ते विद्वांसो नूनम् । ब्रह्मैव रसस्तेषाम् तस्मादस्ति तेषामानन्दकारणं रसवद्ब्रह्म । इतश्चास्ति कुतः । प्राणनादिक्रियादर्शनात् । अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति । एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्य्यकारणैर्निर्वर्त्त्यमाना दृश्यन्ते । तच्चैकार्थवृत्तित्वेन संहननम् संहन्यमानं च नान्तरेण चेतनं संहतं सम्भवति अन्यत्रादर्शनात् । तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यान्न भवेत् को ह्येव लोकेऽन्यादपानचेष्टां कुर्य्यादित्यर्थः । कः प्राण्यात् प्राणनं कुर्य्यात्तस्मादस्ति तद्ब्रह्म । यदर्थाः कार्य्यकारणप्राणनादिचेष्टाः? तत्कृत एवानन्दो लोकस्य । कुतः । एष ह्येव परः आत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम् । स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः" भा० । सर्वानन्दापेक्षया ब्रह्मरूपानन्दस्योत्कर्षस्तत्रैव दर्शितो यथा "सैषानन्दस्य मीमांसा भवति । युवा स्यात् साधुयुवाध्यायिकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः स एकः पितॄणां चिरलोकानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितॄणां चिरलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्मदेवानामानन्दः ये कर्मणा देवानपि यन्ति, श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानामानन्दाः स एको देवानामानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शत

देवानामानन्दाः स एक इन्द्रस्यानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य। [illegible]

तदेवानुप्रविष्टः स य इति निर्दिश्यते । स एकोऽसावयं पुरुष यश्चासावादित्ये य परमानन्द श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युप जीवन्ति स यश्चासावादित्ये इति स एक । त मीमांसया च सिद्धमुपवर्णित भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । नन्वानन्दस्य मीमांसा प्रकृता तस्या अपि फलमुपसं- हर्त्तव्यम्, अभिन्न स्वाभाविक आनन्द परमात्मैव न विषयविषयिसम्बन्धजनित इति । ननु तदनुरूपएवाय निर्देश स यश्चाय पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्दनेन । नन्वेवमप्यादित्यविशेष- णमुपादानमनर्थकम् । नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि यो मूर्त्तामूर्त्तलक्षणस्योत्कर्ष सवितर्यन्तरगत स चेत् पुरुषगतविशेषोपमर्द्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्यभयं प्र- तिष्ठां विन्दत इत्युपपन्नम्" । "स य कश्चिदेवं यथोक्तं ब्र ह्मोत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमस्मीति । एवमदस्य प्रकृतपरामर्शार्थत्वात् । स किम् ? अस्माल्लोका- त्प्रेत्य दृष्टादृष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लो- कात्प्रेत्य प्रत्यावृत्त्य निरपेक्षो भूत्वा एतं यथा व्याख्यातम् अन्नमयमात्मानमुपसङ्क्रामति विषयजातमन्नमयात् पिण्डा- त्मनो व्यतिरिक्तं न पश्यति सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थ । ततोऽभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्म- स्थमविभक्तम् । अथैतं मनोमयं विज्ञानमयमानन्दमय मात्मानमुपसङ्क्रामति । अथाऽदृश्येऽनात्म्येऽनिरुक्तेऽनिल- यनेऽभयं प्रतिष्ठां विन्दते तत्रैव भान्यत्र च" शाङ्करभाष्यम्

अत्र प्रसङ्गात् सुखदुःखादीनां स्वरूपकारणादिकं सावधिरूप्यते प्रकृते सुखदुःखमोहात्मकसत्त्वरजस्तमोगु- णकार्यत्वात् सुखादीनां सत्त्वादिकार्य्यत्वम् । यथोक्तं सा०का० "प्रीत्यप्रीतिविषादात्मका प्रकाशप्रवृत्तिनियम- मार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" अस्या सां०कौ० व्याख्या ।

"प्रीति सुखं प्रीत्यात्मक सत्त्वगुण, अप्रीतिर्दुःखं अप्री- त्यात्मकोरजोगुण, विषादो मोह विषादात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीतिर्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रह- णम् । नेतरेतराभावा सुखादय अपि तु भावा आत्म- शब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्या- त्मान । एवमन्यदपि व्याख्येयम् । भावरूपता चैषा- मनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्ते- रेकस्याप्यसिद्धेरुभयासिद्धिरिति भाव । स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासं- ख्यमेव । रज प्रवर्त्तकत्वात्सर्वत्र लघु सत्त्व प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थम् । प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च इति क्रिया सा च प्रत्येकमभिसम्बध्यते । अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते । तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एव रज सत्त्वतमसी अभिभूय घोराम्, एवं तम सत्त्व- रजसी अभिभूय मूढामिति" ।

"प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्" सां० सू० । 'गुणानां सत्त्वादिद्रव्याणामन्योन्यं सु- खदुःखविषादाद्यैर्वैधर्म्यम् कार्य्येषु तद्दर्शनादित्यर्थ सुखादिकं च घटादिविषयाणामपि रूपवदेव धर्मोऽन्त क- रणोपादानत्वात् सर्वकार्य्याणां, तत्तद्गुणवत्त्वौचित्यात् एतच्चाग्रे पदे निरूपयिष्यते । मनस सङ्कल्पात्मकत्ववत् सत्त्वादीनां सुखाद्यात्मकता धर्मधर्म्यभेदात्" सां०प्र०भा० । "हेयं दुःखमनागतम्" इत्युपक्रम्य "द्रष्टृदृश्ययोः संयोगो हेय- हेतु "पात०सू० हेयस्य दुःखस्य कारणं द्रष्टृदृश्ययो संयो गमुक्त्वा "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगा- पवर्गार्थं दृश्यम्" पा०सूत्रे दृश्यपदार्थो निरूपित । अयमर्थ प्रकाशशील सत्त्व, क्रियाशील रज, प्रकाश- क्रिययो प्रतिबन्धरूपस्थितिशीलं तम । तत्र सत्त्व सुखत्वात् तप्य, तापकं रज रञ्जकत्वात् । एवं सत्त्व- रजसोस्तप्यतापकभावे सति तमसा मोह सम ताप इत्येवं रूपभ्रान्तिरूपोमोह पुरुषस्य भवति । तदिदं गुण- त्रयं स्वस्वकार्य्ये मिथ सहायमविवेकिभोग्यं विवे- किन्याज्य परस्पराश्रय परस्पराभिभाव्याभिभावकभावञ्च गच्छति इत्येवं स्थिते सति कारणान्तरे रजस्त- मसी अभिभूय सत्त्व यदा प्रवर्त्तते तदा सत्त्वोद्रेकात् सुखं जायते । सत्त्वतमसी अभिभूय इति कारणान्तरे यदा रजः प्रवर्त्तते तदा रज उद्रेकात् दुःखं भवति सत्त्वरजसी अभिभूय यदा तम उद्रिक्तं भवति तदा मोह विषादादिकं जायते इति सुखादिसमुद्भवप्रकार । तत्र कारणं धर्माधर्मादिर्विषयोरागादिरेव । यथाह "सुखानुशयी राग" दुःखानुशयी द्वेषः" पा०सू०

स्त्रदेशितं फलमनुष्ठातरीति" न्यायेन सुखादीनामन्तःकरण-धर्म्मत्वेन तद्धर्म्मत्वौचित्यात् पुरुषे तु तानि तदविवेकादौपाधिकानि "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" गीतोक्तेः प्रकृतिगुणानां वास्तविककर्त्तृत्वसिद्धेः। "तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वे च तथा कर्त्ता भवत्युदासीनः" इति सां०का० राजसहस्रे अन्तःकरणस्यैव वास्तविककर्त्तृत्वोक्तेश्च क्रियाफलस्य सुखादेरपि तत्सामानाधिकरण्यम्। एतदाशयेनैव "तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः। लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन" सां०का० उक्तिः पुरुषे औपाधिकदुःखस्य सद्भावपरा"। किञ्च अन्तःकरणस्य तावत् सुखादिभिरन्वयव्यतिरेकौ सर्व्वसम्मतौ इत्यन्वयव्यतिरेकाभ्यां सिद्धकारणभावस्य तस्योपादानत्वमेव सुखादिभिः कल्प्यते न पुनस्तस्य निमित्तत्वं प्रकल्प्य आत्मनस्तत्र समवायिकारणत्वकल्पनं गौरवपराहतत्वात् निर्गुणत्वादिश्रुतिविरोधाच्च। अत्यपि तस्य स्वाभाविकाकर्त्तृत्वे भोक्तृत्वमस्त्येवेति साङ्ख्या आहुः यथोक्तं सांख्यसूत्रभाष्ययोः "चिदवसानो भोगः" सू०। "पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्य तादृशो भोगः सिद्धिरित्यर्थः। बुद्धेर्भोगस्य व्यावर्त्तनाय चिदवसान इति। चितः परिणामित्वरूपधर्म्मत्वादि-शङ्कानिरासायावसानपदम्। चितौ भोगस्य स्वरूपे पर्य्यवसितत्वान्न कौटस्थ्यादिहानिरित्याशयः। तथाहि प्रमाणास्वरूढं प्रकृतिपुरुषादिकं प्रमेयं वृत्त्या सह पुरुषे प्रतिबिम्बितं सद्भासते। अतोऽर्थोपरक्तवृत्तिप्रतिबिम्बावच्छिन्नं स्वरूपचैतन्यमेव भानं पुरुषस्य भोगः प्रमाणस्य च फलमिति। ततश्च प्रतिबिम्बरूपेणार्थसम्बन्धे द्वारतया वृत्तीनां करणत्वमिति। तदुक्तं विष्णुपुराणे। "गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति। अन्तःकरणरूपाय तस्मै विश्वात्मने नमः" इति। राज्ञो हि करणवर्गः स्वामिने भोग्यजातं समर्पयतीति दृष्टमिति। भोगपदार्थश्चाप्यङ्गीकरणम् आत्मसात्करणमिति यावत्। स च देहादिचेतनान्तेषु साधारणः। विशेषस्त्वयम्। अपरिणामित्वात् पुरुषस्य विषयभोगः प्रतिबिम्बादानमात्रम्। अन्येषां तु परिणामित्वात् पुष्ट्यादिरपीति। अयमेव च परिणामरूपः पारमार्थिको भोगः पुरुषे प्रतिषिध्यते "बुद्धेर्भोग इवात्मनोत्यादिभिरिति" मन्तव्यम्। अपितु इत्थं पुरुषस्यापि फलव्याप्यता सिद्धा चिद-वसानतायाः एवात्र भोगत्ववचनादिति ननु कर्त्तुरेव लोके क्रियाफलभोगो दृष्टः। यथा सञ्चरत एव सञ्चारोत्थदुःखभोग इति तत् कथं बुद्धिकृतधर्म्मादिफलस्य सुखाद्यात्मिकायाः अर्थोपरक्तबुद्धिवृत्तेर्भोगः पुरुषे घटेतेत्याशङ्कायामाह। "अकर्त्तुरपि फलोपभोगोऽन्नाद्यवत्" सू०। बुद्धिकर्म्मफलस्यापि वृत्तेरुपभोगस्तदकर्त्तुरपि पुरुषस्य युक्तः अन्नाद्यवत्। यथान्यकृतस्यान्नादेरुपभोगो राज्ञो भवति तद्वदित्यर्थः। अविवेकस्य स्वस्वामिभावस्य वा भोगनियामकत्वात् न नातिप्रसङ्गः। सुखदुःखादेः कर्म्मफलत्वमभ्युपेत्य बुद्धिगतं कर्म्मफलं पुरुषो भुङ्क्ते इत्युक्तम्। इदानीं पुरुषगतभोगस्यैव कर्म्मफलत्वं स्वीकृत्य बुद्धिकर्म्मणा पुरुष एव फलमुत्पद्यत इति मुख्यसिद्धान्तमाह। "अविवेकाद्वा तत्सिद्धेः कर्त्तुः फलावगमः" सू०। अथवा कर्त्तरि फलमेव न भवति सुखं भुञ्जीयेत्यादिकामनाभिर्भोगस्यैव फलत्वात्। अतो भोक्तृनिष्ठमेव फलं भवति "शास्त्रदेशितं फलमनुष्ठातरीति" शास्त्रेषु कर्त्तुः फलावगमस्तु तत्सिद्धेरकर्त्तृनिष्ठाया भोगाख्यसिद्धेः कर्तृभोक्त्रोरविवेकादित्यर्थः। योऽहं करोमि स एवाहं भुञ्ज इति हि लौकिकानुभव इति। या च सुखं मे भूयादित्यादिकामना सा पुत्रो मे भूयादितिवत् फलसाधनत्वे नैवोपपद्यते। भोगस्तु नान्यस्य साधनम्। अतः स एव फलमिति मुख्यः सिद्धान्तः। भोगस्य पुरुषस्वरूपत्वेऽपि वैशेषिकाणां मते ज्ञानवत् कार्य्यता बोध्या सुखाद्यवच्छिन्नचितेरेव भोगत्वात्। अस्मिंश्च भोगस्य फलत्वपक्षे दुःखभोगाभाव एवापवर्गो बोध्यः। अथवा भोग्यतारूपस्वस्वामिसम्बन्धेन सुखदुःखाभावयोरेव फलत्वमस्तु तेन सम्बन्धेन धर्म्मादेरिव सुखादेरपि पुरुषनिष्ठत्वादिति" प्र०भा० युक्तञ्चैतत् "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति" श्रुत्या कामादेरन्तःकरण-धर्म्मत्वोक्तेस्तत्फलस्य सुखादेस्तद्धर्म्मौचित्यात् तेषां मनोधर्म्मत्वमिति साङ्ख्यादीनां मतमेव वेदान्तिनाम् "तद्गुणसारत्वात्" शा०सू० तथैव भाष्यकृता निर्णीतत्वात्। इयांस्तु विशेषः साङ्ख्यैर्विषयेष्वपि त्रिगुण-कार्य्यत्वात् सुखादिकमस्तीति मन्यन्ते यथोक्तम्" सा०कौमुद्याम्। "सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावान्नानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्

"सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ! ३६ । अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति । यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ३७ । विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ३८ । यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ३९ । न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०" गीतोक्ते । "सुखस्य त्रैविध्यं प्रतिजानीते सुखन्त्विति । स्पष्टोऽर्थः ३६ । तत्र सात्त्विकं सुखमाह अभ्यासादिति चतुर्भिः । यत्र यस्मिन् सुखे अभ्यासाद्रमते न तु विषयसुखमिव सहसा रतिं प्राप्नोति यस्मिन् रममाणश्च दुःखान्तमवसानं नितरां गच्छति प्राप्नोति । कीदृशं, यत्तत् किमपि अग्रे प्रथमं विषमिव मनःसंयमाधीनत्वाद् दुःखावहमिव भवति परिणामे अमृततुल्यं आत्मविषया बुद्धिरात्मबुद्धिस्तस्याः प्रसादो रजस्तमोमलत्यागेन स्वच्छतयावस्थानं ततोजातं यत् सुखं तत्सात्त्विकं प्रोक्तं योगिभिः ३७ । राजसं सुखमाह विषयेति । विषयाणामिन्द्रियाणाञ्च संयोगात् यत्तत् प्रसिद्धं स्त्रीसंसर्गादिसुखं अमृततुल्यम् अमृतमुपमा यस्य तादृशं भवति । अग्रे प्रथमं परिणामे च विषतुल्यं इहामुत्र च दुःखहेतुत्वात् तत् सुखं राजसं स्मृतम् ३८ । तामसं सुखमाह यदिति । अग्रे च प्रथमक्षणे अनुबन्धे च पश्चादपि यत्सुखमात्मनो मोहकरम् । तदेवाह निद्रा च आलस्यञ्च प्रमादश्च कर्त्तव्यावधानराहित्येन मनोमान्द्यं एतेभ्य उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतम् ३९ । अनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहरति न तदिति त्रिभिः । एभिः प्रकृतिसम्भवैः सत्त्वादिभिर्गुणैर्मुक्तं सत्त्वं प्राणिजातम् अन्यद्वा यत् स्यात् पृथिव्यां मनुष्यादिषु दिवि देवेषु च क्वापि नास्त्येवेत्यर्थः" श्रीधरः ।

वैषयिके सुखदुःखे च इष्टानिष्टविषयेन्द्रियसन्निकर्षजभावात् जायमाने अनुभूयेते अविद्ये च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत । इति गीतोक्तेः । वैषयिकसुखस्य च क्षणिकत्वात् परिणामादिदुःखरूपत्वाच्च विवेकिभिः त्याज्यत्वमेव "त्याज्यं सुखं विषयसङ्गजन्म पुंसाम्" इत्युक्तेः प्रागुक्तपातञ्जलसूत्राच्च विषयेन्द्रियसंयोगाज्जातस्य सुखस्य राजसत्वं प्रागुक्तगीतावाक्यात् । तत्र विषयाश्च शब्दस्पर्शरूपरसगन्धाः यथायथं तद्भेदाश्च तत्र शब्दविशेषरूप गीतादिषु श्रवणेन्द्रियसम्बन्धेषु यत् सुखं तत् वैषयिकमेव किन्तु आत्मोपासनाङ्गत्वेन गीतादिकमपि चित्तैकाग्र्यतासम्पादनद्वारा मोक्षसाधनं भवति तदुक्तं या० स्मृतौ मिताक्षरायाञ्च ।

"यस्य पुनश्चित्तं निर्विषयाकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्यमित्याह । "यथाविधानेन पठन् सामगानमविच्युतम् । सावधानस्तदभ्यासात् परं ब्रह्माधिगच्छति" या० "स्वाध्यायावगतमार्गानतिक्रमेण सामगानं साम्नो गानात्मकत्वेऽपि गानमिति विशेषणम् अगीतमन्त्रव्युदासार्थम् । अविच्युतमस्खलितम् । सावधानः सामध्वन्यनुसृतात्मैकाग्र्यचित्तवृत्तिः पठन् तदभ्यासवशाच्च निष्णातः शब्दाकारब्रह्म उपासने परं ब्रह्माधिगच्छति । तदुक्तम् । "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति" । यस्य पुनर्वैदिकगीतौ चित्तं नाभिरमते तेन लौकिकगीतानुसृतात्मोपासनं कार्यमित्याह । "अपरान्तकमुल्लोप्यं मद्रकम्प्रकरीन्तथा । औवेणकं सरोविन्दुमुत्तरं गीतकानि च । ऋग्गाथापाणिकादक्षविहिता ब्रह्मगीतिका । गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम्" या० । अपरान्तकोल्लोप्यमद्रकप्रकर्यौवेणकसरोविन्दुसहितमुत्तरमित्येतानि प्रकरणाख्यानि सप्त गीतकानि । ऋग्वाद्यादासाभिदध्नामधादिमहागीतकानि कथ्यन्ते । गाथाद्याः तदङ्गगीतिका कथ्यन्ते । ऋग्गाथाद्याश्च लौकिक एतदपरान्तकादिगीतजातमध्यारोपितात्मभावमोक्षसाधनत्वान्मोक्षसंज्ञितं मन्तव्यम् तदभ्यासस्यैकाग्रतापादनद्वारेणात्मैकताप्रत्तिकारणत्वात् । किञ्च । "वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति" या० । भरतमुनिप्रतिपादित वीणावादनतत्त्ववेदी श्रूयत इति श्रुतिर्द्वाविंशतिविधा च सप्तस्वरेषु । तथा हि षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतयः ऋषभधैवतौ प्रत्येकं त्रिश्रुती । गान्धारनिषादौ प्रत्येकं द्विश्रुती इति । जातयस्तु षड्जादयः सप्त शुद्धाः षट्स्वरजातयस्त्वेकादशेत्येवमष्टादशविधास्तासु विशारदः प्रवीणः तालज्ञ इति गीतप्रमाणज्ञ उच्यते तत्स्वरूपमग्रे तदनुविद्धब्रह्मोपासनतया तालादिप्रभृत्याश्रितवृत्ते-रात्मैकाग्रतया सुकरत्वादप्रयासेनैव मुक्तिपथमियच्छति प्राप्नोति । चित्तविक्षेपाद्यन्तरायोपेतस्य गीतज्ञस्य फलान्तरमाह । "गीतज्ञो यदि योगेन नाप्नोति परमम्पदम् ।

"सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । ३६ । अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति । यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ३७ । विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ३८ । यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ३९ । न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०" गीतोक्ते । "सुखस्य त्रैविध्यं प्रतिजानीते सुखन्त्विति । स्पष्टोऽर्थः ३६ । तत्र सात्त्विकं सुखमाह अभ्यासादिति सार्द्धेन । यत्र यस्मिन् सुखे अभ्यासाद्रमते न तु विषयसुखवत् सहसा रतिं प्राप्नोति यस्मिन् रममाणश्च दुःखान्तमत्यन्तं नितरां गच्छति प्राप्नोति । किञ्च, यत्तत् किमपि अग्रे प्रथमं विषमिव मनःसंयमाधीनत्वात् दुःखावहमिव भवति परिणामे अमृततुल्यम् आत्मविषया बुद्धिरात्मबुद्धिस्तस्याः प्रसादो रजस्तमोमलत्यागेन स्वच्छतयावस्थानं ततो जातं यत् सुखं तत् सात्त्विकं प्रोक्तं योगिभिः ३७ । राजसं सुखमाह विषयेति । विषयाणामिन्द्रियाणाञ्च संयोगात् यत्तत् प्रसिद्धं स्त्रीसङ्गादिसुखं अग्रे अमृतोपमं यस्य तादृक् भवति । अग्रे प्रथमं परिणामे च विषतुल्यं इहामुत्र च दुःखहेतुत्वात् तत् सुखं राजसं स्मृतम् ३८ । तामसं सुखमाह यदिति । अग्रे च प्रथमक्षणे अनुबन्धे च पश्चादपि यत्सुखमात्मनो मोहकरम् । तदेवाह निद्रा च आलस्यञ्च प्रमादश्च कर्त्तव्यावधानराहित्येन मनोमान्द्य-मेतेभ्य उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतम् ३९ । प्रकृतमपि संहरन् प्रकरणार्थमुपसंहरति न तदिति त्रिभिः । एभिः प्रकृतिसंभवैः सत्त्वादिभिर्गुणैर्मुक्तं हीनं सत्त्वं प्राणिजातम् अन्यद्वा यत् स्यात् तत् पृथिव्यां मनुष्यादिषु दिवि देवेषु च क्वापि नास्तीत्यर्थः" श्रीधरः ।

वैषयिके सुखदुःखे च इष्टानिष्टविषयेन्द्रियसन्निकर्षसम्पातात् जायमाने अनुभूयेते अपि च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत । इति गीतोक्तेः । वैषयिकसुखस्य च क्षणिकत्वात् परिणामादिदुःखरूपत्वाच्च विवेकिभिः त्याज्यत्वमेव 'त्याज्यं सुखं विषयसङ्गजमत्र पुंसाम्' इत्युक्तेः प्रागुक्तपातञ्जलसूत्राच्च विषयेन्द्रियसंयोगाज्जातन्तु सुखं राजसं प्रागुक्तगीतावाक्यात् । तत्र विषयाश्च शब्दस्पर्शरूपरसगन्धाः यथायथं तद्भिन्नञ्च तत्र शब्दविशेषरूपगीतादिषु श्रवणेन्द्रियसम्बन्धेषु यत् सुखं तत् वैषयिकमेव किन्तु आत्मोपासनाङ्गत्वेन गीतादिकमपि चित्तैकाग्रतासम्पादनद्वारा मोक्षसाधनं भवति तदुक्तं या० स्मृतौ मिताक्षरायाञ्च ।

सफुल स्फूर्त्तौ सञ्चये च भ्वा० पर० सक० सेट् । इदा० कुटा० प० सेट् स्फुलति अस्फुलीत् । [illegible]

स्फुलन न० स्फुल-भावे ल्युट् । स्फुरणे [illegible] ।

स्फुलिङ्ग पु० स्त्री० स्फुल-इङ्गच् स्फुलं स्फुरणं [illegible] गच्छति यस्मात् [illegible] । अग्निकणे अमरः ।

स्फुलिङ्गिनी स्त्री स्फुलिङ्ग-अस्त्यर्थे इनि । अग्नि-[illegible] सप्तजिह्वायाम् जटा० [illegible] ।

स्फूर्जक पु० स्फूर्ज-ण्वुल् । तिन्दुकवृक्षे अमरः ।

स्फूर्जथु पु० स्फूर्ज-अथुच् । वज्रपातशब्दे अमरः ।

स्फूर्त्ति स्त्री स्फुर्च्छ-स्फुर-वा क्तिन् । स्फुरणे [illegible] स्फूर्तिमायाम् [illegible] ।

स्फूर्त्तिमत् पु० स्फूर्त्ति + अस्त्यर्थे मतुप् । [illegible]

[illegible] स्फुटीभवति [illegible] ।

स्फोट पु० स्फुट-भावे घञ् [illegible] स्फुटने करणे घञ् [illegible]

[illegible] स्फोटः [illegible]

[illegible]

[illegible]

स्फोटक पुं [illegible]

स्फोटन न [illegible]

स्फोटनी [illegible]

स्फोटबीजक पुं [illegible]

स्फोटायन पुं [illegible]

स्फोटिका [illegible]

स्फ्य [illegible]

स्फ्याग्निहोत्र [illegible]

स्फ्य पुं [illegible]

स्मर पु० स्मरति प्रियमनेन स्मृ-करणे अप्। १कामदेवे अमरः। भावे अप्। २स्मरणे। [त्रिका०।

स्मरकूपक पु० स्मरस्य कूप इव कायति कै-क। स्त्रीचिह्ने

स्मरगृह न० स्मरस्य गृहमिव। १स्त्रीचिह्नभेदे भगे जटा० स्मरमन्दिरादयोऽप्यत्र।

स्मरचक्र पु० "कृत्वा वामकरेणोरू स्वपादस्योपरिस्थितम्। हृदयं रमते कामी स्मरचक्रं प्रकीर्त्तितम्" स्मरदीपिकोक्ते रतिबन्धभेदे।

स्मरण न० स्मृ-ल्युट्। ज्ञातवस्तुनोऽनुभवाधीनस्य संस्कारजन्ये उद्बोधकसहकारेण जायमाने १ज्ञानभेदे स्मृतिशब्दे दृश्यम्। आध्याने हेमच०। २चिन्तने जटा०। ३अर्थालङ्कारभेदे सा० द०। अलङ्कारशब्दे ४०७ पृ० दृश्यम्।

स्मरदशा स्त्री स्मरकृता दशा। कामिना स्मरकृतासु अङ्गसौष्ठवादिषु दशसु दशासु।

"अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः। अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्छना। मृतिरेति क्रमाज्ज्ञेया दश स्मरदशा इह। असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः। अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताऽधृतिः। अनालम्बनता चापि शून्यता मनसः स्मृता। तन्मयं तत्प्रकाशो हि बाह्याभ्यान्तरतस्तथा। रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते। वर्ण्यतेऽपि यदि प्रत्युज्जीवनस्यादूरत" इति सा०द०।

स्मरध्वज न० ६त०। स्त्रीचिह्ने शब्दर०। २वाद्ये पु० हेमच०

स्मरप्रिया स्त्री ६त०। स्मरस्य भार्यायां रतौ जटा०।

स्मरलेखनी स्त्री स्मरस्य लेखनीव। स्मरस्य कामोद्दीपके शारिकाख्ये शब्दर०। [याम् राजनि०।

स्मरवीथिका स्त्री स्मरस्य वीथिकेव प्राप्तिहेतुत्वात्। वेश्या

स्मरवृद्धि पु० स्मरस्य वृद्धिर्यस्मात्। १कामवृद्धिक्षुपे राजनि०। ६त०। २कामवृद्धौ स्त्री। [शब्दर०।

स्मरस्तम्भ पु० स्मरस्य तद्व्यापारस्य स्तम्भ इव। उपस्थे

स्मरसख पु० स्मर सखा यस्य। गर्दभे त्रिका०।

स्मरहर पु० स्मरं हरति नाशयति हृ-अच्। १महादेवे अमरः। स्मरमर्दनादयोऽप्यत्र।

स्मराङ्कुश पु० स्मरं तत्कार्य्येऽङ्कुश इव प्रेरकत्वात्। नखे शब्दर० नखाघातेन हि स्त्रीणां स्मरोद्दीपनं प्रसिद्धम्।

स्मराम्र पु० स्मरस्य आम्र। राजाम्रे राजनि०।

स्मरासव पु० स्मरोद्दीपक आसव इव। लालायाम् त्रिका० कामिनो तत्पाने हि स्मरोद्दीपनात्तथात्वम्।

स्मार्त्त त्रि० स्मृतौ विहित, स्मृतिं वेत्त्यधीते वा अण्। १स्मृतिविहिते दानादौ "अन्योऽपि स्मार्त्तमाचरत्" इति "स्मार्त्तं वैदिकवत् चरेत्" च स्मृतिः। २स्मृतिशास्त्राभिज्ञे च

स्मि(ष्मि) अनादरे सक०विस्मये अक०चु० आ० सेट्। स्मापयते अविस्मापत। अयं षोपदेश एव। अन्यतो विस्मये स्माययतीत्येव। अयं स्मादिरपि अनिट्। स्मयते असेष्ट स्मिपि षोपदेशत्वात् षत्वम्। [ति असिस्मिद्त्व त

स्मिट अनादरे सक० स्नेहे अक० चु० उभ० सेट्। स्मेटयति।

स्मित न० स्मि-भावे क्त। १ईषद्धास्ये अमरः "सुख विकसित-स्मितम्" मालतीमाधवम्। कर्त्तरि क्त। २विकसिते ३ईषद्धास्यान्विते च त्रि०।

स्मील निमेषणे भ्वा०पर०सक० सेट्। स्मीलति अस्मीलीत्।

स्मृ स्मरणे भ्वा० प० अनिट्। स्मरति अस्मार्षीत् सस्मार सस्मर्थ। अषोपदेशत्वात् न षत्वम्। एतद्योगे कर्मणि षष्ठी। अयमीत्कक्ये सक० घटा० स्मरयति।

स्मृत त्रि० स्मृ क्त। १कृतस्मरणे २प्राप्तिविषये च।

स्मृति स्त्री स्मृ-क्तिन्। अनुभूतवस्तुन उद्बोधकसहकारेण संस्काराधीने १ज्ञानभेदे। स्मर्यते वेदधर्मोऽनेन करणे क्तिन्। २धर्मशासनशास्त्रे वेदार्थानुभवजन्ये वेदार्थानुवादके मुनिप्रणीते वाक्यरूपे शास्त्रे। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" मनुः।

ज्ञानभेदस्मृतिस्वरूपप्रमाणादिकं पात० सू० भा० विवरणे-ऽक्तम् तत्र यथा

"अनुभूतविषयासम्प्रमोषः स्मृतिः" सू०। "किं प्रत्ययस्य चित्तं स्मरति। आहोस्वित् विषयस्येति। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तथाजातीयकं संस्कारमारभते स संस्कारः स्वव्यञ्जकाञ्जनः तदाकारमेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः। सा च द्वयी, भावितस्मर्त्तव्या चाभावितस्मर्त्तव्या च स्वप्ने भावितस्मर्त्तव्या जाग्रत्समये त्वभावितस्मर्त्तव्येति। सर्वाः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति" भा०। "अनुभूतविषयासम्प्रमोषः स्मृति प्रमाणादिभिरनुभूते विषयेऽसम्प्रमोषः अस्तेयः सा स्मृतिः संस्कारमात्रजन्यस्य हि ज्ञानस्य संस्कारकारणानुभवमात्राधिगतो विषय आत्मीयस्तदधिकविषयपरिग्रहस्तु सम्प्रमोषः स्तेय स्यात् शब्दमात्रात्। सम्प्रमोषः स्तेय इत्यस्मात् सम्प्रमोषपदस्य लक्षणे। एतदुक्तं भवति।

स्योन पु॰ सिव-न उणा॰ । १धौतवस्त्रे (धुकडी) शब्दरत्ना॰ भरत॰ २पद्मे ३करणे मेदि॰ । ४हस्ते त्रिकाण्ड॰ । ५सुखकरे त्रि॰ "स्योना पृथिवी नो भवानृक्षरा" यजु॰ ३५अ॰ २१ ।

स्रंसन न॰ स्रन्स-णिच्-ल्युट् । ऊर्ध्वगमनाधोगमने पतने च । संसनाधन स्त्री । [२पीलुवृक्षे पु॰ शब्दर॰ ।

स्रंसिन् त्रि॰ स्रन्स-णिनि । १अध पतनशीले स्त्रियां ङीप् ।

स्रंसिफल पु॰ स्रंसि फलमस्य । शिरीषवृक्षे शब्दमा॰ ।

स्रक गतौ भ्वा॰ आत्म॰ अक॰ सेट् इदित् । स्रङ्कते असस्रङ्किष्ट ।

स्रग्वत् त्रि॰ स्रज् माल्यमस्त्यस्य मतुप् मस्य व कुत्वम् । माल्यवति । विनि । स्रग्वीत्यप्यत्र । उभयत्र स्त्रियां ङीप् ।

स्रज् स्त्री सृज्यते सृज-क्विन् नि॰ । माल्ये अमर ।

स्रज्ञा स्त्री सृज-श नेत्वम् नि॰ । १प्रजापतौ २तन्तुसंघाते ३रज्ज्वाम् शब्दप्रधार॰ ।

स्रन्स पतने भ्वा॰ आत्म॰ लुङि उ॰ अक॰ सेट् इदित् क्त्वा वेट् । स्रंसते इदित् अस्रसत् अस्रंसिष्ट । "मा स्रसत बर्हिषा मैवम्" रघु । [अत अस्रसिष्ट ।

स्रम्भ प्रमादे भ्वा॰ आ॰ अक॰ सेट् इदित् क्त्वा वेट् । स्र॰

स्रम्भ विश्वासे भ्वा॰ आत्म॰ इदित् लुङि उ॰अक॰सेट् इदित् क्त्वा वेट् । स्रम्भते अस्रभत् अस्रम्भिष्ट ।

स्र(स्रा)व पु॰ स्रु-अप् वा घञ् वा । १क्षरणे अमर॰ । कर्त्तरि अच् । २निर्झरे हेमच॰ । [भावे ल्युट् । १क्षरणे ।

स्रवण न॰ स्रु-ल्यु । १मूत्रजले राजनि॰ २घर्मे च शब्दर॰

स्रवद्गर्भा स्त्री स्रवन् गर्भो यस्याः । १दैववशात् पतितगर्भायां गवि अमरः । २तथाभूतस्त्रियाञ्च ।

स्रवद्रङ्ग पु॰ स्रवन् रङ्गो यत्र । पण्यपथे (हट्टे) हारा॰ ।

स्रवन्ती स्त्री स्रु-शतृ ङीप् । १नद्याम् अमर । २ओषधिभेदे ३गुडमस्थाने च मेदि॰ । ४नद्य । क्षरविशिष्टे त्रि॰ । स्त्रियां ङीप् ।

स्रवा स्त्री स्रु-अच् । १मूर्वायाम् रायमुकु॰ २क्षरणयुते त्रि॰

स्रष्टृ पु॰ सृज-तृच् नित्यमम् । १जगत्कर्त्तरि चतुर्मुखे अमर २शिवे हला॰ । ३सर्जनकर्त्तरि त्रि॰ स्त्रियां ङीप् ।

स्रस्त त्रि॰ स्रन्स-क्त । च्युते पतिते अमर ।

स्रस्तर पु॰ स्तृ-अप् नित्यसम् । आसने रा॰ न॰ रघु॰ ।

स्राक् अव्य॰ सृ-डाक् । त्वरिते झटित्यर्थे अमर ।

स्रावक न॰ स्रावयति स्रु-णिच्-ण्वुल् । १मरिचे शब्दच॰ २नि स्रावके त्रि॰ । [असुस्रोत् ।

स्रिम्भ हिंसे भ्वा॰ प॰ सक॰ सेट् इदित् क्त्वा वेट् । स्रिम्भति

स्रिभ शोषे भ्वा॰प॰सक॰सेट् इदित् क्त्वा वेट् । स्रेभति असेभीत् ।

स्रिव गतौ शोषे च दिवा॰प॰ गतौ सक॰ सेट् उदित् क्त्वा वेट् । स्रीव्यति असेवीत् । [असुस्रुवत् ।

स्रु गतौ सक॰ क्षरणे अक॰ भ्वा॰ प॰ अनिट् । स्रवति असु

स्रुग्दारु पु॰ स्रुचे यज्ञपात्राय दारु यस्य । विकङ्कतवृक्षे जटा॰ ।

स्रुघ्न पु॰ देशभेदे । स च तत्पतिनिवासस्थानस्येत्याहुः अच् गौरा॰ ङीष् । २दर्विकाकारे स्त्री हेमच॰ ।

स्रुच् (चा) स्त्री स्रु-क्विप् चिट् च वा टाप् । वटपत्राकृतौ विकङ्कतकाष्ठजे च हस्तमाने यज्ञपात्रभेदे शब्दच॰ । [स्त्री शब्दच॰

स्रुत त्रि॰ स्रु-क्त । १क्षरिते जलादौ २गते च । ३हिङ्गुपत्र्या

स्रुव पु स्त्री॰ स्रु-क । १खदिरकाष्ठमये हस्तमिते यज्ञपात्रभेदे यज्ञपात्रस्थे इत्यग्रम् । २सल्लक्याम् ३मूर्वायाम् स्त्री मेदि॰

स्रुवावृक्ष पु॰ स्रुवायाः साधनं वृक्ष । विकङ्कतवृक्षे (बँइचि) अमरः ।

स्रू स्त्री स्रु-क्विप् नि॰ । १यज्ञपात्रभेदे २निर्झरे च हेमच॰ ।

स्रै (क्षै) पाके भ्वा॰ पर॰ सक॰ अनिट् । स्रायति अस्रासीत् ।

स्रोत न॰ स्रु-तन् । स्रोतसि वेगेन स्रवतोऽम्बुनि शब्दे भरत

स्रोतस् न॰ स्रु-तसि । १वेगेन स्रवतो जलस्य सरणे अमर॰ । २इन्द्रिये च ऊर्ध्वस्रोताः । ३देहस्थच्छिद्रे च ।

स्रोतईश पु॰ ६त॰ । समुद्रे हेमच॰ ।

स्रोतस्वत् त्रि॰ स्रोतोऽस्त्यस्य मतुप् मस्य व । १स्रोतोयुक्ते २नद्यां स्त्री अमरः ङीप् । [२स्रोतोयुक्ते त्रि॰ ।

स्रोतस्विनी स्रोतस्+अस्त्यर्थे विनि ङीप् । १नद्याम्

स्रोतोऽञ्जन न॰ स्रोतसि यमुनास्रोतो जातम्यन्नरस्तेनसौवीरदेशे भवम् अञ्जनम् । सौवीरदेशजेऽञ्जने अमरः । "वल्मीकशिखराकारं भिन्नं नीलाञ्जनप्रभम् । घृष्टे च गैरिकावर्णं श्रेष्ठं स्रोतोऽञ्जनं तत्" राजनि॰ । "स्रोतोऽञ्जन तत्र श्रेष्ठं विशुद्धं सिन्धुसम्भवम् । दृष्टेः कण्डूमलहरं दाहक्लेदरुजापहम् । अक्ष्णो रूपावहञ्चैव सहते मारुतातपौ । नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्" । "अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि । तत्र स्रोतोऽञ्जन कृष्णं सौवीरं श्वेतमीरितम् । स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् । स्रोतोऽञ्जनं भवेत् स्वादु चक्षुष्यं कफपित्तहृत् । कषायं लेखनं स्निग्धं ग्राहि च्छर्दिविषापहम् । सिध्मक्षयास्रहृत् शीतं सेवनीयं सदा बुधैः । स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः । किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम्" भावप्र॰ । [जटा॰

स्रोतोवहा स्त्री स्रुतया वहति सरति वह-अच् । नद्याम्

[illegible] । [illegible] । [illegible] ।

[illegible] ।

सतम्पर्ण [illegible] ।

सतर्णेद् [illegible] ।

सतीन [illegible] ।

सत [illegible] ।

समत [illegible] ।

[illegible] ।

सात्र [illegible] ।

[illegible] ।

सत्य [illegible] ।

[illegible] ।

सत्वक [illegible] ।

सतीपात्र [illegible] ।

[illegible] ।

सत्र [illegible] ।

[illegible] ।

[illegible] ।

[illegible] ।

सता [illegible] ।

[illegible]

ह्यपि स्वत्वम् [illegible]

[illegible] । श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

स्वादन [illegible]

स्वधर्म पुं० स्वस्य वर्णादि [illegible] धर्मः । [illegible] । "यो यस्य विहितो धर्मः स तं [illegible] । तस्मात् स्वधर्मं कुर्वीत [illegible]" । "श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" गीता ।

स्वधा [illegible] । १पितृदेवोद्देशेन [illegible] अमर । [illegible] । "नम स्वधायै स्वाहायै" इति [illegible] । [illegible] ।

[illegible] । "स्वधा च [illegible]" [illegible] ।

[illegible] निरुक्ते [illegible] इति
बोध्यम् ।

सभामिष इ [illegible]

सभाभुज् [illegible]

सभि ती)ति [illegible]

सम [illegible]
(सा)[illegible] ।

सम [illegible]

सम इ [illegible]

समि इ [illegible]

समित त्रि [illegible]

समिताश्रम इ [illegible]
[illegible] रामचि ।

समोत्साह इ [illegible]

सपन [illegible]

सपिण्डा स्त्री [illegible]

सप्र इ [illegible]

[illegible]

देशेऽवेयात् पञ्चालेष्वेव प्रतिबुध्येत तानभ्यगत इति कुरुष्वेव तु प्रतिबुध्यते। येन चायं देहेन देशान्तरमश्नुवानो मन्यते तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति। यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति, परिधावंश्चायं पश्येज्जाग्रद्वदर्थमाकलयेत्। दर्शयति च श्रुतिः "अन्तरेव देहे स्वप्नं स यत्रैतत् स्वप्न्यया चरति" इत्युपक्रम्य "स्वे शरीरे यथाकामं परिवर्त्तते" इति। अतश्च श्रुत्युपपत्तिविरोधाद्बहिष्कुलायश्रुतिर्गौण्या व्याख्यातव्या बहिरिव कुलायादमृतश्चरित्वा, इति यो हि वसन्नपि शरीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवति इति। स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एवाभ्युपगन्तव्यः, कालविसंवादोऽपि च स्वप्ने भवति रजन्यां सुप्तो वासरं भारते वर्षे मन्यते तथा मुहूर्त्तमात्रवर्त्तिनि स्वप्ने कदाचिद् बहून् वर्षपूगानतिवाहयति। निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे चोचितानि विद्यन्ते, करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति, रथादिनिर्वर्त्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा। बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे, स्वप्न एव चैते सुलभबाधा भवन्ति आद्यन्तयोर्व्यभिचारदर्शनात्, रथोऽयमिति हि कदाचित् स्वप्ने निर्द्धारितः क्षणेन मनुष्यः सम्पद्यते, मनुष्योऽयमिति वा निर्द्धारितः क्षणेन वृक्षः। स्पष्टञ्चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रम् "न तत्र रथा न रथयोगा न पन्थानो भवन्ति" इत्यादि। तस्मान्मायामात्रं स्वप्नदर्शनम्" भा०। "सूचकश्च हि श्रुतेराचक्षते च तद्विदः" सू०। "मायामात्रत्वात् तर्हि न कश्चित् स्वप्ने परमार्थगन्ध इति, नेत्युच्यते। सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः। तथा हि श्रूयते "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" इति। तथा "पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" इत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति। आचक्षते च स्वप्नाध्यायविदः "कुञ्जरारोहणादीनि स्वप्ने धन्यानि खरयानादीन्यधन्यानि" इति। मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित् स्वप्नाः सत्यार्थगन्धिनो भवन्तीति मन्यन्ते। तत्रापि भवतु नाम सूच्यमानस्य वस्तुनः सत्यत्वं, सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यं बाध्यमानत्वादित्यभिप्रायः। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्। यदुक्तमाह हीति तदेवं सति भाक्तं व्याख्यातव्यं यथा लाङ्गलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लाङ्गलं गवादीनुद्वहति, एवं निमित्तमात्रत्वात् सुप्तो रथादीन् सृजते स हि कर्त्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन् सृजति। निमित्तत्वन्त्वस्य रथादिप्रतिभाननिमित्तमोदत्रासदर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्त्तृत्वेनेति वक्तव्यम्। अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चात्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः, तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत स्वयंज्योतिष्ट्वं न निर्णीतं स्यात्। तस्माद्रथाद्यभाववचनश्रुत्या रथादिसृष्टिवचनं भाक्तमिति व्याख्येयम्। एतेन निर्माणश्रवणं व्याख्यातम्। यदप्युक्तम् "प्राज्ञमेनं निर्मातारमामनन्ति" इति, तदप्यसत् श्रुत्यन्तरे "स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति" इति जीवव्यापारश्रवणात्। इहापि च "य एष सुप्तेषु जागर्त्ति" इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता सङ्कीर्त्यते, तस्य तु वाक्यशेषेण "तदेव शुक्रं तद्ब्रह्मेति" जीवभावं व्यावर्त्त्य ब्रह्मभाव उपदिश्यते "तत्त्वमसि" इत्यादिवदिति न ब्रह्मप्रकरणं विरुध्यते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वास्ववस्थास्वधिष्ठातृत्वोपपत्तेः। पारमार्थिकस्तु नायं सन्ध्याश्रयः सर्गो वियदादिसर्गवदित्येतावत् प्रतिपाद्यते। न च वियदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति, प्रतिपादितं हि "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र समस्तस्य मायामात्रत्वम्। प्राक् च ब्रह्मात्मदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति, सन्ध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इत्यतो वैशेषिकं सन्ध्यस्य मायामात्रत्वमुदितम्" भा०। "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" सू०। "अथापि स्यात् परस्यैव तावदात्मनोऽंशो जीवोऽग्नेरिव विस्फुलिङ्गः। तत्रैवं सति यथाऽग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनशक्ती भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती, ततश्च जीवस्य ज्ञानैश्वर्यवशात् साङ्कल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति, अत्रोच्यते। सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वं, किं पुनर्जी-

[illegible]

[illegible]

[illegible]

वधक्रिया। जयो विवादे द्यूते च संग्रामे च तथा द्विज!। भक्षणञ्चार्द्रमांसानां मत्स्यानां पायसस्य च। दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च। सुरारुधिर-मद्यानां पानं क्षीरस्य चाथ वा। अन्त्रैर्वा वेष्टनं भूमौ निर्मलं गगनं तथा। मुखेन दोहनं शस्तं महिषीणां तथा गवाम्। सिंहीनां हस्तिनीनाञ्च वडवानां तथैव च। प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः। अम्भसा त्वभिषेकस्तु गवां शृङ्गाश्रितेन वा। चन्द्राद् भ्रष्टेन वा राजन्! ज्ञेयो राज्यप्रदो हि सः। राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा। मरणं वह्निदाहश्च वह्निदाहो गृहादिषु। लब्धिश्च राज्यचिह्नानां तन्त्रीवाद्याभिवाद-नम्। तथोदकानां तरणं तथा विषमलङ्घनम्। हस्ति-नीवडवानाञ्च गवाञ्च प्रसवो गृहे। आरोहणमथा-श्वानां रोदनञ्च तथाशुभम्। वरस्त्रीणां तथा लाभस्तथा-लिङ्गनमेव च। निगडैर्बन्धनं धन्यं तथा विष्ठानुलेप-नम्। जीवतां भूमिपालानां सुहृदामपि दर्शनम्। दर्शनं देवतानाञ्च विमलानां तथाम्भसाम्। शुभान्यथैतानि नरस्तु दृष्ट्वा प्राप्नोत्ययत्नाद् ध्रुवमर्थलाभम्। स्वप्नानि वै धर्मभृतां वरिष्ठ! व्याधेर्विमोक्षञ्च तथातुरोऽपि" मात्स्य न०।

स्वप्नकृत् न० स्वप्नं निद्रां करोति कृ-क्विप्। (सुषनि) शाके शब्दच०।

स्वप्नज् त्रि० स्वप-नजिङ्। शयनशीले अमरः।

स्वभाव पु० स्वस्य भावः। १निसर्गे आत्मन्ये स्वतःसिद्धे भावे च अमरः। "वह्निर्हेत्वमपेक्ष्यैव तु स्वभावोऽस्य प्रकीर्तितः। निसर्गश्च स्वभावश्च इत्येष भवति द्विधा। निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते। अनन्यस्तु स्वतःसिद्धः स्वरूपो भाव उच्यते" उज्ज्वलद०।

स्वभावोक्ति स्त्री स्वभावस्योक्तिरत्र। १अर्थालङ्कारभेदे अल-ङ्कारशब्दे ४०८ पृ० दृश्यम् ६त०। २स्वभावस्य कथने।

स्वभू पु० स्वेनैव भवति भू-क्विप्। १ब्रह्मणि मेदि० २विष्णौ अमरः। ३शिवे ४ईश्वरे ५कामे च।

स्वयंवर पु० स्वयमात्मना वरो वरणम्। कन्ययात्मनैव स्व-पतेर्वरणे "यदसि स्वयंवरः" नैष०। स्वयं वृणुते पतिम्। वृ-अच्। आत्मनैव पतिवरणकर्त्र्यां २कन्यकायां स्त्री।

स्वयंहारिका स्त्री ब्रह्मणो मानसपुत्रस्य दुःसहस्य निर्माष्टि-भार्यायास्तत्पत्न्यां कन्याभेदे मार्कण्डेयपु०। तत्र कन्याष्टौ नियोजिकादयः तासां कर्माणि तत्रोक्तानि तत्र "पताका कर्म वक्ष्यामि दापनगमाप्य यत्" इत्युपक्रमे "धान्यं खलात् गृहात् गोष्ठात् पयःसर्पिस्तथा परा। सम्ब्रस्वप्नविदुद्रव्यमपहन्ति च कन्यका। सा स्वयंहारि-केत्युक्ता सदान्तर्धानतत्परा" इति तस्याः कर्मोक्तम्।

स्वयङ्कृत पु० स्वयमात्मना कृतः। १कृत्रिमे पुत्रे "माता-पितृविहीनस्तु कर्मण स्यात् स्वयंकृता" स्मृतिः। २आत्म-कृते त्रि०। "पूर्वजुष्टः स्वयंकृतः" (पुरोहितः) स्मृतिः।

स्वयङ्गुप्ता स्त्री स्वयमात्मनैव गुप्ता। शूकशिम्ब्याम् शब्दच०।

स्वयन्दत्त पु० स्वयमात्मनैव न तु पितृमातृभ्यां दत्तः उपनतः दत्तात्मके पुत्रभेदे "दत्तात्मा तु स्वयन्दत्तः" याज्ञ०। "दत्तात्मा तु पुत्रो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः" मिता०।

स्वयम् अव्य० सु+अय-अम्। आत्मनेत्यर्थे अमरः।

स्वयम्भु पु० स्वयम्+भू-डु। ब्रह्मणि द्विरूप०। [राजनि०।

स्वयम्भुवा पु० स्वयम्भवति भू-बा० क। धूम०च्छायाम्

स्वयम्भू पु० स्वयं भवति भू-क्विप्। १चतुर्मुखे ब्रह्मणि अमरः ३बुद्धे च। ४काले शब्दर० ४कामदेवे ५विष्णौ ६शिवे च। ७माषपर्ण्यां [illegible] राजनि०। ९जिनभेदे हेमच०। १०परमेश्वरे "ततः स्वयम्भूर्भगवान्" मनुः। [अमस्वरत—त।

स्वर आक्षेपे अद० चुरा० उभ० सक० सेट्। स्वरयति-ते

स्वर् अव्य० सृ-विच्। १स्वर्गे अमरः "यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्" इत्युक्ते तु आसभिन्ने २सुखसन्ताने ३पर-लोके ४आकाशे ५शोभने च शब्दच०। द आसभिन्नत्वं च ध्वावच्छेदकशरीरासमवच्छिन्नत्वं तेन तु आसमान-कालीने सुखे नातिव्याप्तिः।

स्वर पु० स्वर-अच् स्वृ-अप् वा। १उदात्तानुदात्तस्वरितरूपे वर्णोच्चारणप्रयत्नभेदे तादृशस्वरवत्त्वाच्च २व्यञ्जनभिन्नवर्णेषु अकारादिषु शिक्षा। तन्त्रोक्ते ३प्राणादिवायोर्व्यापारभेदे ३आकाशादिकृते वर्णोच्चारणध्वनिविशेषे ४निषादादिषु तन्त्रीकण्ठोत्थेषु गानध्वनिषु च अमरः। "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" शिक्षा० अका-रादीनां स्वयंराजमानत्वात् स्वरत्वाच्च स्वरपदाभिधेय-ता, "अच स्वयं विराजन्ते इत्यत्र परमात्मन" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि" शिक्षोक्तेश्च। निषादादिस्वराणां प्राणिभेदस्वरतुल्यता नारदेनोक्ता यथा "षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्। अजा

ऽनुदात्तस्वरितपरत्वे त्वस्य सत्त्वम्" सि॰ कौ॰ । स्वरिताः मन्त्राश्च पाणिनिना फिट्सूत्रेण च अनुशिष्टा यथा । "तित् स्वरितम्" पा॰ तकारेत् प्रत्ययः स्वरितः स्यात् । "बिल्वतिष्ययोः स्वरितो वा" फिट्सू॰ १पाद । "अनयोरन्तः स्वरितो वा पक्षे उदात्तः" सि॰ कौ॰ । "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" पा॰ "उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात् । वध्यमि चि । स्वरितस्य यण । खलप्व्याशा । अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न" सि॰ कौ॰ "स्वरितो वाऽनुदात्ते पदादौ" पा॰ "अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात् । पक्षे पूर्वसूत्रेणोदात्तः । वीदं ज्योतिर्हृदये । अस्य श्लोको दिवीयते । व्यवस्थितविभाषात्वादिकारयोः स्वरितः दीर्घप्रवेशे तूदात्त । किञ्च एङः पदान्तादिति पूर्वरूपे स्वरित एव । तेऽवदन् । सोऽयमागात् । उक्तञ्च प्रातिशाख्ये "इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु चेति" सि॰ कौ॰ । "उदात्तादनुदात्तस्य स्वरितः" पा॰ "उदात्तात् परस्यानुदात्तस्य स्वरितः स्यात् । अग्निमीळे । अस्यासिद्धत्वाच्छेषनिघातो न । "तमीशानासः" सि॰ कौ॰ । "नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्" पा॰ "उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् । गार्ग्यादिमते तु स्यादेव । प्र य आरुः । क्व वोऽश्वा २ । का २ ईमरे" सि॰ कौ॰ । "न्यङ्स्वरौ स्वरितौ" फि॰ "एतौ स्वरितौ । न्यङ्ङुत्तानः । व्यचक्षयत् स्वः" सि॰ कौ॰ । "न्यर्बुदव्यल्कशयोरादिः" फि॰ । स्वरितः स्यात् । "तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः" फि॰ । स्वरितः स्यात् । "तिलानां भवनं क्षेत्रं तिल्यम् । यतोऽनाव इति प्राप्ते" सि॰ कौ॰ । "बिल्वभक्ष्यवीर्याणि च छन्दसि" फि॰ ४र्थपादः । "अन्तस्य स्वरितमिति" सि॰ कौ॰ । "स्वरितेनाधिकारः" पा॰ "स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम्" सि॰ कौ॰ "स्वरितेनेति इत्थंभावे तृतीया स्वरितत्वज्ञाप्योऽधिकार इत्यर्थः स्वरितत्वञ्च दोषविशेषजन्यमङ्गुलिधारणाश्रयम् पाणिक्रियमाणपदघटकाक्षरान्वितं वा बोध्यम् । तस्मात् नासिकत्ववत् प्रतिज्ञयैव निर्णीयते अधिकारश्च कियद्दूरमित्यत्रापि बाधके व्याख्यानमेव शरणम्" शब्देन्दु॰ । "स्वरितञितः आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा॰ "स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्रभिप्राये क्रियाफले" सि॰ कौ॰ । स्वर-क्त । ४स्वरयुक्ते त्रि॰ ।

स्वरु पु॰ स्वृ-उ । १वज्रे अमरः २यूपखण्डे ३बाणे ४यज्ञे मेदि॰ । ५सूर्यकिरणे ६वृश्चिकभेदे च उणा॰ ।

स्वरुचि त्रि॰ स्वस्यैव रुचिः प्रवर्त्तिका स्वकार्ये यस्य । १स्वतन्त्रे हेमच॰ ६त॰ । २स्वस्याभिलाषे स्त्री ।

स्वरूप न॰ स्वस्य रूपम् । १स्वभावे अमरः । स्वमेव रूपम् । २स्वात्मके पदार्थे । स्वं यथा स्यात् तथा रूपयति रूप-अण् । ३यथास्वरूपाभिज्ञे पण्डिते पु॰ अमरः । स्वेन स्वभावेनैव रूपमस्य । ४मनोज्ञे त्रि॰ अमरः ।

स्वरूपसम्बन्ध पु॰ स्वरूपः सम्बन्धः स्वरूपयोर्वा सम्बन्धः । न्यायोक्ते स्वात्मके सम्बन्धे षट्पदार्थातिरिक्ते पदार्थभेदे यथा प्रतियोगित्वम् विषयत्वमित्यादि ।

स्वरोदय पु॰ स्वरेणोदयो शुभादिज्ञापकतया यत्र । स्वरस्य श्वासविशेषस्य शुभाशुभत्वज्ञानसाधने तन्त्रशास्त्रभेदे शब्दकल्प॰ २८१० पृ॰ दृश्यम् ।

स्वर्ग पु॰ स्वरिति गीयते गै-क सु+ऋज-घञ् वा । १दुःखासम्भिन्ने सुखे २देवानामावासस्थाने च अमरः । स्वर्गकारणस्वरूपादिकं भा॰ व॰ २६० अ॰ उक्तं यथा "उपरिष्टादसौ लोको योऽयं स्वरिति संज्ञितः । ऊर्द्ध्वगः सत्पथः शश्वद्देवयानचरो मुने ॥ नातप्ततपसः पुंसो नामहायज्ञयाजिनः । नानृता नास्तिकाश्चैव तत्र गच्छन्ति मुद्गल ॥ धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः । दानधर्मरता लोका शूराश्चाहवलक्षणाः । तत्र गच्छन्ति धर्माग्र्यं कृत्वा शमदमात्मकम् । लोकान् पुण्यकृतान् ब्रह्मन् ! सद्भिराचरितान्नृभिः । देवाः साध्यास्तथा विश्वे तथैव च महर्षयः । यामा धामाश्च मौद्गल्य ! गन्धर्वाप्सरसस्तथा । एषां देवनिकायानां पृथक् पृथगनेकशः । भास्वन्तः कामसम्पन्ना लोकास्तेजोमयाः शुभाः । त्रयस्त्रिंशत्सहस्राणि योजनानि हिरण्मयः । मेरुः पर्वतराड् यत्र देवोद्यानानि मुद्गल ! ॥ नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम् । न क्षुत्पिपासे न ग्लानिर्न शीतोष्णे भयं तथा । बीभत्समशुभं वाऽपि तत्र किञ्चिन्न विद्यते । मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शाश्च सर्वशः । शब्दाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने ! ॥ न शोको न जरा तत्र नायासपरिदेवने । ईदृशः स मुने ! लोकः स्वकर्मफलहेतुकः । सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्मकर्मभिः । तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम् । कर्मजान्येव मौद्गल्य ! न मातृपितृजान्युत । न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव

[illegible]

सर्मगाय [illegible]

सर्मवधू [illegible]

सर्गोषव [illegible]

सर्गिन् [illegible]

सर्मीकस् [illegible]

सर्विष [illegible]

सर्व [illegible]

[illegible]

सर्ववरुणी [illegible]

[illegible]

[illegible]

स्वर्णकेतकी स्त्री स्वर्णमिव पीतत्वात् केतकी। पीतकेतक्याम् राजनि०। तत्पुष्पादिगुणाः "कनकोकुसुम वर्णं केशदौर्गन्ध्यनाशनम्। हेमाभं मदनोन्मादवर्द्धन्यसौख्यकारि च। तस्याः कान्तोऽग्निशिशिरः कटु पित्तकफापह। रसायनकरो मध्यो देहदार्ढ्यकरः परः" राजनि०।

स्वर्णक्षीरी स्त्री स्वर्णमिव पीतत्वात् क्षीरं निर्यासो यस्याः गौरा० ङीष्। ओषधिभेदे सा च हिमालये जायते। "हेमवर्णा रसस्राविनी हिमवद्भूमिसम्भवा। सा नागजिह्विकाकारा तन्मूलं वाप्यजोऽध्वम्। स्वर्णक्षीरी हिमा तिक्ता कृमिपित्तकफापहा। मूत्रकृच्छ्राश्मरी गाधदाहज्वरहरा परा" राजनि०।

स्वर्णगैरिक न० स्वर्णमिव पीत गैरिकम्। (सर्णकमाटि) पदार्थभेदे राजनि०।

स्वर्णग्रीवा स्त्री नदीभेदे। "या निःसृता पूर्वभागात् तस्मात् गिरिवरात् (नाटकपर्वतात्)-नदी। स्वर्णग्रीवेति विख्याता सा गङ्गाऽदयोफले" कालिकापु० ८२ अ०।

स्वर्णचूड १ स्त्री० स्वर्णमिव पीतत्वात् चूडा यस्य। चाष पक्षिणि शटा० स्त्रियां ङीष्। [जातमात्रे त्रि०।

स्वर्णज न० स्वर्णात् जायते जन–ड। १वङ्गे हेमच० २स्वर्ण-

स्वर्णजीवन्ती स्त्री० स्वर्णमिव पीतत्वात् जीवन्ती। पीत पुष्पजीवन्त्याम् राजनि०।

स्वर्णदी स्त्री स्वर्णं द्युति अपसारयति तत्स्वर्णत्वात् दो–क गौरा०ङीष्। १वृश्चिकाल्याम् राजनि। ३त० ष्यत्वम्। २गङ्गायाम् अमर। [२चित्तरुज्ये च त्रिका०।

स्वर्णदीधिति पु०स्वर्णमिव भास्वरा दीधितिरस्य। १अग्नौ,

स्वर्णद्रु पु०स्वर्णमिव पुष्पे पीतो द्रुः। आरगवधे राजनि०।

स्वर्णपक्ष पु० स्वर्णमिव पीतः पक्षोऽस्य। गरुडे त्रिका०।

स्वर्णपाटक पु०स्वर्णं पाटयति पट–णिच्–ण्वुल्। टङ्कणे (सोहागा) शब्दर०।

स्वर्णपुष्प पु० स्वर्णमिव पीत पुष्पमस्य। १चम्पके २आरगवधे ३ स्त्री० राजनि० स्त्रीत्वे ङीप। सा च ४स्वर्णकेत क्याम् राजनि०। ५सातलायाम् ६कलिकार्या स्त्री राजनि० टाप्। [सुवर्णकदल्याम् राजनि०।

स्वर्णफला स्त्री स्वर्णमिव पीत फलमस्याः। (चापाकला)

स्वर्णवणिज् पु० ६त०। सुवर्णवणिजि जातिभेदे।

स्वर्णभृङ्गार पु० स्वर्णमिव स्वर्णमयो वा भृङ्गार। १पीतभृङ्गराजे राजनि०। २स्वर्णमयजलपात्रभेदे च।

स्वर्णमाक्षिक न० स्वर्णमिव पीत माक्षिकम्। स्वनामख्याते उपधातुभेदे "किञ्चित सुवर्णसाहित्यात् स्वर्णमाक्षिकमीरितम्। उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किन्तु तस्मात्कमत्वात् किञ्चिद्धीनगुणास्ततः। न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणास्तत। सुवर्णमाक्षिक स्वादु तिक्तं वृष्य रसायनम्। चक्षुष्य वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम्। अर्शः शोथ विष कण्डु त्रिदोषमपि नाशयेत्"। चरक स्वर्णमाक्षिकस्य दोषमाह "मन्दानलत्व बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान्। मालां तथैव व्रणपूर्विकाञ्च कुर्यादशुद्ध खलु माक्षिकञ्च"। तद्दोषशान्त्यर्थं शोधनमाह "माक्षिकस्य त्रयो भागा भागैक सैन्धवस्य च। मातुलुङ्गद्रवैर्वाथ जम्बीरस्य द्रवैः पचेत्। चालयेल्लोहजे पात्रे यावत् पात्रं सुलोहितम्। भवेत्ततस्तु संशुद्ध स्वर्णमाक्षिकमीरितम्"। तन्मारण यथा "कुलत्थस्य कषायेण घृष्टा तैलेन वा पुटेत्। तैलेनैवाजमूत्रेण म्रियते स्वर्णमाक्षिकम्" भावप्र०।

स्वर्णयूथी स्त्री स्वर्णमिव पीता यूथी। पीतयूथिकायाम् शब्दच०

स्वर्णलता स्त्री स्वर्णमिव पीता लता। ज्योतिष्मत्या राजनि०

स्वर्णवर्णा स्त्री स्वर्णमिव वर्णोऽस्यास्याः। १हरिद्रायाम् राजनि०। २सुवर्णवर्णे त्रि० ३हेममूल्यसतापत्रे वर्णे च।

स्वर्णवल्कल पु० स्वर्णमिव पीत वल्कलमस्य। शोनाकद्रुमे शब्दच०।

स्वर्णवल्ली स्त्री स्वर्णमिव पीता वल्ली। लताभेदे "स्वर्णवल्ली रक्तफला काकायु काकवल्ल्यपि। शिरापीड़ा विदोषघ्नी दुग्धदात्री च सा मता" राजनि०।

स्वर्णशेफालिका स्त्री स्वर्णमिव पीता शेफालिका। १पीतशेफालिकायाम्। २आरगवधे राजनि०।

स्वर्णाङ्ग पु० स्वर्णमिवाङ्गं पुष्प यस्य। १आरगवधे राजनि० २पीतवर्णदेहयुते त्रि० स्त्रियां ङीष्।

स्वर्णारि पु० ६त०। गन्धके तस्य स्वर्णमारकत्वात्तथात्वम्।

स्वर्णुली स्त्री स्वर्णं तद्वर्णं लीयते पुष्पेऽस्य ली–आधारे क्विप् पृषो०। स्वर्णुली हेमपुष्पी च स्वर्णपुष्पाध्वजा तथा। सा कषाया कटु शीता अपचहा परिकीर्त्तिता" राजनि० लताभेदे। [र्यति ते स्वर्त्तत्। स।

स्वर्त्त गतौ सक० द सेन जीवने अक० चु० उ०सेट्। स्वर्त्त-

स्वर्द सीतौ अक० शोषणे वेदने च सक० भ्वा०आत्म० सेट्।

[illegible]

सभाजन पु [illegible]

सभाजु पु [illegible]

सर्वाक्ष पु [illegible]

सुवर्णपी स्त्री [illegible]

सुवर्णमा स्त्री [illegible]

सर्वेष पु [illegible]

सक्षोन पु [illegible]

सम्प त्रि [illegible]

[illegible]

अस्तिमुख पु [illegible]

सुस्थिवासन न [illegible]

सस्थिवासनिक त्रि [illegible]

सस्थपन न [illegible]

सस्म त्रि [illegible]

सस्तीय पु [illegible]

सासत न [illegible]

साहित्य [illegible]

सामसार न [illegible]

साति(ती) स्त्री [illegible]

सातियास पु [illegible]

च चन्द्रे। चाराहसुक्तो निखिलं विचिन्त्य योऽस्मिन् विशे षमथ प्रवक्ष्ये। स्वातौ निशाशे प्रथमेऽभिवृष्टे शस्यानि सर्वाण्युपयान्ति वृद्धिम्। भागे द्वितीये तिलमुद्गमाषा ग्रैष्म तृतीयेऽस्ति न शारदानि। वृष्टेऽह्नि भागे प्रथमे सुदृष्टं सद्द्वितीये तु सकीटसर्पा। वृष्टिस्तु मध्यापरभागवृष्टे निश्छिद्रवृष्टिर्द्युमिव प्रवृष्टे। समस्तमेव तारा चि त्रायाः कीर्त्तित स्वातेस्तु। तस्मादस्य चन्द्रे स्वाते- र्योगः शिवो भवति। यद्यस्या स्वातियोगे यदि पतति हिम माघमासान्धकारे वायुर्वा चण्डवेगः सजलजल- धरो वापि गर्जत्यजस्रम्। विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं विज्ञेया प्रावृडेषा मुदित- जनपदा सर्वशस्यैरुपेता। तथैव फाल्गुने चैत्रे वैशा खमासास्तितेऽपि वा। स्वातियोगं विजानीयादाषाढे च विशेषतः"। [विट्। स्वादते आस्वादिट।

स्वाद प्रीतौ भ्वा० प्रीणने वेष्टने च भ्वा० आ० सेट्।

स्वाद पु० स्वद-स्वाद-वा घञ्। १रसानुभवे २प्रीतौ ३प्रीणने ४वेष्टने च। ल्युट्। स्वादनमप्यत्र न०। रसानुभवप्रकार सा० द० उक्तो यथा

"न जायते तदास्वादो विना रत्यादिवासनाम्" वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः। तत्र यदि आद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात्। यदि द्वितीया न स्यात् यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात्। उक्तञ्च धर्म- दत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत्। निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः"।

स्वादिष्ठ त्रि० अतिशयेन स्वादु। इष्ठन् टिलोपः। अतिमधुरे ईयसुन्। स्वादीयस् तत्रार्थे त्रि० स्त्रियां ङीप्।

स्वादु पु० स्वद—उण्। १मधुररसे हेमच० २गुडे त्रिका० ३जीवकौषधौ जटा०। ४इष्टे ५मधुरे ६मनोज्ञे च त्रि मेदि० स्त्रियां वा ङीप्। सा च ७द्राक्षायां अमरः दध्यगुरुसारे गन्धद्रव्ये पु० राजनि०।

स्वादुकण्टक पु० स्वादु कण्टकोऽस्य। विकङ्कतवृक्षे राजनि०

स्वादुकन्दा स्त्री स्वादुः कन्दोऽस्याः। विदार्य्याम् राजनि०।

स्वादुका स्त्री स्वादुना मधुररसेन कायति कै-क। नाग दन्त्याम् राजनि०। [१मधुरे भागे।

स्वादुखण्ड प स्वादु मिष्टः खण्डोऽस्य। गुडे शब्दर० कर्म०।

स्वादुगन्धा स्त्री स्वादुरिष्टगन्धोऽस्याः। १रक्तशोभाञ्जने रत्नमा०। २भूमिकुष्माण्डाम् जटा०।

स्वादुपर्णी स्त्री स्वादूनि पर्णान्यस्याः ङीप्। दुग्धिकायाम् राजनि०।

स्वादुपाका स्त्री स्वादु पाकोऽस्याः। काकमाच्याम् राजनि०

स्वादुपिण्डा स्त्री स्वादुः पिण्डः पिण्डाकारफलमस्याः। पिण्डखर्जूर्य्याम् राजनि०।

स्वादुफला स्त्री स्वादु फलमस्याः। १बदरीफले शब्दर०कर्म०। २मिष्टे फले न०। ३ कोची स्त्री शब्दर० टाप्।

स्वादुमज्जन् पु० स्वादुः मज्जा यस्य। पर्वतजे पीलौ जटा०

स्वादुमांसी स्त्री स्वादु मांसमिव फलमस्याः गौरा० ङीष्। काकोल्याम् राजनि०।

स्वादुमूल न० स्वादु मूलमस्य। गर्जरे (गाजर) राजनि।

स्वादुरसा स्त्री स्वादुः रसो यस्याः। १काकोल्याम् अमरः २मदिरायाम् हेमच०। ३शतावर्य्यां ४द्राक्षायाम् ५आम्रा- तके च शब्दर०।

स्वादुलता स्त्री स्वाद्वी लता। विदार्य्याम् राजनि०।

स्वादुपुष्प पु० स्वादु पुष्पं यस्य। कटभ्यां राजनि०।

स्वादूदक पु० स्वादु उदकं यस्य। समुद्रभेदे त्रि० त्रि०।

स्वाद्वम्ल पु० स्वादुः अम्लः। दाडिमे त्रिका०।

स्वाधिष्ठान न० लिङ्गमूलस्थे सुषुम्नान्तर्गते षड्दलपद्मभेदे। "षड्दले वैद्युतनिभे स्वाधिष्ठानेऽमलत्विषि। बसभैयरलैर्युक्ते वर्णैः सबिन्दु सुव्रत।" तन्त्रसा०। "सिन्दूरपूर- रुचिरारुणपद्ममन्यत्सौषुम्नमध्यघटितं ध्वजमूलदेशे। अङ्गच्छदैः परिवृतं तडिदाभवर्णैर्बाद्यैः सबिन्दुकमितैश्च पुरन्दरान्तैः (लान्तैः)। तस्यान्तरे प्रविलसद्विशदप्रकाशम- म्भोजमण्डलमथो वरुणस्य तस्य। अर्द्धेन्दुरूपलसितं शर दिन्दुशुभ्रं वङ्कारबीजममलं मकराधिरूढम्। तस्याङ्कदेश कलिता हरिरेव पायात्रीलप्रकाशरुचिरश्रियमादधानः। पीताम्बरः प्रथमयौवनगर्वधारी श्रीवत्सकौस्तुभधरो धृतवेदबाहुः। अत्रैव भाति सततं खलु राकिणी सा नीलाम्बुजद्युतिसहोदरकान्तिशोभा। नानायुधोद्यतकरै र्लसिताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषितमत्तचित्ता। स्वाधि- ष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्यो मनोज्ञस्त्वा- हङ्कारदोषादिकसकलरिपु क्षीयते तत्क्षणेन" पूर्णानन्द- षट्चक्रम्।

स्वाधीन त्रि० स्वस्याधीनः। स्वायत्ते स्वतन्त्रे।

स्वाधीनपतिका स्त्री स्वाधीनः पतिर्यस्याः कप्। नायि काभेदे स्वाधीनभर्तृकादयोऽप्यत्र।

"कान्तो रतगुणाकृष्टो न जहाति यदन्तिकम्। वि

[illegible]

स्वाध्याय [illegible]

स्वान्त [illegible]

स्वाप [illegible]

स्वापतेय [illegible]

स्वाभाविक [illegible]

स्वामिन् [illegible]

स्वामिपालविवाद [illegible]

निवेदयन्। वोढुमर्हति गोपस्तं विनयञ्चैव राजनि” इति। तद्गवादिकम्। पशूना दैवात् मरणे पालकस्य दोषाभावज्ञानोपायमाह व्यास “मृतेषु च विशुद्धः स्याद् वालशृङ्गादिदर्शनात्”। आदिशब्देन कर्णौ दीनां ग्रहणम्। तथा च मनुः “कर्णौ चर्म च वालांश्च वस्तिं स्नायुञ्च रोचनाम्। पशुषु स्वामिना दद्यान्मृतेष्वङ्गानि दर्शयेत्” इति। अङ्कादि दर्शयेदिति क्वचित् पाठः। अङ्क शृङ्गकर्णादिरूपश्चिह्नम्। आदिशब्द वालादिसंग्रहार्थः। पशुषु मृतेष्वङ्कादिकं स्वामिने दर्शयेत्। रोचनादिकं यत्प्रयोजनं तत् तस्मै दद्यादित्यर्थं। नष्ट गवादिदानञ्च तत्स्वामिने मूल्यद्वारेण ज्ञातव्यम्। अतएव विष्णुः “दिवा पशूनां वृकाद्युपघाते पालेऽनायति पालस्यैव दोषो विनष्टपशूनां मूल्यं स्वामिने दद्यादिति”। अनायति अनागच्छति। विनयद्रव्यम् प्रमाह याज्ञवल्क्यः “पालदोषविनाशे तु पाले दण्डो विधीयते। अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च” इति। अर्द्धत्रयोदशपणः अर्द्धरहितत्रयोदशपणः। सार्द्धद्वादशपण इति यावत्। उत्तरपदलोपी कर्मधारयः। यत्तु केनचिदर्द्धाधिकत्रयोदशपणो दण्ड इति व्याख्यातं तत् सार्द्धद्विमाषादिषु अर्द्धत्रिमाषादि महाभाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम्। पालदोषमाह मनुः “अजाविके तु संरुद्धे वृके पाले त्वनायति। यां प्रसह्य वृको हन्यात् पाले तत् किल्विषं भवेत्” इति। अनायति उपद्रवनिवारणाय अनागच्छतीत्यर्थः। याम् अजाविकजातीयाम्। सुगमस्थलस्य विषयमेतत्। दुर्गमस्थलस्थविषये त्वाह स एव “तासाञ्चेदवरुद्धानां चरन्तीनां मिथो वने। यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्विषी” इति। अवरुद्धानां पालकेन स्थापितानामित्यर्थः। गवादिप्रचारणार्थं भूमिमाह याज्ञवल्क्यः “ग्रामेच्छया गोप्रचारो भूमीराजवशेन वा”। ग्रामेच्छया ग्रामीणजनवशेन राजेच्छया वा। गोप्रचारो गवां तृणादिभक्षणार्थं कियानपि भूभागोऽकृष्टः परिकल्पनीय इत्यर्थः। तथा स्थानासमर्थीकव्याय ग्रामक्षेत्रयोरन्तरमाह स एव “धनुः शतपरीणाहो ग्रामक्षेत्रान्तरं भवेत्। द्विशते खर्वटस्य स्यान्नगरस्य चतुःशतम्” इति। परीणाहशब्देनात्र सर्वासु दिक्षु अतुम्र गव्यस्व कथ्यते। एतादृश धनुःशत परिमितं ग्रामक्षेत्रयोरन्तरं कार्य्यम्। खर्वटस्य शतद्वयपरिमितमित्यर्थः। खर्वट अनेककाववल्लीयनयुक्तो ग्राम इति मदनरत्ने। माधवाचार्य्यैस्तु प्रचुरकण्टकमल्लाको ग्राम इति व्याख्यातम्। तत्र शस्योत्पत्ते पार्श्वावरणं कार्य्यमित्याह कात्यायनः “अजातश्चैव शस्येषु कुर्य्यादावरणं महत्। दुःखेन विनिवार्य्यन्ते लक्ष्मणादरता मृगाः” इति। एवं पशुनिवारणाय कृतेऽप्यावरणे तमतिक्रम्य पशुभिः शस्यादिविनाशे कृते कर्त्तव्यमाह मनुः “पथिक्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः। स पालः शतदण्डार्हो विपालं वारयेत् पशुम्” इति। पथिक्षेत्रे मार्गसमीपे क्षेत्रे। ग्रामान्तीये ग्रामसमीपवर्त्तिनि। सपालः पशुः पणशतदण्डार्हः तत्पशुपालः पणशतं दण्डनीय इत्यर्थः। अयञ्च दण्डः पशुपालने समर्थेन सता पशावनिवार्य्यमाणे वेदितव्यः। अतएव नारदः “उत्क्रम्य तु वृतिं यः स्याच्छस्यघातो गवादिभिः। पालः शास्यो भवेत् तत्र न चेच्छक्तो निवारयेत्” इति। आवरणाभावेनापरिहार्य्ये शस्योपघातेऽपि न पालस्य दण्डः। तथा च मनुः “तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्” इति। अनेनावृतक्षेत्रशस्योपघाते पशुरक्षिणां दण्ड इत्यर्थादुक्तं भवति। अदीर्घकालप्रचारविषयमेतत्। दीर्घकालप्रचारे तु अपरिवृतेऽपि पशुपालो दण्डार्हो भवति। अतएवाल्पकालप्रचारे दोषाभावं दर्शयति विष्णुः “पथि ग्रामविवीतान्ते न दोषोऽल्पकालमिति”। पशुविशेषे दण्डपरिमाणमाह याज्ञवल्क्यः “माषानष्टौ तु महिषी शस्यघातस्य कारिणी। दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकम्। भक्षयित्वोपविष्टानां यथोक्ताद् द्विगुणो दमः। सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्” इति। परशस्यघातकारिण्या महिष्या स्वामी अष्टौ माषान् दण्ड्यः। गोस्वामी चतुरः। छागस्वामी मेषस्वामी च द्वौ। एतेषां पशूनां शस्यभक्षणादारभ्य तत्रैव उपविष्टानां स्वामी यथोक्तदण्डाद् द्विगुणं दाप्यः। विवीतस्थतृणाद्युपघातेऽपि शस्योपघातवद्दण्डनीयः। खरस्वाम्युष्ट्रस्वामी च महिषीस्वामिवद्दण्डनीयः। अत्र पशुस्वामिनो दण्ड इत्यभिधातव्ये महिष्यादिग्रहणं प्रतिपशुदण्डप्राप्त्यर्थम्। भक्षयित्वापायन्वतत्सायिषये यथोक्ताद्द्विगुणो दण्डः। तथा च स्मृत्यन्तरम् “वसतां द्विगुणं प्रोक्तं सवत्सानां चतुर्गुणम्” इति। अत्रापराधानुसारेण दण्डस्य तात्त्विकमाषो ग्राह्यः न पुन

मितया वातहरसिद्धस्नेहाभ्यक्तगात्रो वाष्पमपहरेत्। वाष्पो ह्यनूर्द्ध्वगामी विहतचण्डवेगस्त्वचमविदहन् सुख्ं स्वेदयतीति नाडीस्वेदः ३। वातिकोत्तरवातिकानां पुनर्मूलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्वा धूपिकाः प्रनाडीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ४। वातहरोत्क्वाथक्षीरतैलघृतपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः ५। "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत इत्यादि" । (जेन्ताकशब्दे ३१४४ पृ॰ अस्य वचनादुक्तप्रायम्६।) "गवाक्षानां प्रमाणेन घनामस्फुटतीं शिलाम्। तापयित्वा मारुतघ्नैर्दारुभिः सम्प्रदीपितैः। व्यपोह्याङ्गारं सर्वान् मङ्गारान् प्रोक्ष्य चैवोष्णवारिणा। तां शिलामथ कुर्वीत कौषेयाविकसंस्तराम्। तस्यां स्वभ्यक्तसर्वाङ्गः शयानः स्विद्यते सुखम्। रौरवाजिनकौषेयप्रावाराद्यैः सुसंवृतः। इत्युक्तोऽश्मघनस्वेदः ७। कर्षूस्वेदः प्रवक्ष्यते। स्थानेष्वेवायनस्याधः कर्षूं स्थानविभागवित्। दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः। तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम्८। अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम्। घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः सम्प्रदेहयेत्। कुटीमध्ये भिषक् शय्यां स्वास्तीर्णां चोपकल्पयेत्। प्रावाराजिनकौषेयकुथकम्बलगोलकैः। हसन्तिकाभिरङ्गारपूर्णाभिस्तां च सर्वशः। परिवार्य्यान्तरारोहेदभ्यक्तः स्विद्यते सुखम्९। य एवाश्मघनस्वेदविधिर्भूमौ स एव तु। प्रशस्तायां निवातायां समायामुपदिश्यते१०। कुम्भीं वातहरक्वाथपूर्णां भूमौ निखातयेत्। अर्द्धभागं त्रिभागं वा शयनं तत्र चोपरि। स्थापयेदासनं वापि नातिसान्द्रपरिच्छदम्। अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुडान्। पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम्११। सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः। कूपं शयनविस्तारं द्विगुणञ्चापि वेधतः। देशे निवाते शस्ते च कुर्य्यादन्तः सुमार्जितम्। हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते। स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम्१२। धीतीकान्तु करीषाणां यथोक्तानां प्रदीपयेत्। शयनान्तः प्रमाणेन शय्यामुपरि तत्र च। सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत्। स्ववच्छन्नः स्वपन्नभ्यक्तः स्विद्यति ना सुखम्। होलाकस्वेदः१३ इत्येष सुखः प्रोक्तो मनुर्द्दिशेदिति"। इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः। व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा। बहुपानं भयक्रोधावुपनाहाहवातपाः। स्वेदयन्ति दशैतानि नरमग्निगुणादृते। इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च। एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च। इत्येतत् त्रिविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्त्तितम्। स्निग्धः स्वेदैरुपक्रम्यः स्विन्नः पथ्याशनो भवेत्। तदहः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः" इति। तत्र श्लोकाः "स्वेदा यथा कार्य्यकरा हिता येभ्यश्च यद्विधाः। यत्र देशे यथायोग्या दशौ रक्ष्यश्च यौ यथा। स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम्। अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना। त्रयोदशविधः स्वेदो विना दशविधोऽग्निना। सङ्ग्रहेण च षट्स्वेदाः स्वेदाध्याये निदर्शिताः। स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा। शिष्यैस्तु प्रतिपत्त्यर्थमपरेण पुनर्वसुरिति"।

स्वेदज पु॰ स्वेदाज्जायते जन–ड। १स्वेदजाते दंशादिजन्तौ अमरः २स्वेदजातमात्रे त्रि॰।

"सस्वेदजाण्डजाराश्च यथा येभ्यो भवन्ति च। मातुरस्वेदजाता मक्षिकाद्या भवन्ति च। नवमेघप्रसिक्तायां पिपीलिकगणादयः। संस्वेदजास्तु विज्ञेयाः ऊष्मगोमयसम्भवाः। सर्पिर्दध्यो माषमुद्गेभ्यः फलेभ्यश्चैव जन्तवः। जायन्ते क्रिमयो विप्राः। काष्ठेभ्यो घुणकादयः। तथा शुष्कविकारेभ्यः पूतिकाः प्रभवन्ति च। संस्वेदजाश्च जायन्ते ह्यविका शुष्कगोमयात्। गात्रेभ्यो हि मनुष्याणां मातृभ्यश्च जन्तवः। मत्स्यादिभ्यश्च विविधा अत्र कृमयो विशेषतः। आयान्त्यानि च सूक्ष्माणि सूक्ष्मयूकास्तथैव च। गोभ्योऽश्वेभ्यस्तथा चैव व्याटादकिनी मता। मांसिकाद्या विकाराश्च उत्स्वेदोत्कर्दमे। मरावति विकाराश्च करीषेभ्यो भवन्ति हि। एवमादिरसस्यातो गणः संस्वेदजो मया। सर्वांसां निश्चितो स्रोपः प्राकृतसंचयः स्मृतः" वह्निपु॰।

स्वेदन न॰ स्विद–णिच् ल्युट्। गन्धादितो धर्म्मादिनिःसारणव्यापारे (घामरा)। स्वेदशब्दे दृश्यम्।

स्वेदनी स्त्री स्विद्यते पच्यतेऽनया स्विद–ल्युट्। लौहपात्रभेदे (ताओया) अमरः। तस्यां कम् टापि स्वुक्त स्वेदनिका कन्दुकरूपे पात्रे हेमच॰ भर्जनपात्रे शब्दमा॰।

स्वैर न॰ स्वस्य ईरम् ईर–घञ् टच्। १स्वेच्छायाम् २मन्दगतौ ३मन्दे च त्रि॰ मेदि॰।

स्वैरिन् त्रि॰ स्वेनैव ईरयितुं शीलमस्य ईर–णिनि टच्। १स्वेच्छाचारिणि सनन्त्ये। २व्यभिचारि स्त्रियां स्त्री

मितया वातघ्नसिद्धस्नेहाभ्यक्तगात्रो यावन्नपद्येत् । यावन्न दह्यते तावत् तिष्ठेत् स्नेहाभ्यक्तगात्रः स्वेद्यः । स्वेदयतीति नाडीस्वेदः ३। वातिकोत्तरवातिकानां पुनर्मूलादीनाञ्चार्थे सुखोष्णे कुम्भीकोष्ठे स्नेहाभ्यक्तगात्रः पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ४। वातघ्नोत्काथक्षीरतैलघृतपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः ५।

"अथ जेन्ताकं यथा..." (जेन्ताकशब्दे ३१४३ पृ॰ अस्य लक्षणादुक्तप्रायम्६ ।)

"यवानस्य प्रमाणेन घनामश्ममयीं शिलाम् । तापयित्वा मारुतघ्नैर्दारुभिः सम्प्रदीपितैः । व्यपोह्य सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा । तां शिलामथ कुर्वीत कौषेयाविकसंस्तराम् । तस्यां स्वभ्यक्तसर्वाङ्गः शयानः स्विद्यते सुखम् । रौरवाजिनकौषेयप्रावाराद्यैः सुसंवृतः । इत्युक्तोऽश्मघनस्वेदः ७। कर्षूस्वेदः प्रवक्ष्यते । खानयेच्छयनस्याधः कर्षूं स्थानविभागवित् । दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः । तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम् ८। अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम् । घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः सम्प्रलेपयेत् । कुटीमध्ये भिषक् शय्यां स्वास्तीर्णां चोपकल्पयेत् । प्रावाराजिनकौषेयकुथकम्बलगोलकैः । हसन्तिकाभिरङ्गारपूर्णाभिस्तां समन्ततः । परिवार्यान्तरारोहेदभ्यक्तः स्विद्यते सुखमू९ । य एष कुटी-स्वेदविधिर्भूमौ स एव तु । प्रशस्तायां निवातायां समायामुपदिश्यते१० । कुर्य्याद्‌ वातघ्नकाष्ठपूर्णां भूमौ निखातयेत् । अर्धभागं त्रिभागं वा गम्भीरं तत्र चापरम् । स्थापयेदासनं वापि नातिसान्द्रपरिच्छदम् । अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसोगुडान् । पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम्११। सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः । कूपं शयनविस्तारं द्विगुणञ्चापि वेधतः । देशे निवाते शस्ते च कुर्य्यादन्तः सुमार्जितम् । हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते । स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम्१२। धीधीकान्तु करीषाणां यथोक्तानां प्रदीपयेत् । शयनान्तः प्रमाणेन शय्यामुपरि तत्र च । सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत् । स्ववच्छन्नः स्वपन्नभ्यक्तः स्विद्यति ना सुखम् । होलाकस्वेदः१३ इत्येष सुखः प्रोक्तो मरुद्‌गणहरः । इति त्रयोदशविधः स्वेदोऽग्निगुणाश्रयः । व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा । बहुपानं भयक्रोधावुपनाहाहवातपाः । स्वेदयन्ति दशैतानि नरमग्निगुणादृते । इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च । एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च । इत्येतत् त्रिविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्त्तितम् । स्निग्धः स्वेदैरुपक्रम्य स्विन्नः पथ्याशनो भवेत् । तदहः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः" इति । तत्र श्लोकाः 'स्वेदो यथा कार्य्यकरो हितो यस्मै च यद्विधः । यत्र देशे यथायोग्यो देशो रक्ष्यश्च यो यथा । स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम् । अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना । त्रयोदशविधः स्वेदो विना दशविधोऽग्निना । संग्रहेण च षट्‌ स्वेदाः स्वेदाध्याये निदर्शिताः । स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा । शिष्यैस्तु प्रतिपत्त्यर्थमुपदिष्टा पुनर्वसुरि"ति ।

स्वेदज पु॰ स्वेदाज्जायते जन—ड । १स्वेदजाते दंशादिजन्तौ अमर २स्वेदजातमात्रे त्रि॰ ।

"अस्वेदजाश्च कारीषा यथा येभ्यो भवन्ति च । मानुषस्वेदजा ज्ञेया मक्षिकाद्या भवन्ति च । नवमेघप्रसिक्तायां पिपीलिकगणादयः । अस्वेदजास्तु विज्ञेया इक्षुगोमयसम्भवाः । शाकिद्रुमा माषमुद्गेभ्यः कटेभ्यश्चैव जन्तवः । जायन्ते कृमयो विषाः । काष्ठेभ्यो घुणकीटाश्च । तथा शुक्तविकारेभ्यः पूतिकाः प्रभवन्ति च । अस्वेदजाश्च जायन्ते वृश्चिका शुष्कगोमयात् । गाभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः । मत्स्यादिभ्यश्च विविधा अन्न कृमयो विशेषतः । यथान्वास्मि च सूक्ष्मा हि सूक्ष्मायूकाश्चैव च । गोभ्योऽश्वेभ्यश्च चैव षट्पदकिनीनकाः । मक्षिकाद्या विकाराश्च एतत्स्फोटकदर्मे । करावत विकाराश्च करीषेभ्यो भवन्ति हि । एवमादिरसख्यातो गणः अस्वेदजो मया । सर्वेषाञ्चिह्नितो ह्येष प्राकृतसर्वमात्र स्मृतः" वह्निपु॰ ।

स्वेदन न॰ स्विद—णिच्‌ ल्युट् । गात्रादितो घर्मादेर्नि सारणव्यापारे (भापरा) । स्वेदशब्दे दृश्यम् ।

स्वेदनी स्त्री स्विद्यते पच्यतेऽनया स्विद—ल्युट् । लौहपात्रभेदे (ताओया) अमरः । बह्वार्थं कन् टापि स्वल्प स्वेदनिका कन्दुरूपे पात्रे हेमच॰ भर्जनपात्रे शब्दमा॰ ।

स्वैर न॰ स्वस्य ईरन् ईर—अच्‌ वृद्धि । १स्वेच्छायाम् २तद्वति ३मन्दे च त्रि॰ मेदि॰ ।

स्वैरिन् त्रि॰ स्वेनैव ईरयित शीलमस्य ईर-णिनि वृद्धि । १स्वेच्छाचारिणि स्वतन्त्रे । २व्यभिचारि स्त्रियां स्त्री

[illegible]

सोपाश्रित [illegible]

[illegible]

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलिते
वाचस्पत्ये सकारादिशब्दार्थसङ्कलनम् ।

ह

हकारः व्यञ्जनेषु ऊष्मवर्णभेदः । कण्ठस्थानोच्चार्यः । "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्" शिक्षोक्तेः पञ्चमादियुक्तप्रयोगे उरस्योच्चार्यश्च । तस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण कण्ठस्थानस्य ईषत्स्पर्शः । "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथेति" शिक्षोक्तेः । बाह्यप्रयत्नास्तु घोषसंवारनादा महाप्राणश्च । अस्य ध्येयरूपं कामधेनुतन्त्रोक्तं यथा "हकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम् । कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम् । रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा । पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा । त्रिबिन्दुसहितं वर्णं हृदि भावय पार्वति!" । अस्याधिष्ठातृदेवताध्यानमुक्तं वर्णोद्धारतन्त्रे यथा "करवीरसूपिताभां बाहुष्टकां दिगम्बराम् । वह्निपाशाङ्कुशधरां वरदामम्बुजेक्षणाम् । नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिताम् । सर्वसिद्धिप्रदां नित्यां धर्मकामार्थमोक्षदाम् । एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत्" । मातृकान्यासेऽस्य दक्षपार्श्वे न्यस्यता । काव्यादौ प्रथमप्रयोगे खेदः फलं वृ०र०टीकायामुक्तं यथा "मः सौख्यं हस्तु खेदं विलयमपि च लो जः समृद्धिं करोति" । अक्षरादिगणानां प्रयोगे फलादिकं यत्र भवतीति तत्रैवोक्तं यथा "काव्यादौ गद्यपद्ये सचरि च सकले प्राकृतादौ समोऽयम्" इति । एतेषां फलाधारनिरूपणमप्याकारे "नायको वर्ण्यते यत्र फलं तस्य समादिशेत् । अन्यथा स कृते काव्ये कर्त्तरीमात्र फलम्" तस्य प्रतिप्रसवो यथा "देवता वर्ण्यते यत्र क्वापि काव्ये कवीश्वरैः । मित्रामित्रविचारो वा न तत्र फलकल्पना । देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा" ।

अस्य वाचकशब्दास्तन्त्रोक्ता यथा "ह शिवो गगनं हंसो नागलोकोऽम्बिकापतिः । नकुलीशो जगत्प्राणः प्राणेशः कपिलामयः । परमात्मा यमो जीवः वरावान्निदोऽङ्कुशः । स्वर्गोऽभयाऽरुणः स्थाणुः कूटस्थोऽपि सदा रवाः । वक्षोधृग्रिकरः शम्भुः प्राणसंस्थोऽजाटकाः । सर्वोपचारः शूली चैतन्यं पादपूरणम् । महालक्ष्मीपरं नादो मेघनादो विमर्दनः । बिन्दुदूर्गा प्रिया देवी मेघश्याम महेश्वरः । दक्षपादः सदा शम्भुः गङ्गाभो यासामसमग्रजन्म" वर्णाभिधानम् । "शुक्रवाय हकारोऽसुः प्राणः शान्तः शिवो वियत् । नकुलो नकुलीशश्च हंसः शून्यं शाकिनी । अनन्तो नकुली जीवः परमात्मा ललाटजः" इति बीजवर्णाभिधानम् । "हकारो नकुलीशोऽपि हंसः प्राणोऽम्बुजः प्रिये । महेश्वरो नकुलो वैरवाको गगनं रविः । शिवः शून्यमहाशून्य प्राणश्च परमेश्वरि!" रुद्रयामले दपटले ।

ह अव्य० हा–ड । १पादपूरणे अमर० २सम्बोधने ३नियोगे ४क्षेपे ५निग्रहे ६निन्दायां मेदि० ७प्रसिद्धौ च । ८शिवे पु० ९जले १०शून्ये ११आकाशे १२रक्ते १३स्वर्गे १४धारणे पु० मेदि० । १५पापहरणे १६चन्द्रे शब्दर० १७सकोपवारणे २०शुष्के च एकाक्षरकोष ।

हंस पुस्त्री० हस–अच्–पृषो० वर्णागमः । स्वनामख्याते १पक्षिभेदे अमरः स्त्रियां ङीष् २निर्लोभनृपे ३विष्णौ ४सूर्ये ५परमात्मनि "हंस तनौ सन्निहित चरन्तम्" नैष० । ६मत्सरे ७यतिभेदे ८मन्त्रभेदे ९देहस्थवायुभेदे १०अश्वभेदे मेदि० ११गुरौ १२पर्वते शब्दर० । १३शिवे अमर० १४कृष्णस्ते १५श्रेष्ठे हेमच० । १६विशुद्धे अमर० । १७अजपामन्त्रस्वरूपे वर्णे च "हकारेण बहिर्याति सकारेण विशेत् पुनः । हंसेति सततं मन्त्रं जीवो जपति सर्वदा" इति तन्त्रम् । अजपाशब्दे ८६ पृ० दृश्यम् ।

हंसस्वगस्य भेदाः तन्मांसगुणाश्च यथा "हंसाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः । वातश्लेष्मप्रदाश्चापि बलशुक्रकरा मताः" भावप्र० तदण्डस्य गुणाः "हंसाण्डञ्च परं बल्यं दुष्यं वातनाशनम् । पाके लघुतरं प्रोक्तं सर्वामयविनाशनम्" राजनि० । अस्य दर्शनादौ शुभाशुभत्वं वसन्तराजशाकुने उक्तं यथा "हंसाश्च सर्वेऽपि दर्शनेन हंसस्य यच्छन्तु सर्वसिद्धिम् । नामानि हंसस्य गृहणोति यस्तु प्रयान्ति नाशं दुरितानि तस्य । घोरैः समं दर्शनमाद्यमाहुर्निधिर्हितीयोऽथ भयं तृतीये । युद्धं चतुर्थे नृपतिप्रसादः स्यात् पञ्चमे हंसरवे नराणाम्" । यतिभेदहंसलक्षणं परमहंसशब्दे ४२१७ पृ० दृश्यम् । प्राणस्य हंसपदार्थत्वे हेतुकं पदार्थादर्शे "उच्छ्वासे चैव निश्वासे च हंस इत्यक्षरद्वयम् । तस्मात् प्राणस्तु हंसात्मा आत्माकारेण संस्थितः । नाभेरुच्छ्वासनिश्वासात् हृदयाग्रे व्यवस्थितः" ।

हंसक पु० हंस इव कायति कै–क । १पादकटके नूपुरादौ

[illegible] ।

हंसबीजक [illegible] ।

हंसगद्गदा [illegible] ।

हंसयामिनी [illegible] ।

हंसवाहन [illegible] ।

हंसमालिनी [illegible] ।

हंसपदी [illegible] ।

हंसपाद [illegible] ।

हंसपादिका [illegible] ।

हंसपादी [illegible] ।

हंसमाला [illegible] ।

हंसमाष [illegible] ।

हंसराज [illegible] ।

हंसवामय [illegible] ।

हंसवाहन [illegible] ।

हंसवती [illegible] ।

हंसबीज [illegible] ।

हंसाङ्घ्रि [illegible] ।

हंसारूढ [illegible] ।

हंसाभिख्य [illegible] ।

[illegible] ।

हंसोदक [illegible] ।

हंसी [illegible] ।

[illegible] ।

[illegible] (चाट) [illegible] ।

शठ [illegible] ।

शठपर्णि [illegible] ।

[illegible] (चाट) [illegible] ।

[illegible] ।

शठ [illegible] ।

शठ [illegible] ।

शठपर्णी [illegible] ।

शठयोग [illegible] ।

[illegible] ।

